ISSN NO: 2278-6163

*SHIKSHA VAHINI / 2019-20 / VOL.9 ISSUE 1*



**SHIKSHA - SHASTRI**
**2018-20**

SHIKSHA VAHINI - 2019-20

**SHIKSHA VAHINI**
**DEPT. OF EDUCATION**
**CENTRAL SANSKRIT UNIVERSITY**
Established by an Act of Parliament
(Formely Rashtriya Sanskrit Sansthan, Deemed to be University)
Under Ministry of Human Resource Development, Govt. Of India
GURUVAYOOR CAMPUS, PURANATTUKARA, THRISSUR, KERALA - 680 551
GURUVAYOOR CAMPUS, PURANATTUKARA, THRISSUR, KERALA - 680 551

**ISSN NO: 2278-6163**

# शिक्षावाहिनी

**Vol - 9 Issue -1**
**2019-20**

## आचार्यचल्लालक्ष्मीनारायणशर्मविशेषाङ्कः



सम्पादकः
**प्रो. अशोककुमारकछवाहः**
विभागाध्यक्षः

सहसम्पादकौ

**डा. श्यामराजः .सि**
सहायकाचार्यः

**श्री ललितमोहनपन्तोला**
सहायकाचार्यः (अंशकालिकः)

**शिक्षाशास्त्रविभागः**
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, मानितविश्वविद्यालयः)
भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनः
गुरुवायूर्-परिसरः, पुरनाट्टुकरा, तृश्शूर्- केरलम् - ६८० ५५१

प्रो. एस्. सुब्रह्मण्य शर्मा
कुलसचिव
केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली
संसद के अधिनियम द्वारा स्थापित
(पूर्व में राष्ट्रिय संस्कृत संस्थान, मानित विश्वविद्यालय)
मानव संसाधन विकास मन्त्रालय, भारत सरकार के अधीन

Prof. S. Subrahmanya Sarma
REGISTRAR
Central Sanskrit University, Delhi
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan, DU)
Under MHRD, Govt. of India

## ॥ शुभाशंसा ॥

*तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।*
*विद्या बलं दैवबलं तदेव लक्ष्मीपतेरङ्घ्रियुगं स्मरामि॥*

‘**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति**’’ इति वाक्यपदीयं वचः व्याकरणस्य महत्त्वं प्रख्यापयति। शब्दशास्त्रोपासनया लोके प्रशस्तिं यान्ति। अत एव ‘‘**ते देवा विचरन्ति महीतले ये व्याकरणसंस्कारपवित्रितमुखाः नराः**’’ इत्यभियुक्तिः प्रसिध्यति। तेषु प्रथितयशस्काः नानाशास्त्रोपासकाः व्याकरणमूर्धन्याः विशिष्य शिक्षाशास्त्रे लब्धप्रतिष्ठाः व्यवहारप्रवीणाः आचार्याः **प्रो. चल्ला लक्ष्मीनारायणशर्मवर्याः** अन्यतमाः । इमे व्याकरणशास्त्रे नैकान्सरलान्ग्रन्थान् पाठकानां कृते रचयामासुः। तथैव शिक्षाशास्त्रे विशिष्टान्ग्रन्थान् व्यलेखिषुः। तत्र पञ्चविंशतेः वर्षेभ्यः ‘‘**संस्कृतशिक्षणम्**’’ इति शिक्षाशास्त्रसम्बद्धग्रन्थोऽनेकशिक्षकाणां प्रशिक्षकशिक्षकाणां शिक्षाचार्यशिक्षाशास्त्रिच्छात्राणां सन्मार्गप्रदर्शकोऽस्तीति निश्चप्रचं वक्तुं शक्यते। लक्षाधिकच्छात्राः शिक्षकाश्चाधुनापि गन्थकुसुममिदमादर्शरूपेणार्चयन्तीति कथने नास्ति संशीतिलेशः। इमे अन्तर्दृष्टयः, शान्तमनस्काः, गभीराः, स्मितवदनाः, विभिन्नविश्वविद्यालयेषु शैक्षणिकसमितिषु च अध्यक्षपदवीञ्चलमकार्षुः। अध्ययनाध्यापनशासनप्रबन्धनादिकर्मसु परिनिष्ठिताः, साम्प्रतं केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुरुवायूर्-परिसरस्य निदेशकपदव्यां विराजमानाः जुलै- मासान्ते पदवीतः निर्वर्त्स्यन्ति। तादृशान् कर्मठान् शिक्षासङ्घायाध्यक्षान् निर्देशकान् **प्रो. चल्ला लक्ष्मीनारायणशर्मवर्यान्** अहमभिनन्दामि। अमीषामाचार्याणां वैदुष्यं कार्यदक्षतां, सम्प्रेरणभाषणानि समयस्फूर्तिं च न कदापि विस्मरेम। तेषां कार्यकाले परिसरोऽयं महतीं प्रोन्नतिमगादिति महान्तं हर्षमनुभवामि। तेभ्यः साधुवादान्वितीर्य, तेषां भाविजीवनं सुखमयं शान्तिपूर्णमाह्लादसमन्वितञ्च बोभूयतामिति भगवन्तं गुरुपवनपुरेशं सम्प्रार्थये। प्रतिहायनमिव ऐषमः गुरुवायूर्-परिसरस्य शिक्षाशास्त्रविभागः ‘‘**शिक्षावाहिनी**’’ इति वार्षिकशैक्षिक-ग्रन्थरत्नसम्पादने सफलः सन् तत्राचार्यायेमां पत्रिकां पदनिवृत्तिकाले विशेषरूपेण समर्पयतीति विषयोऽयं मुदावहः वर्तते। तत्र कार्येऽस्मिन् प्रेरकप्रवरान्शिक्षाविभागाध्यक्षान्तद्विभागीयप्राध्यापकान् च अभिनन्दामि।

भावत्कः

प्रो. एस्. सुब्रह्मण्य शर्मा

56-57, Institutional Area, Janakpuri, New Delhi-110058 (INDIA)
Ph. No.: (O) 011-28520979, Fax : 28520976, EPABX: 28524993, 28521994, 28524995,
E-mail: sanskrit.registrar@gmail.com / ps2reg.csu@gmail.com website : www.sanskrit.nic.in



**Prof P. N. Shastry**
Vice Chancellor



**Prof S. Subrahmanya Sarma**
Registrar



**Prof Ch. L. N. Sarma**
Director

# FACULTY MEMBERS



**Prof. Ashok Kumar Kacchwah**
H.O.D., Shiksha Shastry



**Dr. K.K. Harshakumar**
Asso. Professor



**Dr. K. Giridhara Rao**
Asst. Professor



**Dr. D. Venugopala Rao**
Asst. Professor



**Dr. P. Vidyadhar**
Asst. Professor



**Dr. Shyamraj .C**
Asst. Professor



**Sri Lalit Mohan Pantola**
Asst. Professor (Guest)



**Sri. K.M. Bhaskaran**
Executive (Lab)



**Sri. Vineesh P.V.**
Peon (Adhoc)

# विषयानुक्रमणिका

**सम्पादकीयम्**
**शुभाशंसाः**
**विभागीयाध्यापकाः**

| क्र.सं | विषयः | लेखकः | पृष्ठसंख्या |
|---|---|---|---|
| 1. | राष्ट्रपिता महात्मागान्धी | आर् एस् पोतुवाल् | 1 |
| 2. | शैक्षिकप्रशासनं तत्स्वरूपञ्च | प्रो.अशोककुमारकछवाह | 4 |
| 3. | Behavior Management Strategy in Class Room- An Overview | Dr KK HARSHAKUMAR | 7 |
| 4. | Mobile Applications for Teachers | Dr K. GIRIDHARA RAO | 10 |
| 5. | संस्कृतशिक्षणकक्ष्यायां श्रुतिपरम्परा | डा.डि.वेणुगोपाल रावः | 15 |
| 6. | पर्यावरणशिक्षायाः परामर्शाः | डा.विद्याधर प्रभला | 22 |
| 7. | तन्त्रशास्त्रे उपासनायाःसम्प्रत्ययः | डा.श्यामराज.सि | 29 |
| 8. | अध्यापकशिक्षा पाठ्यक्रम में राष्ट्रवादी विचारधारा की आवश्यकता | ललितमोहन पन्तोला | 33 |
| 9. | CHANGING MINDSET AND MANAGING LIBRARIES: - ISSUES AND IMPLICATIONS | Dr. Rautmale Anand S | 35 |
| 10. | समाजे नारीसुरक्षाधिकारस्य महत्वम् | Dibyendu Kumar Mandal | 40 |
| 11. | अहं नारी | एलिना जेना | 44 |
| 12. | साम्प्रतिकसमाजे उत्तमअ-ध्यापकस्य आवश्यकता | पुष्पाञ्जलि प्रधानः | 45 |
| 13. | शिक्षणाभ्यासे अनुशासनस्य महत्वम् | मीनकेतन माझी | 47 |
| 14. | साम्प्रतिकसमाजे बालापराधः | रश्मिरेखा पात्र | 50 |
| 15. | मूल्याङ्कनस्य विहङ्गावलोकनम् | सुषमा मिश्रः | 52 |
| 16. | ज्योतिषशास्त्र दृष्ट्या रोगविचारः तन्निवारणोपायाः | मनीष कुमार तिवारी | 54 |
| 17. | आत्मरक्षा उपाय | सुभद्रा दाशः | 56 |
| 18. | शिक्षाक्षेत्रे आधुनिकशिक्षकः | जागृति आढ्य | 57 |
| 19. | हम्पिवैभवम् | राघवेन्द्र नरसिम्ह गांव्करः | 58 |
| 20. | केरलराज्ये संस्कृतशिक्षणस्य वर्तमानकीलीनस्थितिः | दिपिन् | 59 |
| 21. | व्याकरणशास्त्रशिक्षणे प्राचीनाधुनिकशिक्षणपद्धत्योः तुलनात्मकविवेचना | निधि आर्या | 61 |
| 22. | एक विचार | स्मृतिमञ्जरी राउत | 63 |
| 23. | प्राचीनार्वाचीनशिक्षकयोः मनोवैज्ञानिकचिन्तनम् | सुश्रीस्मिता खुण्टिआ | 64 |
| 24. | नारीणां सशक्तीकरणम् | मामा जेना | 66 |
| 25. | वायुमण्डलस्य स्तराः | राजलक्ष्मी बिश्वालः | 67 |
| 26. | आधुनिकसमाजे व्यवहारस्य प्रासाङ्गिकता | देवयानी रथ | 69 |

| | | |
|---|---|---|
| 27. व्याकरणाध्ययनप्रयोजनानि | स्वागतिका चम्पति | 70 |
| 28. योगरहस्यम् | स्मिता राणी मिश्रः | 72 |
| 29. ॐ कारस्य महत्त्वम् | कल्पना नन्दः | 73 |
| 30. ओडिशाराज्ये संस्कृतभाषायाः अधोगतेः कारणानि | एलिना राय | 74 |
| 31. सङ्गणकयन्त्रे संस्कृतस्य उपादेयता | ज्योतिर्मयी दासः | 76 |
| 32. आदर्शछात्रस्य संकल्पः | मामालि राउत | 78 |
| 33. आधुनिकराष्ट्रनिर्माणे युवकस्यावदानम् | रञ्जिता प्रधान | 79 |
| 34. विद्यालयीयपाठ्यक्रमेषु मूल्यशिक्षा | प्रज्ञापरिमिता जेना | 81 |
| 35. अन्तद्वारपाठ्यसहगामीक्रियाणां संस्कृतशिक्षणे समावेशः | सस्मिता बिसोइ | 83 |
| 36. संस्कृताध्यापकः | श्रद्धाञ्जली सेनापतिः | 84 |
| 37. राष्ट्रनिर्माणे छात्रशिक्षकयोः भूमिका- | पूर्णिमा परिडा | 86 |
| 38. विज्ञानस्य उपलब्धयः तस्य दोषाश्च | सुचित्रा वेहेरा | 88 |
| 39. अधिगमे मातृभाषायाः प्रभावः | मनोरमा अगस्ति | 89 |
| 40. हे नववर्ष! | अर्पिता अनुपमा | 91 |
| 41. प्रान्तीयविद्यालयच्छात्रेषु संस्कृतभाषादक्षताभिवर्धनम् | राजेन्द्र कुमार साहुः | 92 |
| 42. प्लाष्टिकमाध्यमेन प्रकृतेः विनाशः एवं तन्निवारणमुपायाः | अनुपमा महान्ति | 94 |
| 43. छात्राणां कर्तव्यानि | मिता पधान | 96 |
| 44. गुरुकुलशिक्षाद्यतनशिक्षणयोः मध्ये प्रभेदः | आशालता दास | 97 |
| 45. शाब्दबोधप्रकारः | देवश्री स्वाई | 99 |
| 46. संस्कृताध्यापकस्य संस्कारज्ञानम् | शाश्वती शुभदर्शिनी परिडा | 100 |
| 47. धार्मिकशिक्षायाः मूल्यानि | तापस मिश्रः | 101 |
| 48. संस्कृतछात्राध्यापकानां वाचनदोषाः तन्निवारणोपायाश्च | सुस्मिता पह्लार | 103 |
| 49. साप्रतिकसमाजानुगणं बाल्यशिक्षाः | सुनिल कुमार बेहेरा | 104 |
| 50. विज्ञानस्य विपक्षे | श्वेता महान्ति | 106 |
| 51. गायत्रीमन्त्रस्य वैशिष्ट्यम् | बिनोदिनी नायकः | 108 |
| 52. उत्कलकवयः | गयत्री महान्ति | 109 |
| 53. श्रीमद्भगवद्गीता मनोवैज्ञानिकता च | यंगचन्द  ओझा | 110 |
| 54. संरक्षणीया जैवसंस्कृतिः | ज्योती ए के | 112 |
| 55. परिवेशसुरक्षायै अद्यतनसमाजस्य कर्तव्यम् | लुपामुद्रा महान्ति | 114 |
| 56. मातृभाषात्वेन संस्कृतेऽगते सति ...? | रम्या.आर् के | 115 |
| 57. पञ्चकर्मचिकित्सा | लिस्ना सि.जेम्स् | 117 |
| 58. समकालिकशिक्षाप्रणाल्यां संस्कृतस्य प्रभाव | प्रसन्ना क .ई . | 119 |
| 59. ज्ञानसंस्कारयोः महत्वम् | रङ्कनिधि खण्डपाणि | 121 |
| 60. मूल्यशीक्षाभौतिकाध्यात्मिका च- | श्रीधरन् एडमना | 125 |
| 61. भारतीयसंस्कृति: | अनन्दभट्टः | 127 |
| 62. संस्कृतभाषा | गिरीशभट्ट् | 128 |
| 63. शिक्षा क्षेत्रे मनोविज्ञानास्य आवश्यकता | दीप्ति . के | 130 |

| | | |
|---|---|---|
| 64. साम्प्रतिके समये नारीशिक्षायाः गुणदोषविवेचनम् | अनश्वरा बालन् | 131 |
| 65. आधुनिका दूरवाणी | के.अनुश्री | 133 |
| 66. उत्कलस्य प्राचीन नवान्नपर्वम् | आशिष्कुमार साहु | 133 |
| 67. जगन्नाथसंस्कृतिः | विमल् शतपथि | 134 |
| 68. महिलाओं की सुरक्षा | प्रतिमा रानी आईच | 136 |
| 69. बह रही है कैसी यह बयार | अमित सिंह | 138 |
| 70. ।। माँ ।। | दीपककुमार थोरात | 139 |
| 71. भारतीयवास्तुशास्त्रस्य उपयोगिता | देवश्रीपरिधा | 140 |
| 72. शिक्षकेभ्यः शिक्षामनविज्ञानस्यावश्यकता | जगज्जीवन सिंहः | 141 |
| 73. THE PLANET SAVE EARTH | प्रीतिप्रज्ञा मुदाली<br>जयस्मिता महापात्र | 142 |
| 74. गीतायाः महत्वम् | लक्ष्मिप्रिया | 145 |
| 75. ओडिशायाः लोकनृत्याणि | लिलिमा साहू | 146 |
| 76. भारतीय दर्शनेषु आत्मस्वरुप विमर्शः | मधुस्मिता सेनापति | 148 |
| 77. आधुनिकशिक्षणे उपनिषद् दर्शनानां अपेक्षा | मनु.न | 149 |
| 78. सोशल मीडिया | मोनिका चाटर्जी,सरिता नायक | 150 |
| 79. संस्कृतसाहित्यास्वादनाय व्याकरणस्य आवश्यकता | स्मिता.वि | 152 |
| 80. संस्कृतभाषा-कविता | स्वातिकृष्णा.के.पि | 152 |
| 81. यौतुकप्रथा स्वाति | सुदेष्णा पहि | 153 |
| 82. आर्टिकल 370 | सोनालि शर्मा | 154 |
| 83. जननीजठरशिक्षा | उपेन्द्र साहु | 157 |
| 84. केरलसंस्कृतिः एवं त्रिशूर् पूरं च | कार्त्तिका | 158 |
| 85. शिक्षा से दूर आदिवासी महिलायें | गोमति प्रियदर्शनी बेहरा | 159 |
| 86. संस्कृत भाषा से पलायन | डिलिश्वर दास | 161 |
| 87. आध्यात्मिकजगति शिक्षायाः माहात्म्यम् | पुज्यवन्दिता चक्र | 162 |
| 88. राष्ट्रस्य विकासे प्रवासीनां योगदानम् | प्रतीति आर्या | 165 |
| 89. वैश्वीकरणम् | बृन्दावनि महान्ति | 166 |
| 90. संस्कृतभाषायाः प्रचारप्रसाराय संस्कृत छात्रस्य भूमिका | मीनकेतन साहु | 168 |
| 91. मोवाईल | वेङ्केटेश्वर गोपाल | 171 |
| 92. प्राचीन भारत में शिक्षा | वैशाखि जेना | 171 |
| 93. वायुप्रदूषणम् | सुचित्रा मुदाली | 173 |
| 94. भारतीय संस्कृतिः धर्मश्च | सुधीर वनछोर | 175 |
| 95. समय का सदुपयोग | सोनालिका रथ | 177 |
| 96. नारी शिक्षा | स्मृतिरेखा मिस्त्री | 178 |

# लक्ष्मीनारायणबुधवरो राजतां प्राज्ञवृन्दे

प्रो.ए.पि.सच्चिदानन्दः उडुपः
भूतपूर्वकुलपतयः,
राष्ट्रियसंस्कृतसंस्थानम्

चल्लावंशे सुविदितकुले प्राप्तजन्मा सुधीन्द्रो
गोदावर्यमुषित-कमलाराममूर्त्योः सुपुत्रः।
सद्विद्यायां प्रणिहितमनाः शास्त्ररत्नाकरोऽयं
लक्ष्मीनारायणबुधवरो राजतां प्राज्ञवृन्दे।।1।।

लक्ष्मीकान्तं मनसि भजते सर्वदा वंशदैवं
नैकान् कोशान् मधुरकविताः स्तोत्रमालाश्च कुर्वन् ।
व्याख्यात्येषः समुचितविधीन् शिक्षणे संस्कृतस्य
लक्ष्मीनारायणबुधवरो राजतां प्राज्ञवृन्दे।।2।।

नानभाषामृदुललितवाक् वाग्मिभिश्शंसितश्च
साहित्येऽसौ पटुमतिरथो शब्दशास्त्रे च नूनम् ।
शिक्षाशास्त्रे दृढतरमतिः शान्तचित्तः सदा यो
लक्ष्मीनारायणबुधवरो राजतां प्राज्ञवृन्दे।।3।।

शर्माद्धाङ्गीं मधुरमधुरं चानिमेषं सुपुत्रं
कन्यारत्नं सुकृतकृतिभिस्तां मनीषामवाप्य।
मित्रैस्सार्धं विलसति सदा पुण्यशीलः कवीन्द्रो
लक्ष्मीनारायणबुधवरो राजतां प्राज्ञवृन्दे।।4।।

मान्यः शिष्यैः प्रणतिततिभिश्श्रद्धया प्रार्चितोऽयं
शिक्षारण्ये सकलपदवी राजिता येन राष्ट्रे ।
कृष्णक्षेत्रे परिसरहितासादने बद्धदीक्षो
लक्ष्मीनारायणबुधवरो राजतां प्राज्ञवृन्दे।।5।।

शर्माणं मान्यमान्यं तं लक्ष्मीनारायणं बुधम् ।
समुद्दिश्य कृतं प्रीत्या चलनाशर्मपञ्चकम् ।।
आन्ध्रेषु करलेष्वेवं राज्येषु विवधेष्वपि ।
कृतकार्यो भवानद्य शोभते शिष्यवत्सलः।।
आशास्महे शतं जीव नैरुज्येन सुखेन च ।
गुरुवायूरुकृष्णस्ते दद्यात्सर्वं मनोरथम् ।।

# A Wonderful Personality

Prof.M.A Babu
Former Principal

Prof. Ch.L.N. Sharma, Director of Central Sanskrit University, Guruvayoor Campus is retiring from service after rendering 40 years of Valuable service as a model teacher and educational administrator in the capacity as Director. My association with him begins as early as 1980. I could notice one thing he holds a wonderful personality .

He is a eminent scholar in Sanskrit. His books are self –explanatory to prove his scholarship. He is a good poet. His poems are published in many journels and periodicals. He is an Educationalist. He served as a talented teacher Educator for along period and guided many students to get their doctoral degrees .

He was a integral part of Rastriya Sanskrit Sanstan. He was a member of all important committees of the Sanstan. His contribution are always praise worthy . He was always keeping a good relationship with all persons He had a cordial friendship with all staff members both teaching and non-teaching. His approach is noteworthy. He could deal all problems with a special talent as quite personality .

Prof. Ch.L.N. Sharma speaks less and work more. He used to listen others than speak himself. I have learnt a lot from Prof. Sharma. He has very much influenced my life. I wish him all Success to have a wonderful days of peaceful retirement. May God bless him in all his efforts to lead a bright future .

# ।।वनमाला।।

**प्रो.ई.एन् राजन्,**
साहित्यविभागः, गुरुवायूर् परिसरः

लक्ष्मीनारायणोऽस्मत्परमगुरुवरः प्रापतसौभाग्यशाली
गच्छत्यस्मात्सुकेन्द्रात्प्रबलनियमतो बन्धनादेवमास्ते।
अस्मिन्नेवागमिष्यन् पुनरपि सततं नो भवेद्बोधयिष्यन्
तावत्ततसद्गुणानां तव च दिनमनुस्मारिका पत्रिकेयम्।।१।।
नानशास्त्रविचक्षणैर्गुणवरैस्तत्तुल्यविद्यारिथिभिः
गैर्वाण्याऽमलभाषया सहृदयानुदिश्य विद्वज्ज्ञानान्।
पर्यालोच्य मतान्यनेकविदुषां छात्रेषु सङ्कल्पिता
शिक्षापूर्वकवीहिनी प्रवहतात्सर्वेषु वर्षेष्वितः।।२।।
संस्थानस्य प्रतिपरिसरं शिक्षकान् संविधातुं
शिक्षाशास्त्रं प्रचलति बुधान् सद्गुरून् संनिवेश्य।
एकस्तत्र श्रुतपरिसरो वर्तते केरलेषु
तस्मादेषा बहुलविषया पत्रिका सम्बभूव।।३।।
नानासुवर्णपदकञ्च मनोहरेयं
संशोभते सुरनदीव भुवं पुनाना।
तस्यामतः प्रमुदितास्समचित्तयुक्ता
मग्ना प्रशान्तिममलां भजताऽनुकूलम्।।४।।

अस्त्यत्र शास्त्रं कविता मनोज्ञा अनेकविद्वज्जनगुम्फनोत्थम्।
आन्तं रसं सर्वमनोऽनुकूलम् अधीत्य बुद्धिं विशदां कुरुध्वम्।।५।।

अनन्तगुणसमिश्रामेनां वक्तुमहोऽक्षमः।
अतस्तस्यै मनोज्ञेयं वनमाला प्रदीयते।।६।।

# राष्ट्रपिता महात्मागान्धि :

प्रो.आर्.एस्. पोतुवाल्
भूतपूर्वप्राचार्याः
पाला संस्कृत कलालयः

अस्माकं राष्ट्रपितुः महात्मागान्धीमहोदयस्य जन्म 1869 तमे खिस्ताब्दे अक्टूबर मासे द्वितीयतारिकायां गुजरात् राज्ये पोरबन्दर नामके नगरे आसीत् । तस्य पूर्णनाम मोहनदास करम्चन्द गान्धीति । पिता करम्चन्द गान्धी पोरबन्तर राज्यस्य प्रधानमन्त्री आसीत् । माता पुतलीबाई अतीवधर्मिष्ठा स्नेहवती चासीत् । मातुः शिक्षणेन गान्धीमहोदयस्य धर्मपरायणता रूढमूला अभवत् । विद्यालयपठनकाले त्रयोदशतमे वयसि तस्य कस्तूर्बाई नामिकया बालिकया सह विवाहः सम्पन्नोऽभवत्।

बाल्यकालादारभ्य गान्धीमहाशयः सत्यपिरपालने दत्तावधानोऽसीत् ।बाल्ये दृष्टं हरिश्चन्द्रस्य नाटकं तस्य मनःअतीवप्रभावितम् अकरोत् । तथैव मुनिबालकस्य श्रवणकुमारस्य कथा अपि तं सेवाभावं प्रति प्रबुद्धमकरोत् । विद्यालये गान्धीमहाशयस्य कश्चित् सहचरः मांसभक्षकः आसीत् । तस्य कुसंगेन सः असकृत् मांसाहारं कृतवान् । परं मांसाशनं धर्मविरुद्धं मन्यमानः सः अक्ष्यभक्षणेन व्यकुलचित्तो भूत्वा एकदा रोगशय्यावलम्बिनः स्वपितुः पुरस्तात् कुसंगेन जातान् अपराधान् अनावृतान् चकार । कृतापराधस्य पुत्रस्य सत्यभाषणेन पिता अतीवसन्तुष्टोऽभवत् पुत्रं समाश्वासितश्च । पश्चातापेन पवित्रीकृतः गान्धीमहाशयः पुनः कदापि मांसभक्षणे तत्परो नाभवत् ।

अध्ययने जागरूकः गान्धीमहोदयः मेट्रिक् परीक्षाम् उत्तीर्य स्वराज्यात् बहिः उन्नतशिक्षासम्पादनार्थं विश्रुतम् इङ्ग्लड् देशमगमत् । यात्रावसरे तेन मातृसमक्षं शपथद्वयं कृतम् । एकेन मांसाशनमपरेण परस्त्रीसमागमश्च तेन निराकृतौ । वर्षद्वयपर्यन्तम् इङ्ग्ड देशे उषित्वा विधिपरीक्षामुत्तीर्य बारिस्टर् उपाधिना सह स्वदेशमगमत् । गान्धीमहाशयः मुम्बई नगरस्थे महान्यायालये सेवनं कर्तुं उद्यतोऽभूत् । परन्तु क्रमेण न्यायालयप्रवर्तनेषु सत्यसाक्षातकारं विरलमिति विज्ञाय सः अत्यन्तं व्यकुलचित्तः सम्जातः । एतस्मिन् अवसरे अदृष्टवशात् दक्षिणाफ्रिकाख्यं देशं गन्तुमवसरः समुपजातः। तत्र दादा अब्दुळा आन्ट् फो इति संस्थायाः प्रवर्तनेषु साहाय्यं कर्तुं कस्यचित् उपदेशकस्य आवश्यकता जाता । उपर्युक्तं पदं स्वीकृत्य सः तत्र गन्तुं कृतनिश्चयोऽभूत् ।

दक्षिणाफ्रिका तदानीं धवलचर्मिणां युरोपियानां शासनाधिकारे अवर्तत । तद्देशवासिनः भारतीयाश्च तेषां दासभावेन जीवयापनं कुर्वन्ति स्म। गान्धीमहोदयः मानवानामेतादृशीं दुरवस्थां दृष्ट्वा अतीवव्यकुलमनाः अभवत् । सः स्वदेशीयानाम् असमत्वजन्यदुरितानि दूरीकर्तुं तेषामेकां समितिं निर्माय युरोपियैः सह संघर्षं कर्तुम् आरभत । अस्मिन् संघर्षे तेन नूतना समरपद्धतिः आविष्कृता ,हिंसात्मिकां साधारणीं युद्धनीतीं हित्वा अहिंसात्मिकः कश्चित् प्रतिरोधरूपः सङ्घर्षमार्गः स्वीकृतः ।

क्रमेण धवलचर्मिणः एतादृशीं नूतनसमरपद्धतिं प्रतिरोधुमसमर्थाः अभवन् । फलतः गान्धीमहाशयं प्रति तेषां मनसि आदरभावः समुपजायते स्म । तस्य नूतनसमरपद्धतिः सत्याग्रहसमरम् इति नाम्ना प्रसिद्धा अभवत् । अत्यधिकमात्मबलं, इच्छाशक्तिः,उद्देश्यं प्रति निर्णयात्मिका त्यागबुद्धिः येषां मनसि विद्यन्ते त एव एतादृशं समरं जेतुं समर्थाः भवन्ति ।

दक्षिणाफ्रिकानिवासिनां दुस्थितिं परिहृत्य गान्धीमहाशयः 1915 तमे खिस्ताब्दे स्वराज्यं भारतं प्रतिनिवृत्तः । तस्मिन् अवसरे भारतराज्ये कोण्ग्रस् संस्थायाः नेता आसीत् श्रीगोपालकृष्ण गोखले महाशयः तस्य निर्देशान् मानयित्वा सः देशसेवासु निमग्नोऽभवत् । गुजरात् राज्यस्य अहमदाबाद् नगरे सबरमतिनद्यः तीरे सत्याग्रहक्षेत्रं स्थापितम् ।तत्र निवासं कुर्वन् भारतीयानां शोच्यावस्थां ज्ञातुं हिमालयादरभ्य कन्यकुमारीपर्यन्तं भारतपर्यटनं कृतवान् । अस्मिन् पर्यटने तेन विज्ञातं यत् भारतवासिनां मनसि देशप्रेमःविरलमवर्तत।एतां नुनतां परिहर्तुं तेन हिन्द स्वराज नामकं पुस्तकं विलिख्य जनानां मध्ये प्रचरितम् ।विदेशीयवस्त्राणां बहिष्कारे स्वदेशीयखादिवस्त्राणां प्रचारे सः दत्तचित्तः अभवत् ।ब्रडीशसर्वकारस्य शासनानि अवगणय्य तेन सह सहयोगं कर्तुं जनान् प्रेरयामास । गुजरात् राज्यस्य दण्डीति प्रसिद्धे समुद्रतीरे लवणमुत्पादयितुं सम्घाटितः लवणसत्याग्रहः आभारतं महतीं क्रान्तिं समुत्पादयति स्म । एतादृशैः नियमनिषेधप्रवर्तनैः असन्तुष्टाः अधिकारिणः कारागृहे तं असकृत् बबन्धुः । परं गान्धीमहाशयःकदापि खिन्नः नाभवत् ।स्वधर्मे निधनं श्रेयः इति गीतावचनं तेन स्वानुभूतिजन्याचारैः सार्थकं कृतम् ।

गान्धीमहोदयस्य नेतृत्वं स्वीकृत्य मातृभूमेःस्वाधीनतार्थं भारतीयजनकोटिभिः कृतानि अहिंसात्मकसत्याग्रहसमराणि नियन्तुं यदा अधिकारिणः असमर्थाः अभवन् तदा भारतं स्वतन्त्रराज्यं कर्तुं ऐच्छन् । फलतः कतिपय मुस्लिम् धर्मावलम्बिनां मुसलिम्-राज्यवादिनां प्रेरणया ब्रिडिशशासनाधिकारिभिः राज्यं द्विधा विभक्तम् 1947तमे खिस्ताब्दे आगस्तमासस्य पञ्चदशतारिकायाम् अस्मिन् भूखण्डे भारतम् पाकिस्थानमिति द्वयोः स्वतन्त्रराष्ट्रयोः सृष्टिः प्रखापिता । राज्यस्य विभजनेन गान्धिमहोदयः अतिमात्रं उद्विग्नोऽभवत् ।

राज्यस्य विभजनेन असन्तुष्टानां हिन्दुमुस्लिम् जनविभागानां मध्ये उत्पातः रक्तपातः विविधाश्च अभवन् । राज्ये जातामिमां दुस्थितिं दृष्ट्वा अत्यन्तं दुःखितः गान्धिमहाशयः जनानां मध्ये शान्तिं स्थापयितुमनाः ग्रामग्रामान्तरं पर्यटनमकरोत् । परन्तु केचन हिन्दुराष्ट्रवादिनः युवकाः तस्य प्रवर्तनेषु मुस्लिम् पक्षपातित्वमारोप्य तस्य वधाय मतिं चक्रिरे । 1948 तमे खिस्ताब्दे जनवरिमासस्य त्रिंशत् दिनाङ्के सायंकाले कश्चित् नाथुराम् गोड्से नामकः युवा बिरलाभवनात् सहचरैः सार्धं प्रर्थनसभाम् अगच्छतः महात्मनः गान्धिमहाशयस्य प्रणान् गोलीवर्षैः अपाहरत् । विना विलम्बं सः महापुरुषः रामनामानि जपन् स्वशरीरं तत्याज । गान्धिमहोदयस्य अतिदारुणं चरमवृतान्तं राज्यस्य निखिलेषु प्रदेशेषु राज्यान्तरेषु च प्रसृतं श्रुत्वा जगद्वासिनः सर्वेऽपि सज्जनाः अगाधे शोकसागरे न्यपतन् ।

महात्मागान्धिः महाशयः न केवलं राजनीतिज्ञः अपि तु महान् समाजपरिष्कर्ता च आसीत् । भारतस्य दुर्दशां दूरीकर्तुं अनेन नवजीवन् हरिजन् आदिपत्रिकानां प्रकाशनद्वारा विविधाः कार्यक्रमाः आसूत्रिताः। विचारेषु औन्नत्यं जीवनचर्यायां लालित्यं तस्य कर्मक्षेत्रे सर्वत्र प्रकटमासीत् । शैलाः इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः सुभाषितमिदं स्वजीवनचर्यायां सार्थकं कृतम् । अधःपतितानां दलितानां समुद्धरणं तस्य प्रथमं प्रधानं च कृत्यमासीत् । सः स्ववस्त्रधारणं ललितं अनाकर्षकं चाकरोत् । यात्रासु धुमशकटस्य तृतीयश्रेण्यामेव पर्यटनं कृतम् । आयव्ययेषु महती

श्रद्धा प्रकटिता । सर्वेषामेव शौचानाम् इदमनुवचनं तस्य जीवितयात्रायां प्रचोदकमासीत् । भारतस्य शापभूताम् अस्पृश्यतां दूरीकर्तुं सत्याग्रहसमराणि राज्ये यत्र तत्र आयोजितानि ।जनतायाः चारित्रध्वसिनः मद्यपानस्य अनभिलषणीयतां प्रति जनान् उद्बोधयामासः । ग्रामवासिनां आर्थिकस्थितिं उद्धर्तुं कुटीरोद्योगानां प्रोत्साहनं कृतम् । ग्रामिणवनितानां कृते स्त्रीशिक्षायाः कृते व्यवस्था राज्ये सर्वत्र प्रचारिता । आचरणेषु उच्चनीचत्वं तेन सर्वथा निराकृतम् । सामान्यजनानां मनसि स्वदेशाभिमानं रूढमूलं कर्तुं विदेशवस्त्राणां बहिष्करणाय स्वदेशीयवस्त्राणां प्रचारणाय च राज्ये सर्वत्र खादिकेन्द्राणि समायोजितानि ।जनानां सर्वधर्मसमन्वयस्य अवबोधनार्थं स्वकीयप्रर्थना सभासु सर्वेषामेव धर्मग्रन्थानां वाचनम् अनिवार्यमकरोत् । जनानां रोगप्रतिरोधार्थं प्रकृतिचिकित्सां प्रोत्साहितवान् ।

विदेशीयानां दीर्घकालशासनेन मन्दीभूतायाःभारतीयसंस्कृतेः पुनरुत्थानं व्यापनं च गान्धिमहोदयस्य प्रवर्तनलक्ष्यमासीत् । लक्ष्यसाक्षात्कारेण सन्तुष्टहृदयाः नवभारतसंविधातारः जनकोटीनाम् अनुमत्या सह महात्मानं गान्धिमहोदयं राष्ट्रपितृस्थाने अभ्यषिञ्चत् ।

# शैक्षिकप्रशासनं तत्स्वरूपञ्च

प्रो.अशोककुमारकछवाह
शिक्षाशास्त्रविभागाध्यक्षः

भूयः विकासशीलायाः मानवसभ्यतयाः समुन्नतिः यथानुदितं परिलक्ष्यते तथैव तदीयावश्यकतायाःवर्धन्त्यः वर्तन्ते । एतासाम् आवश्यकतानां नैकाकी मानवः परिपूरयितुं क्षमः विद्यते । परिणामतः अपरैः स्वीयज्ञातिभिः संमिल्य समूहं रचयति,संघठनं च विदधाति एवमेव क्रमशः तत्संघठनं संस्थामेकां प्रसूते ।अनया संस्थया सःस्वीयावश्यकताः पूरयितुमर्हति । एताः संस्थाः मानवजीवनस्य नैकैःपक्षैः यथा सामाजिक,आर्थिक,औद्योगिक,धार्मिक तथा शैक्षिकादिभिः सम्बन्धिताः भवन्तिः।

एतासां संस्थानाम् उत्थानं पतनञ्च  तदीयकुशलप्रशासनस्योपरि अपेक्षते ।एवमेव विद्यालयरूपसंस्थाःस्वीय सकुशलं  प्रशासनेन शैक्षिकोत्तरदायित्वानि सम्यक् सम्पादयति । समुत्तमप्रशासनस्य कारणेन एकः विद्यालयःशीघ्रमेव समुन्नतिमावहति तथा च समाजस्य नागरिकाणाञ्च उपयोगाय प्रभवति ।एतद् वैपरित्येन अकुशलप्रशासनेन विद्यालये नैकाः  समस्याः उत्पद्यन्ते । तेन समाजस्य तथा छात्राणाम् आवश्यकताः पूरयितुमसमर्थः भवति । अतः समाजिकसङ्गठनरूपिणः विद्यालयस्य प्रगतये समुत्तमप्रशासनस्य  सात्यन्तम् आवश्यकं वरीवर्ति ।

**प्रशासनस्य अर्थः**

प्रशासनम् इत्यमुष्य शब्दस्य व्यवहारःAdministration इति आङ्गलपदेन चेक्रीयते ।पदमिदं लाटिन् भाषायाः ministerशब्दात् जनिं लेभे इति विदुषां मतं वर्तते एतस्य शब्दस्य अर्थः भवति यत् अपरेषां सेवा इति । एवमेव Administration इति शब्दस्य शाब्दिकार्थः भवति अन्येषां सेवाचरणम् इति । पर्शासनम् इति शब्दस्य संस्कृते व्युत्पत्तिः प्रकृष्टं शासनम् उत प्रकर्षेण शासनमिति वा ।

प्रयातः जनाः प्रशासनशब्दस्य अर्थं प्रबन्धनं व्यवस्थापनं वा तथा संगठनम् इत्यादिभिः पदैः वन्दन्तः सन्ति ।परं नैवात्र तथा स्यात् प्रशासनं तादृशी क्षमता वर्तते येन समाजिकशक्तीनां तथा विरोधीतत्त्वानाञ्च एकावयरूपेण समन्वयं सम्पाद्यते तथा च अमुया क्षमतया तानि तत्त्वानि ऐक्यबद्धतया सञ्चालितानि भवन्ति । व्यवस्थापनं तु तादृशकार्यकारीक्रियाकलापः वर्तते येन प्रशासकःप्रशासनीकनीतीनां क्रियान्वयेन समर्थः भवति । अन्यत् च संगठनमितीदं पदं ताभिः प्रवृत्तिभिः तत्त्वैर्वा सम्बन्धितं वर्तते यैः वाञ्छितोद्देश्यानां परिपूरणाय कस्याः अपि योजनायाः निर्माणं विधीयेत । कस्यापि संगठनस्य कस्याः अपि संस्थायार्वा सञ्चालनं प्रशासनेन चेक्रीयते ।

यद्यपि प्रशासनशब्दस्य परिभाषानिरूपणं कठिनायते तथापि सामान्यतया प्रशासनस्य कार्याणि व्यक्तिभिः साकं सम्बन्धस्थापनं तथा नैकेषु गतिविधिषु समन्वयस्थापनं विदधति ।

शैक्षिकशोधविश्वकोषे प्रशासनस्य एवं परिभाषा विहिता यत् प्रशासनं तादृशी एका प्रक्रिया या तु कर्मचारिणां प्रयत्नेषु समन्वयं स्थापयति तथा उपयुक्तसामग्रीणाम् उपयोगः मानवीय गुणानाम् अधिकप्रोत्साहनं लब्धं स्यात् इति । विद्यालयेषु एतस्य सम्बन्धःन केवलं बालकानां युवजनानां च विकासेन साकं विद्यते वरम् एतेन विद्यालयकार्यकर्तृणामपि विकासः सम्भवति । संक्षेपतः विद्यालयप्रशासनस्य कार्याणि विद्यालयस्य  नैकासां क्रियाणां सम्यक् सम्पादनं विदधति । येन छात्राणां  विद्यालयीयकार्यकर्तृणां तथा विद्यालयस्य च यथेष्टा प्रगतिः बोभूयते ।

शिक्षाप्रशासनस्य सम्बन्धे  नैकैः विद्वद्भिः नैकानि मतानि प्रत्यपादिषत । तदीयानि मतानि तत्परिभाषाञ्च सम्यक् विचारयामः यदस्माकं लाभाय स्यात् ।फ्रेच् हल् तथा डाड्स महोदयाभ्यां शिक्षाप्रशासनस्य परिभाषा एवं कृता

यत्  शैक्षणिक-धार्मिक तथा मानवसेवाविहितवतां सङ्गठनानां प्रशासनमिव  शिक्षाप्रशासनस्यापि स्वरूपं सार्वजनिकं भवति तथा एतल्लोकप्रशासनस्य समानत्वेन मन्येत ।

पिटनर महोदयानां मतानुसारं विद्यालये कार्यकर्तृणां चयनं नियुक्तिः तथा कार्याणां निर्धारणमेव विद्यालयप्रशासनं भवितुमर्हति । एतेन सम्बन्धिताः कर्मचारिणः छात्राः प्रबन्धमण्डलं तथा समितेः सदस्येषु समन्वयः तथा नेतृत्वं सम्पाद्यते । येन समुचिता तथा सक्षमशिक्षायाः व्यवस्थायै समुपयुक्तनीतीनां निर्माणं कार्यान्वयनं तथा उन्नयनं कर्तुं शक्यते ।

श्रीमतां मुखर्जी महोदयानां वाचा–  शिक्षाप्रशासनं शिक्षाप्रशासनसामग्रीभिः  मानवीयसम्बन्धानां व्यवस्थाभिरपि सम्बन्धितं  वर्तते ।अर्थात्  व्यक्तीनां सहयोगेन सम्यक्तया कार्यसम्पादनं भवति  प्रशासनम् ।प्रकृतपक्षे एतस्य सम्बन्धः मनुष्यैः सह अत्यधिकतया वर्तते अमानवीयसामर्गीभिश्च स्वल्पतया विद्यत इति ।

उपर्युक्तविवेचनानामाधारेण परिभाषणां सम्यक् परिशीलनेन च अस्माभिः वक्तुं शक्यते यत् शिक्षाप्रशासनं लोकप्रशासनमिव एका बहुदेशीया प्रक्रिया अस्ति यस्याः अन्तर्गते नीतिनिर्धारणं,योजनानिर्माणम् अथवा तेषां कार्यान्वयनं  तथा विद्यालयस्य नैकासां क्रियाणां एवं समन्वयनं  कर्तव्यं येन छात्राः कर्मचारिणः विद्यालयः समाज इत्येतेषाम् अधिकतया समुन्नतिः  विद्यत एवञ्च समाजस्य राज्यस्य च शिक्षासम्भन्धीयावस्यकतानां पूर्तिः बोभूयते ।

**प्रशासनस्य आवश्यकता**

विनाप्यावश्यकतां न हि समान्यानामपि जनानां कस्मिन्चित् कर्मणि प्रवर्तनमीक्षितं वर्तते ।अत अमुष्मिन्नपि प्रशासनकार्ये स्युः काश्चन आवश्यकता इति विचारयामः। प्रशासनाभावे नहि कस्यचिदपि कार्यस्य वाञ्छितलक्ष्यप्राप्तिः भवितुं शक्येत अथापि शिक्षायाः क्षेत्रमपि । समुपयुक्तप्रशासनस्य अभावेन न केवलं शिक्षायाः क्षेत्रे नैकाः आवश्यकताः बोभूयन्ते । ताश्च एवं स्यु

**शिक्षायाः प्रारम्भाय**

व्यवस्थापकः तथा प्रशासनकर्ता एव  किमपि कार्यं प्रारभते ।  शिक्षायाः क्षेत्रैः सम्बन्धितं प्रशासनमेव शिक्षायाः तथा विद्यालयानां संस्थापनं विकसनं च सम्पादयति । प्रशासनाभावेन न हि शिक्षायाःन वा शिक्षालयस्यापि प्रारम्भः भवितुमर्हति ।

**पथिरोधनिवारणाय**

प्रशासनमेका व्यवस्था भवति । यत्र प्रशासनं न वर्तते न तत्र व्यवस्थाः अपि । एवञ्च संस्थायाः प्रगतिपन्थानः रोधिताःभवन्ति, कार्याणि च सुचारुतया न सम्पाद्येरन् ।शिक्षायाः क्षेत्रेऽपि प्रशासनेन एव प्रगतिपथः रोधनमपाकर्तुं व्यवस्थाः संस्थापयितुं च शक्यन्ते ।

**समन्वयस्थापनाय**

शिक्षायाः क्षेत्रेषु नैकानि कार्याणि वर्तन्ते । एतेषां कार्याणां भारः भिन्नभिन्नव्यक्तिभ्यः प्रदीयते । एतेषु व्यक्तिषु समन्वयस्थापनाय प्रशासनस्य महती आवश्यकता  विद्यते । शिक्षायाः विद्यालयस्य वा क्षेत्रेषु विविधानां क्रियाणां विकासाय समन्वयस्थापनाय च प्रशासनमावश्यकं भवति ।

**शिक्षायाः प्रसाराय**

समुपयुक्तप्रशासनेन शिक्षायाः सम्यक् प्रचारः प्रसारश्च बोभूयेत । विना प्रशासनात् नहि शैक्षिकप्रसारः स्यात् । कथञ्चित् प्रसारः स्यात् चेदपि सः सन्तुलितःन स्यात् प्रजातन्त्रेऽस्मिन् युगे शिक्षायां सन्तुलनता परमावश्यकी विद्यते । समीचीना शिक्षा प्रशासनेन शैक्षिकक्षेत्रीयाः विषमताः अपसारिताःदूरीकृताश्च सन्ति । एवं धनी-दरिद्र,लिङ्गभेदः,जातिभेदादि,बाधकतत्त्वानि निराकृत्य शिक्षायै लोकतन्त्रीयस्वरूपप्रदानाय प्रशासनं प्रमावश्यकं भवति । समेषां समानावसरप्रदानाय यथोचितं शैक्षिकं प्रशासनं समादरणीयम् ।

**शैक्षिकादर्शानां रक्षणाय**

शिक्षायाः एकम् परमं कार्यं भवति यत् मानवस्य सन्तुलितविकाससम्पादनम् । परन्तु यदा कदा व्यक्तिः व्यक्तिसमूहे वा स्वार्थपीडितः स्वीयस्वार्थपूर्त्तये शिक्षामेव अस्त्रत्वेन व्यवहरति , यथा विविधधर्मावलम्बिनः स्वीयधर्मः प्रचाराय प्रसाराय च शिक्षामेव माध्यमत्वेन अङ्गीकुर्वन्ति ,तथैव राजनेतृभिरपि स्वीयराजनैतिकविचारधाराणां प्रचाराय अस्याः साधनत्वमङ्गीकृतं दृश्यते । एवं कार्यान्तरैः शिक्षायाः आदर्शाःलुप्तप्रायः अन्ततः वर्तन्ते । अतः विलुप्तमानानां शैक्षिकादर्शानां प्रगतये शैक्षिकप्रशासनस्य समधिकं महत्वं न कैश्चिदप्यनङ्गीक्रियते ।

**साधनानां व्यवस्थीकरणम्**

शिक्षायाः तथा शिक्षालयानां सञ्चालनाय नैकानि मानवीय-भैतिकसाधनानि आवश्यकानि भवन्ति कार्यकर्ता,भवनं,वित्तं,पुस्तकादीनां साधनानाम् एकत्रीकरणमावश्यकं भवति । एवमेव तेषां सदुपयोगस्य समुचितं व्यवस्थापनम् आवश्यकम् । अतः एतेषां कार्यावलीनां यथायथं सम्पादनाय शिक्षाप्रशासनं सात्यन्तं प्रयोजनभूतं वर्तते इति निस्सन्देहं वक्तुं शक्यते ।

**शिक्षायाः विकाससम्पादनाय**

न केवलं शिक्षायाः शिक्षालयानां शिक्षासंस्थानां वा व्यवस्थापनाय अपि तु एतेषां यथायथं विकासाय समुचितप्रगतये च प्रशासनमत्यन्तमावश्यकं समुचितप्रशासनेन शिक्षायाः आदर्शं स्वरूपं संरक्ष्येत एवञ्च अनेन विद्यालयस्वीयादर्शरूपं प्राप्नूयात् । शिक्षासंस्थासु कार्यरतान् शिक्षकान् कर्मचारिणःबालकान् च सर्वान् व्यवस्थिततया स्वीयकर्मसु निरताय समुत्तमशैक्षिकप्रशासनमेव अर्हं भवति । एतद्दृष्ट्या सम्यक् शैक्षिकप्रशासनस्यैव अत्यन्तमावश्यकं भवति ।

**सम्यक् सञ्चालनाय**

शिक्षणसंस्थासु शिक्षकः अभिभावकःभवनं वित्तं पुस्तकालयः क्रीडाङ्गणम् उपकरणं परीक्षणम् इत्यादयः नैके कार्यक्रमाः प्रचलन्ति । एतेषु क्षेत्रेषु अपव्ययस्य न्यूनीकरणम् आवश्यकम् । यावत्कुलेन एतेषां व्यवस्था न क्रियते तावद्धि अत्र भूयमानाः अपव्ययाःन्यूनाः न संजायेरन् । तेन एतेषाम् उपयोगः अपि वरीवर्द्धिस्यते । एवं विचारचर्च्यायां शिक्षाप्रशासनस्य सात्यन्तमावसश्यकं विद्वद्दृष्टिपथारूढं भवत्येव ।

**शिक्षाप्रशासनस्योद्देश्यानि**

समाजशिक्षायाःव्यवस्था स्वीयसंस्कृतेः संरक्षणाय हस्तान्तरणाय सम्यगुन्नयनाय च करिष्यते । शिक्षायाः एतदेव लक्ष्यं तथा उद्देश्यं भवति । उपयुक्तप्रशासनेन शिक्षायाः एतानि उद्देश्यानि प्राप्तुं सहायता लभ्यते । एवं शिक्षाप्रशासनस्य उद्देश्यानि शिक्षायाः उद्देशेभ्यः न पृथग्भूताः भवन्ति । शिक्षाप्रशासनं तथा शिक्षा अनयोरुभयोरपि समानोद्देश्यानि भवन्ति । यथा बालकस्य सर्वाङ्गीणविकासः समाजस्य यथावश्यकं संस्कृतेःहस्तान्तरीकरणञ्च शिक्षाप्रशासनस्य उद्देश्यानां चर्चायाः सन्दर्भे सारग्राहम् बाल्कोर महोदयेन व्यलेखि यत् शिक्षाप्रशासनस्य उद्देश्यम् उत्तमछात्रैः उत्तमाध्यापकेभ्यः समीचीनशिक्षायाः अङ्गीकरणं येन राज्यस्य साधनानाम् अनुकूलनं स्यात् तथा बालकः स्वयं स्वकीय-अधिगमार्थं यथासम्भवं समर्थो भवेत् ।

*****

# Behavior Management Strategy in Class Room - An Overview

**Dr. K.K. HARSHAKUMAR,**
Associate Professor

**Introduction**

Education is the process of interaction aimed at the all-round development of individuals, providing the necessary tools and knowledge to understand and participate in day to day activities of today's world. Teaching is central to education and teacher is pivot of the whole educational system. We cannot educate without teaching. It is more than standing before a class and applying a few specific techniques or strategies. It is not a mechanical process. It is an intricate, exciting, challenging job. So able teachers always find ways and means as they improve their teaching techniques. With the change in time the teachers are ask to employ newer methods, techniques and strategies of teaching in which students get the greatest opportunity to develop his thinking and reasoning ability along with active participation and interest in teaching learning process. Behavior Management strategy is an important among them.

**Behaviour Management**

Behaviour Management is an important strategy within the classroom. It is not just about punishing undesired behaviour or even rewarding desired behavior of pupils. Rather it is about having strategies in place to assist students to behave in ways that help them gain the most from their schooling. It includes creating a positive environment for teaching- learning process and uses strategies that encourage positive behaviour of pupils in the schools. Oxley (2015) considers that building positive learning relationships and intrinsically motivating children to learn are important for effective behaviour management.

Here 'Intrinsically' is important as it is about children being motivated for reasons inside the person, such as for enjoyment, or because it makes them feel better about themselves not externally.

The subject of Behavior Management has been divided into three topics:

- Child reactions - the forms of behaviour children might present within a school setting and the reasons why they might behave in certain ways.
- Managing a class – it includes different approaches to managing children's behaviour.

- Identifying behavioural issues - focuses on how mental health issues may affect a child's behaviour.

**Principles of Behavior Management**

There are six principles identified by Ron Walker

1. Negative consequences sometimes change behavior, but they do not change attitude.
2. Only positive reinforcement strategies produce long-term attitudinal change which essential for learning.
3. Negative consequences do not enhance the behavior of impulsive children and frequently increase the frequency and intensity of misbehavior.
4. Cognitive control of behavior can be learned through the use of appropriate positive reinforcement systems.
5. Positive reinforcement systems must be incremental in nature such that the child can directly observe even small improvements in behavior.
6. We must always reinforce the final compliance with adult authority no matter how long it takes to get there.

**The role of teacher in Behavioral Management**

According to Tom Bennett the things every teacher should be doing to ensure order in the classroom.

- Have a seating plan.
- Don't assume how students behave.
- Be fair, consistent and proportionate.
- Should Know pupils' names.
- Necessary Follow up for students activities.
- Don't walk alone – use the line management if necessary.
- Don't freak out.
- Get the parents involved.
- Be prepared and organised for lessons.
- Be the teacher, not their chum.

There are six suitable and effective behavior management strategies for remaining calm and professional during challenging situations.

- Be Mindful of our Own Reaction.
- Maintain Rational Detachment.
- Be Attentive.
- Use Positive Self-Talk
- Recognize our Limits.
- Debrief.

**Conclusion**

Now a day's our education system is more dominated in occurring information. The competencies and values expected to be generated through learning of subject are not achieved to a satisfactory level. In such a curriculum strategy for quality education in our society need a new outlook. Behaviour management is an important in the teaching learning process, not least because it creates an appropriate environment for learning to take place. If there are clear boundaries then children are enabled to develop positive behaviour, such as respect, towards each other. Behaviour management also supports learning in a safe and calm environment.

**Reference**

Oxley, L. (2015) 'New voices: do schools need lessons on motivation?', *The Psychologist*, vol. 28, pp. 722–23 . http://thepsychologist.bps.org.uk/ volume-28/ september-2015/ new-voices-do-schools-need-lessons-motivation.
https://www.tes.com/news/new-behaviour-tsar-tom-bennetts-top-ten-tips-maintaining-classroom-discipline.
https://education.wm.edu/centers/ttac/resources/articles/challengebehav/sixprinciplebehav/index.php.

# Mobile Applications for Teachers

**Dr K. GIRIDHARA RAO**
Assistant Professor in Edn.,

Teachers are responsible for the education of our young ones. They often don't get all the tools they need to be successful. Thankfully, technology can help a little bit. There are apps around now that can make some of the process a little easier. Today technology allows teachers and students to connect like never before from anywhere in the world, and a number of these mobile applications play an important role in remote learning. Some of them help keep track of student grades and things like attendance. Others let you communicate better with both kids and parents. Some are just flat educational and fun. If you are looking to keep your classroom connected when your students are at home, then check out these great apps.

**Google Classroom :-** Google Classroom is a free web service, developed by Google for schools, that aims to simplify creating, distributing, and grading assignments in a paperless way. The primary purpose of Google Classroom is to streamline the process of sharing files between teachers and students. If your school already uses the G Suite for Education, chances are you already know about Classroom.

Google Classroom combines Google Drive for assignment creation and distribution, Google Docs, Sheets and Slides for writing, Gmail for communication, and Google Calendar for scheduling. Students can be invited to join a class through a private code, or automatically imported from a school domain. Each class creates a separate folder in the respective user's Drive, where the student can submit work to be graded by a teacher. Mobile apps, available for ios and Android devices, let users take photos and attach to assignments, share files from other apps, and access information offline. Teachers can monitor the progress for each student, and after being graded, teachers can return work along with comments.

**Classtree :-** Classtree is a web and mobile app that lets teachers communicate with students and their parents or they can share a class code with parents and students, who can then create their own accounts and log on. Teachers can use the app to send direct messages to individual students and parents. Unlike Remind, which simply notifies parents of the logistics of an upcoming field trip, Classtree actually lets you attach a consent form for parents to e-sign to go along with the announcement. The app lets you add optional questions, facilitates urgent queries, and manages comments from parents. The app even shows you exactly who has seen your note and who owes you a signed form.

**Remind :-** Remind is a communication platform that helps every student succeed. Whether you're in the classroom, at home, or anywhere in between, Remind makes it easy to stay connected to your school community.

Remind makes it easy for teachers to communicate with students and their parents in real-time outside of the classroom. You can make class announcements, initiate group chats,

or contact people privately through the app. Your messages, which can contain files, images and links, can even be translated into more than 86 languages, making it possible to communicate with parents who are non-native English speakers.

**Edmodo :-** Edmodo is another virtual classroom app but this one goes the whole nine yards. Using it, you can create a virtual classroom where students can post and turn in assignments, collaborate with teachers (and parents can be included too), track progress, and everyone can upload files, photos, and videos. There is also a built-in grade book. There are also features to help parents, teachers, and students communicate better. Like ClassDojo, it's entirely free to use. It's definitely one of the best teacher apps.

**Zoom :-** Zoom has undoubtedly become the best app and communication centre with so many more people currently working, studying, or simply hanging out at home. It has been the silver lining connecting to parents, friends, family, and students and teachers. If you have not jumped on the bandwagon, consider doing so now.

Zoom is a web-based video conferencing tool with a local, desktop client and a mobile app that allows users to meet online, with or without video. Zoom users can choose to record sessions, collaborate on projects, and share or annotate on one another's screens, all with one easy-to-use platform. Zoom offers quality video, audio, and a wireless screen-sharing performance across systems.

Zoom is a powerful cloud video conferencing platform that allows you to host meetings with hundreds of participants. Using Zoom, educators can share lesson plans, give instruction, swap files with students and communicate directly with the group or individuals via chat, all within the app. The free version of the app supports unlimited 1-to-1 meetings and a 40 minute time limit on group meetings.

**Kahoot :-** Kahoot! Is a game-based learning platform, used as educational technology in schools and other educational institutions. Its learning games, "Kahoots", are user-generated multiple-choice quizzes that can be accessed via a web browser or the Kahoot app. Kahoot! Can be used to review students' knowledge, for formative assessment or as a break from traditional classroom activities. Kahoot! Also includes trivia quizzes.

Kahoot love to turn a boring lesson into a game to motivate their students, but not everyone has the skills to make a game from scratch. Thankfully, the Kahoot website makes it easy to turn your class into a game show. All you have to do is enter your prepared questions and answers into the site to create an instantly playable game. Your students can then download the Kahoot app to use as buzzer to join in on the fun. Start off with simple tasks on your home screen and view your key stats in your profile area.

A Kahoot quiz is a series of questions with between two to four multiple-choice answers to choose from. Teachers can create their own quizzes, duplicate and edit others created and shared by other teachers, or simply play Kahoots created by other users. You can add engaging images to your quiz questions. According to the company, you can have up to 4,000 players at once! So, you could use Kahoot during an online seminar or with an auditorium full of people. (As long as the network can handle it.) You can create a free account by signing up at Kahoot.com.

Kahoot! Was designed for social learning, with learners gathered around a common screen such as an interactive whiteboard, projector or a computer monitor. The site can also be used through screen-sharing tools such as Skype, or Google Hangouts. The game design is such that the players are required to frequently look up from their devices. The gameplay is simple; all players connect using a generated game PIN shown on the common screen, and use a device to answer questions created by a teacher. These questions can be changed to award points. Points then show up on the leader board after each question. Kahoot! Can be played through different web browsers and mobile devices through its web interface.

**Seesaw :-** Seesaw is a platform for student engagement that inspires students of all ages to do their best, and saves teachers time! Students use creative tools to take pictures, draw, record videos and more to capture learning in a portfolio. Teachers find or create activities to share with students.

Parents want to celebrate their children's achievements every step of the way. So, it is important to keep them in the loop on their kids progress throughout the school year. With Seesaw, a student portfolio app, kids can store and post their best work to share with their parents. Teachers on the other hand can provide concrete examples of their students strengths and areas of improvement to their parents during Teacher-Parent meetings. Improvements to activities make it a cinch to share activities with your classes, copy voice instructions, and find other teacher-contributed activities in the library.

**Trello :-** Group projects can be difficult when everyone is operating on a different schedule and page. A Trello board is a list of lists, filled with cards, used by you and your team. It's a lot more than that, though. Trello has everything you need to organize projects of any size. Open a card and you can add comments, upload file attachments, create checklists, add labels and due dates, and more.

Fortunately, Trello lets students stay organised to keep them on task. The app allows them to create checklists, upload images, and assign tasks to other users among other actions, while conveniently syncing content across devices via the cloud. Content is displayed within a card peppered interface, with options to easily delete tasks once completed. You can add outside elements like photos or links, directly to Trello, for immediate viewing. The app honours your last card so that when returning to the app, you will get right back to the last board or card you were viewing.

Trello is mainly a free service that lets users work with an unlimited number of boards, lists and cards. Free users can add one Power-Up per board. There are no restrictions on the number of people users can collaborate with through the free version of Trello.

**Additio :-** There is a better way of keeping attendance, grades, and class notes than in easily misplaced notebooks or on random pieces of paper. As a digital grade book and classroom management app, Additio lets you take attendance, calculate grades, and plan your timetable, all on your mobile device.

Assign the activities to standards, weigh, apply conditional, means and create customized reports or evaluation targets. Calculate all types of means, apply rounding or use the function to overwrite formula for attention to diversity. Add custom comments, link resources and create your own mark types.

All you can imagine with rubrics. Add self and peer assessment to your methodologies at a glance. Create, edit, duplicate or export or print rubrics to PDF. Link your rubrics' row to standards and skills and much more. Enjoy Edrubrics, a library with thousands of rubrics by subject, topic and grade.

Create the didactic units and sessions. Edit the template in person, link programming with resources, copy and paste easily. Export planning to PDF when you have inspections and have everything under control.

Recent versions incorporate a new system to calculate averages based on categories and subcategories. For additional features like performance analytics and note keeping, you need to opt for the plus edition.

**Class Dojo :-** Class Dojo is an educational technology communication app and website. It connects primary school teachers, students and families through communication features, such as a feed for photos and videos from the school day, and messaging that can be translated into more than 35 languages and has been used in 180 countries.

Class Dojo is an online behaviour management system intended to foster positive student behaviours and classroom culture. Students earn 'Dojo Points' based on their classroom conduct. Teachers use Class Dojo to keep parents up to date on student progress and classroom happenings.

Make random groups of students. Display activity directions. Turn on background music. And there’s so much more to come with Class Dojo Toolkit. Students can showcase their learning by adding photos and videos to their own digital portfolios. Available on Chromebooks, iPads, and any computer. Teachers, school leaders, and families can partner on ClassDojo and create an incredible school community. Class Dojo is completely free for users.

**Evernote :-** Evernote is indispensable note taking app that helps teachers eliminate printed handouts for outside-the-classroom learning. You can share projects and assignments with students using shared notebooks. Parents can view completed assignments on its website, too. Since shared assignments stay online, Evernote establishes a sense of transparency between students, teachers and parents.

**Dropbox :-** This application is terrific in nature as this allows the teachers to upload the presentation photos, videos, assignments and the students can have an easy access to the materials in the classroom or at their homes. With the help of this app, the teachers can edit as well as create Microsoft Office files in their smart phones and the file links can be shared with the students without flooding their inbox with massive files.

Microsoft Office 365 :- Microsoft Office is literally the only office suite that can compete with Google Drive on this level. Much like Google Drive, Microsoft Office consists of a cloud storage service (OneDrive) along with Word, Spreadsheet, and Powerpoint. The big draw here is that many universities, schools, and such not only use Microsoft Office on PC, but also give it away to students at the university level (Microsoft Office for Students). This allows for a consistent experience across all platforms and offers most of the benefits of Google Drive. The only downside is that it's heavy software with a complicated pricing structure.

**Conclusion :-** As we forge ahead in the era of technology, we can see how the next generation of young demographics interact with the digital resources to make their life better and easier. There is no denial that mobile apps are the future and add power to teachers and educators in tomorrow's economic and social culture.

**References :-**


- en.wikipedia .org/wiki/Google Classroom
- en.wikipedia.org/wiki/Remind
- www. Classtree.co
- Kahoot.com
- Web.seesaw.me
- Zoom.us
- Trello.com
- Additioapp.com
- Classdojo.com


*****

# संस्कृतशिक्षणकक्ष्यायां श्रुतिपरम्परा

## (भाषणपठनपाठनवाचनोच्चारणसस्वरवाचनकौशलदिशा)

डा.डि. वेणगोपाल रावः
प्राध्यापकः, शिक्षाशास्त्रविभागः

**श्रुतिपरम्परायां वाग्व्यारः –**

वाग्वै सरस्वती (ऐ.ब्रा.८.६), वाग्वै विराट् (श.प.ना.३.५.१.३४), वागेव सरस्वती (तै.ब्रा.१.३.४), या सा वागसौ स आदित्य:(श.प.ना.१०.४.४), वागिति धौः, वाग्वै वायुः, वाग्वै समुद्रः, न वै वाक् क्षीयते, न समुद्रः क्षीयते, वाग् वा इन्द्रः, वाग्वै मतिः, वाचा हीदं सर्वं मनुते, वागिति पृथिवी, वागेवाग्निः, वागिति मनः इत्याद्यनेकानि श्रुत्युक्तानि वचांसि साहित्ये तथा मानवजीवने अक्षरव्यापारस्य श्रेष्ठतां द्योतयन्ति। अत: विश्वस्मिन् विश्वे समेषां जीवजालादीनां कृते आश्रयः वागेवेति कथ्यते । यथा -

**वाचं देवा उपजीवन्ति विश्वे, वाचं गन्धर्वा पशवो मनुष्याः।**

**वाचामी विश्वा भुवनान्यर्पिता, स नो हवं जुषतामिनन्द्रपत्नी।। (तै.ब्रा.२.८.८)**

**वाङ्मयानीह शास्त्राणि वानिष्ठा च तथैव च।**

**तस्माद्वचः परं नास्ति वाग्धि सर्वस्य कारणम्।। (ना.शि.१४.३) तथैव**

**देतत्तुरीयं वाचोऽनिरुक्तं यन्मनुष्या वदन्ति । अथैतत्तुरीयं वाचोऽनरुक्तं यत्पशवो वदन्ति।।**

**अथैतत्तुरीयं वाचोऽनिरुक्तं यद् वयांसि वदन्ति। अथैत्तुरीयं वाचोऽनिरुक्तं यदिदं क्षुद्रसरीसृपं वदति।।**

वाचा एव मानवः स्वाभिप्रायं सुस्पष्टमभिव्यक्तीकर्तुं शक्नोति नान्यथा इति सर्वसम्मतविषय एव। तस्मादेव वैदिकलौकिकात्मिके सम्पर्णसंस्कृतसाहित्ये वाग्विचार: त्रैकालिकः दृश्यते। मानवस्य प्रत्येकं कर्मणि वाग्रूपौ शब्दार्थौ द्वावपि तस्यौचित्यं तथा तक्रियाशीलतां च द्योतयतः। अत एव कथ्यते **एकः शब्दः सम्यग्ज्ञात: सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुक् भवतीति।** वाग्रूपाणां वर्णानां शब्दानां वाक्यानां वा कुप्रयोगात् वैदिके लौकिके वा सर्वत्र मानवस्य दुर्गतिरेव भवति। अत: कथ्यते हि –

**मन्त्रो हीन स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्।।**

**यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।**

**श्वजनः श्वजनो माऽभूत् सकलं शकलं सकृच्छकृत्।। इति।**

अस्मात्कारणात् वाग्रूपायाः अस्याः श्रुतिपरमम्पारायाः शिक्षाप्रक्रियां संस्कृतशिक्षणे सर्वैरनुसरणीया ज्ञातव्येति कथ्यते। सन्दर्भेऽस्मिन् संस्कृताध्यापकैः तथा संस्कृतच्छात्राध्यापकैश्च प्रशिक्षणावसरे वाग्रूपाणाम् अर्थात् भाषणपठनपाठनवाचनोच्चारणसस्वरवाचनकौशलानां विकासाय श्रुत्युक्तरीत्या के के उपाया: अनुसरणीया इत्यत्र तर्क्यते।

**वाग्व्यापारस्य मानवशरीरस्य च सम्बन्धः -** सृष्ट्युत्पत्तिप्रक्रियायां मानवकल्पनाप्रकृतिरेव तदितरप्राणिभ्यः

काचित् औचित्यपूर्णा दृश्यते। मनावेतरजीवानां शारीरकमानसिकभावाः सर्वे जगति अशीतिः प्रतिशतं स्थिरा:, शाश्वताः, परिवर्तनायोग्याः एव । तथापि ते जीवाः सर्वेऽपि स्वचोष्टाभिः, प्राकृतिकशक्त्या च ईषदौचित्यरूपेण जीवनं यापयन्ति। यथा एते जीवा तथैव मानवोऽपि। परन्तु तेभ्यः मानवः पार्थक्येन गण्यमानो वर्तते तस्य वाग्बुद्धिमनोवैचित्र्यादिति विदित एव विषयः। तत्रापि बद्धेः. मनसश्चापेक्षया प्रत्यक्षरूपेण सदेव मानवः स्वीयवाग्व्यापारेण सर्वानधितिष्ठति। अत: कथ्यते हि - **तस्माद्वचः परं नास्ति वाग्धि सर्वस्य कारणम्** इति। अतः अयं मानवः उत्तमवाग्व्यापारेण स्वीयमात्मानं सर्वमपि संस्कर्तुमर्हतीति वैदिकाः कथयन्ति। कथं वाचेति कथनानवसरे कथ्यते हि -

**यां मध्यमां वाचा शंसति, आत्मानमेव तत् संस्कुरुते। .... (ऐतरेयब्राह्मणे)**

**अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्। प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते। वा.प.१.१३०.**

**आत्मा बुद्ध्या समोत्यर्थान् मनो युङ्क्ते विवक्षया। मन: कायाग्निमाहन्ति स प्रेरयति मारुतम्।।**
**मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्। प्रातः सवनयोगं तं छन्दोगायत्रमाश्रितम्।।**
**कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्ठभानुगम्। तारं तार्तीयसवनं शीर्षण्यं जागतानुगम्।।**
**सोदीर्णे मूर्ध्न्यिभिहतो वक्त्रमापाद्य मारुतः। वर्णान् जनयते तेषां विभाग: पञ्चधा स्मृतः।।**
**स्वरत: कालत: स्थानात्प्रयतनानुप्रदानतः। इति वर्णविदः प्राहुः निपुणं तं निबोधत।। इति।**

अनेन मानववाग्व्यापारे आत्मनः, मनसः, ज्ञानेन्द्रियाणां, कर्मेन्द्रियाणां तथा बाह्याभ्यन्तराणां समेषामव्ययानां क्रियाशीलता प्राचीनैः सप्रमाणं सैद्धान्तकरूपेण प्रोयोगिकरूपेण च उपनिषद्ब्राह्मण-शिक्षाग्रन्थेषु स्पष्टीकतं वर्तते। शरीरकरूपेण, मानसिकरूपेण, सामाजिकरूपेण च मानवं संस्करोतीति कारणादेवास्याः भाषायाः नाम संस्कृतमिति प्राच्याः । अत एव शिशोः स्वास्थ्यं मनसि निधायैव औपचारिकवाग्व्यापारनियमानाश्रत्यैव प्राचीनभारते शिक्षाव्यवस्था सर्वापि समाति‍ा प्रदत्तेति च कथने नातिशयोक्तिः। वेदपारायणं, मन्त्रपाठः स्तोत्रस्तुतिः, काव्यपठनमिति आद्यन्तं यावत् संस्कृतसाहित्यकाराः वाच्छरीरयोः सत्सम्बन्धं प्राहुः । **काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षये इति लाक्षणिकोक्तिरप्यत्र अनयोः सम्बन्धं द्विगुणीकरोति।**

**पठनादि वाचनकौशलेषु साम्प्रतिकशिक्षणप्रक्रिया -**

श्रवणं, भाषणं, पठनं, लेखनमिति चतुर्विधशिक्षणकौशलानि अथवा भाषाशिक्षणकौशलानि समस्तशिक्षापरम्परासु छात्रप्रगत्यै अनिवार्याणि एव। अतः सम्पूर्णविश्वे शिक्षारम्भे एव चतुर्विधकौशलाधारितशिक्षणे चर्चा दृग्गोचरा वरीवर्ति। श्रवणं तथा पठनमिति कौशले द्वेऽपि भावग्रहणे, भाषणं तथा लेखनमिति कौशले द्वेऽपि भावव्यक्तीकरणे च प्रमुखे। प्रत्येकं बालकाय तज्जीवनशैक्षिकलक्ष्यं तत्तद्बालकाभिभावकगुरुरादीनां वैयक्तिकञ्चेदपि शैक्षिकजीवनारम्भे तु निश्चितमेवामीषां चतुर्विधानां शिक्षणकौशलानां भाषाकौशलानां वा विषये शिक्षणमनिवार्यं भवत्येव। मानवः कश्चन क्रियाशीलः अत्यत्र तस्य काचित् मानसिकी शारीरकी वा प्रक्रिया अनिवार्यैव। तथैव मानसिकशारीरकरूपेण क्रियाशीलस्य तथा विचक्षणशीलस्यास्य मानवस्य वागेव तस्याद्वितीयत्वं इतरप्राणिभ्य तमुन्नतस्थाने स्थापयति। मानसिकं शारीरकं वा भावं मानवः अर्थसहितशब्दमाध्यमेन, संवेगसहितसङ्केतचेष्टामाध्यमेन वा सर्वत्र प्रदर्शयति। तथैव -

**लौकिकानां हि साधूनामर्थं वागनुवर्तते। ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति।। इति।**

इमानि चत्वारि कौशलानि न केवलं छात्रजीवने अपि च जीवनान्तं मानवाय अनिवार्याणि एव। आक्षराणां सुस्पष्टप्रकृत्याकारस्वरूपोच्चारणज्ञानं विना मानवस्य इमानि चत्वारि कौशलानि निरर्थकानि एव भवन्ति।

इत्थं मौलिकेषु एतेषु परम्परागतप्रक्रियां दीरीकृत्य शैक्षिकास्सर्वे निष्क्रियाशीलासन्तः साङ्केतिकतामुपयुज्य स्वीयशैक्षिककार्याणि सम्पादयन्ति। सुष्पष्टतया भाषितुं, पठितुं, श्रावयितुं, वाचयितुञ्च कक्ष्याप्रकोष्ठेषु नतमस्तकाः सञ्जायन्ते। एतस्मात्कारणात् प्रशिक्षणमिति नाम्ना नैकप्रकारकशिक्षासंस्थाश्च सर्वकारेण सञ्चाल्यन्ते च। सन्दर्भेऽस्मिन् भाषणं, वाचनं, पठनम्, उच्चारणं, वाचनमित्यादिषु कौशलेष्वादितः एव काचित् निर्दिष्टा परम्परा अनुसरणीयेति वैदिकशिक्षातत्त्वज्ञाः।

**श्रुतिपरम्परायां शिक्षानीतिः तथा मनोवैज्ञानिकपद्धति: यथा -**

**मानसे चाणवं विद्यात्कण्ठे विद्यात् द्विराणवम्। त्रिराणवं तु जिह्वाग्रे निसृतं मात्रिकं विदुः।।**

**उदात्तं तु भुवः प्रान्ते प्रचयं नासिकाग्रतः। हृत्प्रदेशेऽनुदात्तं तु तिर्यग् जात्यादिरीरितः।।**

इति शारीरिक मानसिकं चेत्युभयं कर्म भाषाकौशलाध्ययने दृढं निश्चितं, प्रमाणितं च स्यादिति आरम्भे एवोवाच। आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया इति पाणिनीयशिक्षोक्तदिशापि याज्ञवल्क्यः अक्षराणामुच्चारणे मनसः प्राधान्यं स्वीचकार। मात्रात: वर्णानां, संहितानां, सन्ध्यादीनां च प्रयोगे काचित् मानसिकप्रक्रिया शरीरस्यान्ते भवतीति, तदनु शारीरिकप्रक्रिया च विधेया इति कथ्यते यथा -

**ऋचोऽर्धे तु द्विमात्र: स्यात्त्रिमात्र: स्यादृगन्तके। रिक्तन्तु पाणिमुत्क्षिप्य द्वे मात्रे धारयेनुधः।।**

**विवृत्तौ चावसाने च ऋचोऽर्धे च तथा परे। पदे च पादसंस्थाने शून्यहस्तं विधीयते।।**

**एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चाऽऽर्धमात्रिकम्।।**

**सममुच्चारयेद्वर्णान् हस्तेन च मुखेन च। स्वरश्चैव तु हस्तश्च द्वावेतौ युगपत् स्थितौ ।।**

**हस्तभष्टः स्वरभ्रष्टो न वेदफलमश्नुते। . . . इत्यादयः बहवः श्लोकाः।**

इत्थं शिक्षारम्भे एव गुरुशिष्ययोः **भाषणपठनपाठनवाचनोच्चारणसस्वरवाचनकौशलेषु नियता** शारीरिकमानसिकस्थितिः भवेदिति उदाहरति याज्ञवल्क्यः। **भाषणपठनपाठनवाचनोच्चारणसस्वरवाचन-**शिक्षावसरे मानसिकञ्चानुसृत्य शारीरिकाङ्गसंनिवेशस्य प्रामुख्यमतिशयेन स्वीकरोति याज्ञवल्क्यः । यथा -

**एतत्सर्वं समाख्यातं याज्ञवल्क्येन धीमता। हस्तौ सुसंयतौ धार्यौ जानुनोरुपरि स्थितौ।।**

**गुरोरनुमतिं कुर्यात् पठन्नाऽन्यमतिर्भवेत्। ऊरुभागे तृतीये तु कूर्परं न्यस्य दक्षिणम्।।**

**सुप्रसन्नमनसाः भूत्वा किञ्चिन्नम्रस्त्वधोमुधः । निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत्।।**

**आत्मसाक्षात्कारः एव शिक्षा, स्वस्थ शरीरे स्वस्थं मनः**, इति शिक्षायाः,मनोविज्ञानस्य च प्राच्यपाश्चात्यपरिभाषा: यावत्य: शिक्षा विशदयन्ति तासां सर्वासां सैद्धान्तिकप्रायोगिकपक्ष: सम्पूर्णतया श्रुतिपरम्परायां शिक्षाग्रन्थेषु निरूपितः। शारीरिक स्वास्थ्यं विना मानसिकस्वास्थ्यं न सम्भवं, तदनु मानसिकं विना शारीरिकं न योग्यमेव इति ज्ञात्वैव युगपदुभयोः मेलनेन छात्राः निर्मेयः इति याज्ञवल्क्यः। **योगः कर्मसु कौशलम्, अभ्यासवैराग्याभ्यां तन्निरोधः, तत्र स्थिता यत्नोभ्यासः, स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः** इति नैकानि शिक्षणप्रशिक्षणाभ्यासाधिगमविचारेषु यं सिद्धान्तं प्रतिपादयन्ति तथैवात्रापि **आगमं कुरु यत्नेन कारणं हि तदात्मकम्** इति याज्ञवल्क्योऽपि।

प्रचीनशिक्षाद्धत्यां गुरुरेव प्रमुखः, श्रेष्ठः, प्रधानश्च। तथापि प्रत्येकं श्रुतिसाहित्ये गुरोरङ्गभूतत्वेनैव शिष्यः निरूपित: पोषितश्च। वटुः, छात्रः,शिष्यः, अन्तेवासी, सुतीर्थः इत्येतेषां शब्दानां प्रयोगः छात्रविषये सम्पूर्णे वैदिकसाहित्ये लौकिकसाहित्ये वा कृतः दृश्यते। भारतीयः छात्रः अधिगन्ता वा शैक्षिकारम्भकालात्

शैक्षिककालान्तं यावत् पोषितः, पालितः, शिक्षितश्चेतीति विदितमेव। तत्र अक्षराभ्याससमये एव शारीरिक मानसिकं च गणयित्वा **भाषणपठनपाठनवाचनोच्चारणसस्वरवाचनपूर्वक**शिक्षाप्रदाने गुरवः क्रमिकपद्धतिम् अवलम्बन्ति स्म । यथा -

**हस्तभ्रष्टो स्वरभ्रष्टो न वेदफलमश्नुते। न करालो न लम्बोष्टो नाऽऽव्यक्तो नाऽऽनुनासिकः।।**

**गद्गदो बद्धजिह्वश्च न वर्णान् वक्तुमर्हति। प्रकृतिर्यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ।।**

**प्रगल्भश्च विनीतश्च स वर्णान् वक्तुमर्हति । शङ्कितं . . . ।**

**त्रिफलां लवणाक्तां वै भक्षयेच्छिष्यकः सदा। क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा।।**

**हस्तहीनं तु योऽधीते मन्त्रं वेदविदो विदुः। न साधयेद्याजुषाणि भुक्तमव्यञ्जनं यथा।।**

इत्थं शास्त्रोक्तरीत्या अध्ययनासमर्थः यः भवति तस्य तु तद्योग्यताप्राप्तेः यावत् अध्ययने प्रवेशः न भवतीति कथ्यते। अतः शैशवे एवाक्षरारम्भे छात्रं स्वस्थं कृत्वा अग्रेसराः भवन्ति स्म गुरवः। अमीषां श्रुतिवाक्यानां निशितपरिशीलनेन भारतीयशिक्षापरम्परायाम् श्रवणभाषणपाठनात्मकमौलिकसंज्ञानात्मकः अधिगमस्तरः तावत् प्रमुखः आद्यः स्तर इति ज्ञायते। पश्चात् विशेषरूपेण विषयस्य शिक्षणं तदनु विषयाधिगमे अधिगन्ता यतेत इति अवगम्यते। सम्प्रति शिक्षाप्रक्रियायाम, अधिगमप्रक्रियायां वा अधिगन्तुः छात्रस्य च युगपदेकवारमेव द्वयोः - शारीरिकमानसिकविकासकौशलयोः प्रयोगपद्धतिः न दृश्यते। अतः छात्रः छात्रत्वमेवाप्य बहुकालं तथैव व्यवह्रियते नाधिगन्ता इति। शिक्षणे, प्रशिक्षणे, भाषणे, पठने, वाचने, उच्चारणे, कथने, श्रवणे, अनुवाचने, लेखने तथैव शैक्षिकेषु नैकविधकौशलेषु शारीरकमानसिकचेष्टां समाचरेदधिगन्तेति याज्ञवल्क्यः ।

**भाषाकौशलाधिगमप्रक्रिया** - मानवजीवने शिक्षका आजीवनप्रक्रिया अनिवार्या च विद्यते। यथा शिक्षानिवार्या, आजीवनप्रक्रिया च तथैव अधिगमप्रक्रियापि। एकमिखी, द्विमुखी, त्रिमुखी, बहुमुखी चेति प्राचीनादध्यावधि शिक्षायाः प्रक्रिया परिवर्तिता। तथापि अधिगमप्रक्रिया तु अत्याधुनिकीव गण्यमाना दृश्यते। परन्तु अनुभवेन अभ्यासेन प्रशिक्षणेन च व्यक्तेः व्यवहारे शाश्वतरूपेण जायमानं शारीरिकमानसिकपरिवर्तनमेव अधिगमः इति शिक्षाविदामभिप्रायानुगुणं याज्ञवल्क्यशिक्षायामपि अधिगमप्राप्तये कश्चन विचारः प्रोक्तः । तद्यथा -

**अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्। शिष्याणामुपदेशार्थे कुर्याद् वृत्तिं विलम्बिताम्।।**

अधिगमे शिक्षणं, प्रशिक्षणम्, अनुभवः इति त्रयः विषयाः प्रधानाः। तदनु अभ्यासः प्रयोगः शिक्षणः (उपदेशे) इति त्रयः विचाराः प्रधानाः इति याज्ञवल्क्यः । तत्रापि छात्रस्तरानुगुणं **भाषणपठनपाठनवाचनो-च्चारणसस्वरवाचन**शिक्षणं शनैः शनैरिति, तदनु यथोचितं प्रयोगः, पश्चात्तस्य दृढाभ्यासः करणीय इति कश्चन शैक्षिकः मनोवैज्ञानिकः विचारः अत्र प्रतिपादितः। तत्रापि **क्षणशः कणशश्चैव विद्यामर्थञ्च चिन्तयेत्। अहरहः स्वाध्यायोऽध्येतव्यः** . . इति शतपथब्राह्मणोक्तदिशा शिक्षणकौशलाधिगमप्राप्तेः विशेषतां विशदयति याज्ञवल्क्यः यथा -

**गुणिता शतशो विद्या सहस्रावर्तिता पुनः। आगमिष्यति जिह्वाग्रे स्थलान् निम्नोदकम्।।**

**शतेन गुणितमायाति सहस्रेण च तिष्ठति। शतानां च सहस्रेण प्रेत्य चेह त तिष्ठति।।**

**जलमभ्यासयोगेन शैलानां कुरुते क्षयम्। कर्कशानां मृदुस्पर्श किमभ्यासान्न साध्यते।**

पूर्वोक्तः कृतो वा विचारोऽयं अमनोवैज्ञानिकः इति कण्ठस्थीकरणपद्धतिनाम्ना प्रसारितश्च आधुनिकैः।

परन्तु प्राचीना शिक्षाप्रक्रिया सर्वापि शब्दार्थसहिता, आचारव्यवहारदृग्गोचरी एव सर्वादा इति ज्ञायते। तद्यथा -

**ज्ञातव्यश्च तथैवार्थो वेदानां कर्मसिद्धये। पठन् मात्रापपाठात्तु पङ्के गौरिव सीदति।।**

**हस्तहीनं तु योऽधीते मन्त्रं वेदविदो विदुः। न साधयेद्याजुषाणि भुक्तमव्यञ्जनं यथा।।**

**आगमं कुरु यत्नेन कारणं हि तदात्मकम्।..**

इत्थं शिक्षाप्रणाली शिक्षाप्रक्रिया शिक्षणप्रक्रिया वा अधिगमसहितैवासीत् नान्यथा । संसिद्धतानियमः, फलितनियमः, अभ्यासनियमश्चेति विविधाधिगमप्रकारा: ये वर्तन्ते, ते समेऽपि एकतारूपेणात्र प्रतिपादिताः सन्ति। शतशः, सहस्रशः, लक्षशः इति कथनेन अमनोवैज्ञानिकतां स्वीकृत्याधुनिका: शिक्षाविदः, मनोवैक्षानिकाश्चामुं विषयं न्यक्कुर्वन्ति। नैतत् साधु वर्तते। प्रयत्नदोषप्रणालेः, शास्त्रीयनिबन्धनसिद्धान्तस्य तथैवान्येषां समेषां अधिगममनोवैज्ञानिकसिद्धान्तानां मूलाधाराः अपि तथैव वर्तन्ते। प्रयत्नः, प्रेरकं, पुनर्बलनं, आसक्तिः इत्यादीनि पदानि एव नूतनतया आधुनिकैः प्रयुक्तानि नान्यत् । **क्षणशः क्षणशः तथैव कणशः कणशश्च, अहरहः स्वाध्यायोऽध्येतव्यः, कुरु यत्नेन कारणं हि तदात्मकम्** इति वेदोपयुक्तपदानां निशितपरिशीलनेनैवात्र शारीरकी मानसिकी च काचित् मनोवैज्ञानिकता दरीदृश्यते। श्रुत्याधारिता सर्वापि भाषाधिमगप्रक्रिया शरीरकष्टप्रदायना नव । यद्यथा याज्ञवल्क्य: -

यथा पिपीलिकाभिश्च क्रियते पांसुसंचयम्। **न चात्र बलसामर्थ्यमुद्यमस्तत्र कारणम्।। इति।**

शिक्षणप्रक्रियायाम् अधिगमक्रियायां वा गुरुशिष्ययोः शारीरकमानसिकस्वास्थाय दैनन्दिनी काचित् अनुष्ठानप्रणाली अनिवार्या असीत्। तथैव अध्ययनस्यादावन्ते चावश्यम् ओंकारस्याभ्यास: गायत्रीमन्त्रेण सह कुर्यादिति कश्चन मानसिकशारीरिकस्वास्थ्यपदः प्रकार: याज्ञवल्क्यशिक्षायां सूचितः । तद्यथा -

**प्रणवं प्राक्प्रयुञ्जीत व्याहृततीस्तदनन्तरम्। सावित्रीं चानुपूर्येण ततो वेदान् समारभेत्।। इति।**

इत्थं श्रुत्युक्तरीत्या एव लौकिकवाङ्मयेऽपि अयं सङ्कल्पः दृश्यते। यथा **- वेदे रामायणे चैव पुराणेषु च भारते । आदिमध्याऽवसानेषु हरिः सर्वत्र गीयते** इति। स्वास्थ्यप्रदः, चित्तैकाग्रताप्रदः अयं कश्चन शैक्षिक: मनोवैज्ञानिकश्च श्रुतिसङ्कल्पः सम्प्रति औपचारिकानौपचारिकनिरौपचारिकरूपेण समाचर्यमाणशिक्षाक्षेत्रेषु कुत्रापि न वर्तते। अत एव, भाषाकौशलशिक्षणे, अधिगमप्राप्त्ये, शिक्षाप्रदाने वा गणनीया: समस्या: शिक्षकैः अनुभूयन्ते।

**भाषणपठनपाठनवाचनोच्चारणसस्वरवाचनकौशलशिक्षणे शिक्षकः तथा छात्र: -**

शिक्षणे अधिगमे वा द्वावेव प्रधानौ गुरुशिष्यौ। अनयोर्द्वयोः शारीरकमानसिकव्यवहार एव शिक्षाफलप्राप्तये कारणभूतः भवति। शिक्षाप्रक्रियायां यथा गुरुः तथैव कठिबद्धः छात्रोऽपि स्यादिति श्रुतिसारः। तदनु **भाषणपठनपाठनवाचनोच्चारणसस्वरवाचनकौशलशिक्षणावसरे** मनसा, वाचा, कर्मणा च गुरुशिष्यौ शिक्षणाधिगमकर्मणि कथं स्यादिति विवरणावसरे याज्ञवल्क्यः -

**कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दृढं मनः । स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः।।**
**बह्वीर्जिह्वा यथा गृह्णात्यहना वह्निस्तथैव च। ब्रह्मरूपं विजानीयाद् गुरुमेवात्मनः सदा।।**
**यत्किञ्चिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम्। करोति तत्पदानं यत् तस्माद् ब्रह्ममयो गुरुः।।**
**विधिनाऽप्यविधिज्ञानमविधानान्न लभेयते। अवधानपरो नित्यं प्रायश्चित्तीयते नरः।।**

शिक्षणकर्मणि वा अधिगमकार्ये गुरुशिष्ययोः द्वयोरपि समर्पितमनः, अङ्कितस्वभावः, स्थितप्रज्ञता च भवेदिति कच्छपमुदाहृत्य विशदयति याज्ञवल्क्यः ।

**श्रुतिपरम्परायाः छात्राध्यापकैरवधेयाः कौशलतत्त्वविचाराः -**

१. औपचारिकरूपेण संस्कृतच्छात्राध्यापकः प्रशिक्षणावसरे भाषाकौशलाभ्यासप्रयोगसमये शारीरकमानसिक क्षमतानां प्रदर्शनाय सक्षमः स्यात्।

२. सूक्ष्मशिक्षणावसरे वैदिकशिक्षाग्रन्थास्थान् भाषाध्ययनचिारान् , तथा वर्णपदवाक्यादीनां प्रयोगनियमान चावगच्छेयुः धात्राध्यापकाः।

३. प्रत्येकं शब्दस्योच्चारणे तदनु शारीरिकमानसिकभावात्मकविचारप्रकचने सुतरां सुमुखाः भवेयुः।

४. स्वाध्यायशीलास्सन्तः, शिक्षणात्परमभ्याससमये त्वरितगतिं न प्रदर्शयेयुः, येन दुरभ्यासा: शैक्षिकजीवनान्तं यावत् समस्योत्पादकाः भविष्यन्ति।

५. श्रुतिपरम्परायां गुरोरभिमुखस्सन् शिष्यः यथा भाषाकौशलेषु युगपदागमाभ्यासविषयेषु कुशलोऽभवत् तथैवाधुना छात्राध्यापकः अपि संस्कृतक्षेत्रे कौशलप्राप्तये विषयस्वायत्तीकरणे च सिद्धहस्तः स्यात्।

इत्थमनेकान् विचारान् शिक्षाविदः तथा धात्राध्यापकाः श्रुतिशिक्षापरम्परायाः ज्ञात्वा तान् **भाषणपठनपाठनवाचनोच्चारणसस्वरवाचनकौशलविकासदिशा पठन्तु अवगच्छन्त्विति प्रार्थयन् शम्।**

**परिशिष्टम् -**

प्रगल्भश्च विनीतश्च स वर्णान् वक्तुमर्हति । शङ्कितं भीतमुघृष्टमव्यक्तमनुनासिकम्।।
काकस्वरं मूर्ध्निगतं तथा स्थानविवर्जितम्। विस्वरं विरसं चैव विश्लिष्टं विषमाहतम्।।
नाऽभ्याहन्यान् न निर्हन्यान् न गायेन् नैव कम्पयेत्। यथाऽऽदावुच्चरेद्वर्णांस्तथैव समापयेत्।।
अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु संचयात्। अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु।।
व्याकुलं तालहीनं च पाठदोषाश्चतुर्दश। संहितासारबहुल: पदसंज्ञासमाकुलः।।
मधुरं च न चाव्यक्तं व्यक्तं चापि न पीडितम्। सनाथस्येव देशस्य न वर्णाः सङ्करङ्गताः।।
यथा व्याघ्री हरेत्पुत्रान् दंष्ट्राभिर्न च पीडयेत्। भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्।।
यथा सुमत्तनागेन्द्रः पदात्पदं निधापयेत्। एवं पदं पदाद्यन्तं दर्शनीयं पृथक् पृथक् ।।
गीती शीघ्री शिरःकम्पी यथा लिखितपाठकः । अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।।
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः। धैर्यं लयसमत्वं च षडेते पाठके गुणाः।।
आचार्याः सममिच्छन्ति पचच्छेदन्तु पण्डिताः। स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः।।
पञ्च विद्यां न गृह्णन्ति चण्डाः स्तब्धाश्च ये नराः । अलसा रोगिणश्चैव योषां च विस्मृतं मनः।।
अहेरिव गणाद्भीतः सम्मानान् नरकादिव। राक्षसीभ्यः इव स्त्रीभ्यः स विद्यामधिगच्छति।।
न भोजनविलम्बी स्यात् न च नारीनिबन्धनः । सुदूरमपि विद्यार्थं व्रजेद् गरुडसंसवत्।।
सुखार्थी चेत् त्यजेद्विद्या विद्यार्थी चेत् त्यजेत्सुखम्। सुखिनस्तु कुतो विद्या विद्यार्थिनि कुतः सुखम्।।
हयानामिव जात्यानामर्धरात्रार्धशायिनाम्। नहि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति।।

अन्नव्यञ्जनयो गौ तृतीयमुदकस्य च। वायो: संचरणार्थाय चतुर्थमुपकल्पयेत्।।

यथा खनन्खनित्रेण नरो वार्यधिगच्छति। तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति।।

शुश्रूषारहिता विद्या अपि मेधागुणैर्युता। वन्ध्येव युवती तस्य न विद्या फलिनी भवेत्।।

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा। अथवा विद्यया विद्या चतुर्थं नोपलभ्यते।

युक्तयुक्तं वचो ग्राह्यं न ग्राह्यङ्गुरुगौरवात्। सर्वशास्त्ररहस्यं तद्याज्ञवल्क्येन भाषितम्।।

**परिशीलितग्रन्थाः**

१. याज्ञवल्क्यशिक्षा, डा. हरिराममिश्रः, विद्यानिधि प्रकाशन, दिल्ली, २०१५।

२. अमरकोशः, श्री जयलक्ष्मी पब्लिकेशन्स्, हैदराबादु, १९९६ ।

३. मनोविज्ञानशास्त्र आधाराः, प्रो. वि. कृष्णमूर्तिः, नागार्जुन पब्लिकेशन्स्, २००३।

# पर्यावरणशिक्षायाः परामर्शाः

डा. विद्याधर प्रभला
सहायकाचार्यः

परितः आवरणं पर्यावरणम् । प्रकृतिर्विना मानवादिप्राणिनां जीवनम् अनूह्यम् । जन्मारभ्य अन्तिमक्षणपर्यन्तं प्रकृत्याधारितं जीवनं प्रकृतिमयव्यवहारः क्रियन्ते सर्वैः । यतोऽहि मानव-जन्तु-पशु-पक्षि-क्रिमिकीटकादयः प्राकृतिकसम्पदः उदरपूर्तये आहारादिकं प्राप्नुवन्ति । पञ्चभूतमयजीवनमेव कर्तुमर्हन्ति अन्यथा जीवनचक्रमग्रे न याति । सृष्टि- स्थिति- लयाय प्रकृतिः प्रधाना । अर्थात् जन्मप्राप्तिः प्रकृतौ लीनं च प्रकृतावेगजलवायुशीतोष्णाकाशादि पञ्चभूतमयेयंप्रकृतिः भूमण्डले सर्वेषां प्राणदातृरूपेण स्वभूमिकां निर्वहति । प्रकृति गर्भान्निस्सार्य यथा मातुः रक्षणं कुर्मः तथैव अस्याः प्रकृतेश्च रक्षणं बुद्धिजीवेः अस्य मानवस्य प्राथमिक कर्तव्यमिति अजानन् अयं वेद- शास्त्र-सिद्धान्तग्रन्थेषु निर्दिष्टदिशा इयं संरक्षणीयेति मत्वा पूजनहवनयज्ञयागादिक्रियाकलापान् आचरति स्म प्राक्काले । तस्यां स्थितौ इयं शान्तानिर्मलतुष्ठाऽसीत् । येन भूमिरियं सन्तुलिताऽसीत् । यागादिभिः सन्तुष्टा इयं मानवादिप्राणिनां च परिरक्षतेऽस्म । अर्थात् यावता कुशलबुद्धिरयं प्रकृतेः स्तुतिः हवनादिकार्याण्यकरिष्यत् तावता साऽपि प्राणिनां पोषणं रक्षणमाकरिष्यत् । सदा परस्परस्नेहभावः, सहकारभावः आदानप्रदानक्रियाकलापाः अपेक्षितानि । परमद्यत्वे नानाप्राणरक्षिका पौषणी अन्नदात्री व्यथामनुभवन्तीति असन्तुलितेति लोके दरीदृश्यते । कुतेति चेदुच्यते- विकासपथमनुगच्छन्नयं मानवाः स्वीयस्वार्थमयचिन्तनेन आत्यन्तिकैहिकसुखप्राप्तये गृह- मार्ग परिश्रमाणाञ्च(FACTORIES) निर्माणमकरोत् । येन प्रकृतेः हानिः जाता । बहुकिञ्चित्कालं सा परमपूजनीया प्राणदात्री प्रकृतिः बुद्धिजीवेरस्य अकृत्यान् सोढ्वा अतिष्ठत् । किन्तु अतिविकासलोलुपोऽयं तस्याः महतीं पीडामजनिष्यत् । मानवस्याकृत्यानि (जलोत्कर्षणम्, खननं पृथिव्याः, खनिजपदार्थानां सम्पादनं तथैव अन्यग्रहस्य ज्ञानसम्पादनाय व्योमयात्राद्वारा ओजोन् रक्षकजालस्य भग्नम्-वृक्षकर्तनं- वनानां निर्मूलननिष्काशनञ्च सोढुमशक्ता तस्याः कष्टमाहोस्वित्वाधाञ्च व्यक्तमाना पर्यवलोक्यते । स्व कष्टं, असामर्थ्यञ्च नैकमार्गेषु अभि व्यञ्जयच्च । यथा – व्योमे नानाप्रकारकप्रदूषितत्यागेन वायुप्रदूषणम नद्यादिषु कर्मगारेषुव्यर्थपदार्थानां परित्यागेन जलप्रदूषणं भवननिर्माणद्वारा अवनेः विकारोत्पादने, उपग्रहव्योमयानानामधिकव्यवहारेण आकाशप्रदबषणञ्च जायते । एतेषां प्रदूषणानां प्रधानकारकः नान्यः नरैव ।

भारतीयविज्ञाने भणितमस्ति**“प्रकृतेः रक्षणं पूजनञ्चविधेयमिति”** देशस्यास्य सम्पदः प्राणभूताः ऋग्यजुस्सामाथर्ववेदाः प्रकृतेः कीर्तनं कुर्वन्त्विति खलु बोध्यते अस्मान् । पुराकाले प्रातरुत्थाय भूवन्दनं कृत्वा स्नानादिकर्मणः पूर्वं नदीतडागादिषु जलस्य सभक्तिकंपूजनं, यज्ञयागादि कर्मकाण्डेभ्यः आकाशवायुमण्डलपूजनं प्रत्येकेषां पञ्चभूतानां शान्तिमकुर्वन् इत्थं भारतीयैः । तदा भारतराष्ट्रं सुभिक्षेणासीत् । अस्मद्देशीयाः अधिकांशाः नवनवति प्रतिशतं स्वस्थाः आसन् । परं पाश्चात्यानामाक्रमणेन मांसभक्षणं, हिंसाप्रवृतिः अधिकं जातम् । ऐहिकभोगलोलुपे लीनोऽयं अधुना प्रकृतेःआराधनां स्तुतिश्च अत्यजत् । किन्तु भारतीयानां दैनदिनकार्यकलापेषु, शोडषसंस्कारेषु, कृषिकार्यादिषु, क्रीडासु, उत्सवेषु, सर्वकार्येषु प्रकृतिमातरं पूजयन्ति स्म । भारतीयैः पञ्चभूतानां स्तुतिः कुत्र कथमिति विचारिते सति ज्ञायते । तद्यथा –

वायुस्तुतिः – तरवः आम्लजानदातारः, अतः पूजनं स्तुतिः तेषामपि अनिवार्यम् । **वृक्षोरक्षति रक्षितः**, इत्युक्त्वा ज्ञायते वृक्षस्य रक्षणं स्वस्य मानवस्य रक्षणमिति ।

यजुर्वेदे उच्यते –

**नमो वृक्षेभ्यो हरिकेशेभ्यः ----- (यजुर्वेदः-16.27)**

अपि च ऋग्वेदेऽपि **'वायुरमृतस्य भाण्डः'** इति आह । रोगाणां निवारणार्थं वायुः वातीत्यर्थः । यथा –**'वाते गृहे अमृतस्य निधिर्हितः---' (ऋग्वेदः – 1. 186.3)**

प्राणपरिरक्षणाय शुद्धवायुः प्रधानः । जलमन्नं विना प्राणिनः दिनमेकं व्रताख्योपासनेन च द्वितीयदिनमपि स्थातुमर्हन्ति । परं वायुर्विना निमेषत्रयमपि जीवितुं नार्हन्ति । साम्प्रतं विकासाधीनप्रपञ्चे जनाः अनेकान् कुकर्माणि आचरन् वायुप्रदूषणकारकाः अजयन् । सूर्यान्निर्गम्यमानाः किरणाः साक्षात् मानवशरीरे पतन्ति चेत् चर्मकर्कटरोगाः उद्भवन्ति । तदवरोद्धुं ओजोन् () जालमं ---कार्यं निर्वहति ।वायुप्रदूषणकारमात् ओजोन् जालं नष्टं गतम् । ततः प्राणिनां अपरिहार्यरोगाः मानवानाम् अगम्यकीटा (various)येषां चिकित्सादिकं कर्तुं अत्यन्तकष्टं जायते । तस्मात् भूमेः हानिः भवति । उपयुक्तप्रत्येकस्य रोगस्य हानेश्च निवारणाय एकैवमार्गाः सूर्यस्तुतिः । सूर्यः तुष्टिं प्राप्नोति तर्हि सकलप्राणिमयप्रपञ्च सुभिक्षमयं भवति । सूर्यस्तुतिः कार्या, येन प्रकृतिः सस्यश्यामला भवति । उक्तञ्च यजुर्वेदे—

**"सविता पुनातु अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रस्मिभिः" । (यजु – 4.4)**

सूर्यशक्त्या सर्वेजीवाः सुखेनजीवन्ति । सूर्यतेजः सर्वस्य नेत्रमित्युच्यते । यजुर्वेदे---

**तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्यरत् ।**

**पश्येम शरदः शतं जीवेम शरदः शतम् ॥ (यजु 36.25)**

सूर्यतेजसा वायुः पुनीतः भवति, स्वच्छताञ्चाप्नोति । सूर्यतेजसा जलं वायुमार्गेण आद्रीभूय मेघरूपेण आकाशे तिष्ठति । यदा वायुः शीतलतां प्राप्नोति शुद्धवायुना तदा मेघाः वर्षन्ति । तत्र प्रधानं वायुः । इत्थं वायोः सेवनं (स्तुतिं) कृत्वा प्राणिनः सौख्यं प्राप्नुवन्ति । तत्र प्रधानः मानवः । परमधुना सः वेदोक्तविचारान् परित्यज्य यान्त्रिकविकासपथमनुसरन् वायुप्रदूषणकारकाः अजायत । **पृथिव्यापस्तेजो वायुशकाशात्** इत्युक्तरीत्या आकाशः अति प्रधानः । आकशस्य लक्षणविषये न्यायादि शास्त्राणि बहुधा सञ्चर्चितानि । न्याये उच्यते – शब्दगुणकमाकाशम् । निरशब्देन शान्तवातावरणेन त स्थिरं तिष्ठति अयमाकाशः । सर्वप्रपञ्चे नान्यत्प्रधानं निर्मलतत्वं, निश्चलतत्वमिति द्योतयति आकाशः । तत्रैव लीनाः भवन्तु, मग्नाः भवन्तु साधनेन निश्चलतत्वं सम्पादयन्विति प्रचोदयति अयम् । परं नाना कुचेष्टाभिः रणगोणध्वनिना व्योमयानानां सञ्चालनेन, प्रक्षेपकयन्त्राणां (rocket missile )इत्यादीनां प्रयोगान् कृत्वा वायव्याकाशप्रदोषणमवर्धयत् अयं बुद्धिजीवः । नेदं लोकहितकारकं । प्राचीनकाले भारतीयैः यज्ञयागादि कर्मकाण्डादिभिः हवनमाचरय्यधूमेन मन्त्रवलेन आकाशस्य रक्षणं श्रद्धया पूजनञ्चाकुर्वन्, येन सस्यश्यामलाऽसीत् प्रकृतिः । अतः ज्ञायते यज्ञयागादि आचरणेन षडऋतवः सकाले फलन्ति । सकालागमनेन क्षेत्रादिषु सस्योत्पत्तिः समीचीनरीत्या भवति स्म । वेदेषु इदमेवोक्तं खलु –

"एष ह् वै यज्ञो योऽयं पवत एष ह यन्निद् सर्वं पुनाति" (छा. उ.- 4-16.1)

होमकर्मणा न तु आकाशद्धिरेव घृताऽग्निना सविता वृष्टिं प्रयच्छति। येन अन्योन्याश्रयसम्वन्धः अवलोक्यते। नित्यकर्मभिः मानवैः प्रकृतेः आरधनं क्रियन्ते। तत्र प्रधानं अग्निकार्येण हवनक्रिया। येन आकाशे प्रदोषणशुद्धतावलोक्यते। ततः वरुणः सूर्यानुग्रहेण वर्षति, ततः क्षेत्रादिषु सस्योत्पतिः। ततः आहारोत्पतिः। तदेवोच्यते श्रीमद्भगवद्गीतायाम्---

**अन्नाद्भवति भूतानि पर्यन्यादन्नासम्भवः।**

**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥ (3.14)**

सकालवर्षेण प्रकृतिः पुनीता जायते। सर्वप्राणिनः स्वच्छमाम्लजानं प्राप्य प्राणानि परिरक्षन्ति। प्रधानतया तरवः पुलकिताः जाजायन्ते। तस्मादौषधवृद्धिः मानवाः औषधादीनि प्राप्य स्वस्थाः भूत्वा सुखेन जीवितुमर्हन्ति। यथोक्तम्—

**पृथिविवेदवयजन्योषध्यास्ते मूलं मा हि सिषम्।(1.25)**

तथा हि – ऐतरेयोपनिषदि आह –

**किञ्चप्राणो वै वनस्थतिः (2.4)**

अतः यज्ञयागादीनि वेदोक्तदिशा कर्तव्यानि। यतः प्रकृतिः शान्तिमवाप्य तृप्ता भवति।

**अग्निः –अग्निर्मूर्धादिवः ककुत्पतिः पृथिव्या अयं अपागूं रेताङ्गूं सि जिन्वति।**

यज्ञयागादिषु अग्नौ समर्प्यमाणाः घृतादि औषधादयः प्राणिनां कृते अत्यन्तावश्यकवायुजलाहारादीनाम्उत्पन्नकारकाणि भवन्ति। तदुच्यते-

**ओं आ ब्रह्मन् ब्रह्मणो निकामे निकामे नः**

**पर्यन्यो वर्षतु यागाज्ञेमो नः कल्पताम्॥"**

**"अग्नेर्वैधूमो जायते धूमादभ्रमभ्रात् वृष्टिरग्ने**

**र्वा एता जायन्ते त्समाराह तपोजा इति।**

**घृतं पवस्य घरया यज्ञेषु देव वीतमः**

**अस्मभ्यं वृष्टि मापय "। (ऋ.वे-9-49-3)**

तथैव गीतायामञ्चोक्तं यथा – मेघानां वर्षणेन अन्नोप्तत्तिः। तद्यथा --

**अन्नाद्भवन्ति भूतानि पर्जन्यान्नसम्पदः।**

**यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥**

अतःअग्निशान्तिः पूजनञ्चावश्यकम्।

**आपः** :—जलममृतम्। अमरकोशकारः जलविषये इत्थमवादित्

**आपः स्त्रीभूम्नि र्वारि सलिलं कमलं जलम् ।**

**पयः किलालममृतं जीवनं भुवनं वनम् ॥(अ.को.वारिवर्गः-3)**

वायोरनन्तरं जलमतिप्रधानम् । उपवासादि व्रताख्येषु वायुभक्षणं जलसेवनमेव क्रियते नान्यत् । अर्थात् प्राणिनः आहारेण विना जलं सेव्य द्वित्रीणि दिनानि  जीवितुमर्हति । उपवासादिष्वपि जलमङ्गीकृतम् । जलं पवित्रम् जलेनविना भूमण्डले जीवनम् अनूह्यम् । सर्वप्राणिभ्यः आपः पिपासादि बुभुक्षादिकं निवार्य औषधमयगुणान् प्रयच्छति । अतेवोच्यते पवित्र नद्यादिषु विद्यमानं जलमतिपवित्रं दिव्यौषधतुल्यम् । पर्वातादिषु जलपातादिषु च विद्यमानं जलम् औषधनिष्ठं भवति । आन्ध्रदेशस्य पुण्यतीर्थक्षेत्रेषु प्रथमस्थानमावहति तिरुमाला- तिरुपतिरिति नगरम् । तिरुमालायां पञ्चगङ्गेति प्रसिद्धं स्थलं वर्तते । महानदी- अर्थगिरि, श्रीशैलादि महापुण्यक्षेत्रेषु जलमौषधमयं वर्तते । सामाजिकः काश्यां गङ्गाजलमौषधरूपेण ग्रहिष्यन्ति । काशीयात्रा हैन्दवेभ्यः प्रधाना । काशीं गत्वा जनाः गङ्गाजलं पवित्ररूपेणानयन्ति । पवित्रतायाः निधिः सा । तथैव औषधमयी च वर्तते । इत्यनेन जलं प्रधानमिति ज्ञायते । जलपूजनं स्नानसमये क्रियते . नदीस्नानप्रवेश समये कुम्भमेलादिषु गङ्गायाः हारति समये च पूजनं स्तुतिः च क्रियते । आरोग्य सम्पादनाय बाह्यान्तरिक शुद्ध्यर्थं जलं मन्त्रेण शिरसि सिञ्चयेत् । सन्ध्यावन्दनकर्मणि प्रतिदिनमाचर्यते अस्माभिः ।

ऋग्वेदे उच्यते –

**आपो हिष्ठामयोभुवः तान ऊर्जेदधातन महेरणाय चक्षषे**

**योवश्शिवतमोरसः तस्यभाजयतेहनः उशतीरिव मातरः ।**

**तस्मा अरङ्गमामवो यस्यक्षयाय जिन्वथा । आपो जनयथा जनः ॥ (ऋ.वे.10.9.1.3.1)**

**जलमाहात्म्यम् :---**

**आपो वहन्ती हि लोकयात्रम् ।**

**यथा न भूतानि तथाऽपराणि ॥ (नै.च.14.80)**

नैषधीये श्रीहर्षः सत्सु पञ्चभूतेषु जलस्य महत्प्राधान्यमस्तीति व्यपदिशत् ।

रोगनाशकारी वारी –

**शं नो रभीष्टये आषौ भवन्तु पीतये ।**

**शं योरभिस्रवन्तु नः (यजु.वे-36.12)**

जलेनैव सस्योत्पतिः, आहारप्राप्तिः सर्वविधकार्याणि सेत्स्यन्ति । अतः वारि स्तुतिः/ पूजनं अनिवार्यतया कुर्यात् यतोऽहि प्रकृतिः सस्यश्यामला स्यात्,  क्षेत्राणि प्रफुलितानि स्युः, प्राणिनः श्वास्थ्यमयजीवनं यापयीयुरित्युक्ते आपः प्रधानम् ।

पृथिवी—

सुभाषितमेकं भूविशेषां तत्रापि जलस्य प्राधान्यं विशिष्टेन द्योतयति । सुभाषितकारः –

**पृथिव्यां त्रिणि रत्नानि जलमन्नं सुभाषितम् ।**

**मूढाः पाषाण खण्डेषु रत्नसज्ञाविधीयते ॥**

इत्यनेन पृथिव्याः प्राधान्यं स्पष्टं भवति ।

सर्वत्र आधारः प्रधानः । आधारेण विना कोऽपि न किमपि विश्वसति । कक्षाशिक्षणे शिक्षकः पाठयति तत्र ग्रन्थस्थाधारः प्रमाणिकवाक्यरूपेण दर्शयेत् । प्राणकटिभ्यः पञ्चभूतानि आधाराणि । मानवजीवनाय धर्मशास्त्रम् आधारम् । तथैव प्राणिकोटिस्यातुमाधारः कः ? ब्रह्मणः सृष्टौ पृथिवी आधारभूता । इयं रक्षणीया । पृथिवीञ्च स्तुत्यात् । पृथिवी सूक्तमपि वर्तते । तदेव भूसूक्तमिति ज्ञायते ।

**"भूमिर्भूम्नाद्यौर्वरिणाऽन्तरिक्षं महित्वा ।**

**उपस्थे ते देव्यधितेऽग्निमन्नादमन्नाद्यायादधे"॥**

भूमिः माता अस्माकम् । तस्याः रक्षणं पालनं पोषणञ्च प्राथमिककर्तव्यं भवति । वेदादिष्वपि स च विषयोल्लिखितः । यथा—

**माता भूमिः पुत्रोऽहं पृथिव्याः (अ.वे- 12-1-12)**

**तन्माता पृथिवी तत् पिता द्यौः (ऋ.वे-1-86.4)**

तथैव

**पृथिवी माता (यजु.वे-2.10)**

**द्यौः पिता (य.वे-2.11)**

भूमिरियं पुण्यमयी, निश्वार्थमयी सदा परिहितभावनाय अवहरति । तादृशीं पृथिवीं न नाशयेत् । न मलिनी कुर्यात् । कथमितिचेदुच्यते—

**भूरत्सि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।**

**पृथिवीं यच्छ पृथिवीं दृमः पृथिवीं मा हिंसीः ॥ (य.वे.1.18)**

अतः कृषकादयः क्षेत्रपूजनं, सामग्रिपूजनञ्च कृत्वैव कृषिकार्यमारप्स्यन्ते । गृहनिर्माणावसरादिषु भारतीयपरम्परानुगुणं भूसूक्तमाध्यमेनैव भूशुद्धिं कृत्वा गृहसौधादीनां निर्माणं प्रारम्भन्ते । भूमेः दातृत्वगुणं न कदापि विस्मरेत् । पर्यावरणपरिरक्षणायपञ्चभूतानां समये समये च अनस्यूततया पूजनमावश्यकम् । पञ्चभूताः तृप्ताः संसारः सुभिक्षः भवति, तेषु एकस्यापि प्रकोपः आगतः प्रपञ्चोयं विनश्यति।

**पर्यावरणशिक्षा –ENVIRNMENTAL EDUCATION**

परितः आवरणं पर्यावरणम् । परि+आ इत्युपसर्गपूर्वक वृधातोः ल्युट्प्रत्यये विभक्तिकार्ये पर्यावरणमिति शब्दः निष्पद्यते । साम्प्रतिके काले छात्रेभ्यः समाजसम्बद्धविषयान् बोधयेत् । यान्त्रिकयुगेऽस्मिन् यान्त्रिकशिक्षां प्राप्य आवश्यकशिक्षामिमां जनः त्यक्तवान् । तत्र प्रधानविषयः पर्यावरणशिक्षाविषयः । पर्यावरणं नाम किम्? तस्य संरक्षणं कथम् ? किमर्थं पठनीयम् ?

पर्यावरणप्रदूषणकारणानि कानि ? संरक्षणोपायाः के ? इत्येतानंशान्पाठ्यक्रमे स्थापयित्वा पाठयेत् । तत्र पर्यावरणोद्यश्यानि पाठनीयानि । तद्यथा –

1. पञ्चभूतानां परिचयः – लाभाः ।
2. वृक्षसम्पदः – औषधतत्वानां परिचयः ।
3. मानवजीवनस्य पर्यावरणस्य मिथसम्बन्धज्ञापनम् ।
4. पर्यावरणे अश्रद्धा समस्यां जनयति ।
5. पर्यावरमरक्षणं स्वस्यात्मनः रक्षणमिति ज्ञानदानम् ।

कथं पर्यावरमशिक्षणं स्यात् ? तत्र कथं पाठनं भवेत् ? तत्रापि स्तरक्रमेकीदृशविचाराः स्युः ? इत्येतानंशान् अवलोकयामः ।

**प्राथमिकस्तरे :–**

1. पृथिव्यापस्तेजोवायुराकाशादिपदार्थानां परिचयज्ञानम् ।
2. क्रीडाभिः प्रकृतिः विवरणं महात्म्यावबोधनम् ।
3. षड़ऋतूनां परिचयप्रदानम् ।
4. विहारयात्रादिषु भागग्रहणम् ।
5. उद्यानानां सन्दर्शनम् ।
6. विद्यालये सर्वत्र वर्यावरणसम्बन्धभित्तिफलकादीनां स्थापनम् ।

**माध्यमिकस्तरे पर्यावरणम् :–**

1. यात्रयाः साक्षाद्विषयपरिचयः ।
2. पञ्चभूतानां प्रकृतेश्च विषये प्रेरणादानम् ।
3. शोभायात्रादिद्वारा छात्रेषु सामाजिकचिन्तनधारायाः वर्धनम् ।
4. प्रकृत्यामनुभूयमानानां समस्यानामुपरि- a) नाटकप्रदर्शनम् b) लेखनस्पर्धासञ्चालनम् ।
5. प्रदूषणपर्यावरणविषये जागरूकवर्धनाय नानाकार्यक्रमाणां सञ्चालनम् ।

**उच्चस्तरे पर्यावरणचिन्तनम् :--**

1. पर्यावरणभूमिकायाः विषये विस्तृताध्ययनम् ।
2. सङ्गोष्ठी सञ्चालनम् ।
3. सामाजिकचैतन्यवर्धनम् ।
4. पाठ्यक्रमे अनिवार्यतया विषयोऽकं योजनीयः ।
5. लघुचित्राणां निर्माणम् – अनुसन्धानकार्यसम्पादनम् । जनचैतन्यमाध्यमेषु भागग्रहणम् – पुस्तकादिनिप्रकाशयानि ।

**शिक्षणविधयः :–**

1. व्याख्यानविधः।
2. क्षेत्रभ्रमणविधः।
3. परियोजनाविधिः।
4. क्रीडाविधिः।
5. अन्वेषणविधिः।
6. निगमनागमनविधी च।

**निष्कर्षः :–**

प्रकृतेः आरधना अध्यायनरूपेण स्तुति- पूजनरूपेण च कर्तव्या। येन परस्परसहकारभावनायाः वर्धनं भवति। प्रकृतिः अस्मभ्यं जीवनं ददाति, वयं तस्याः रक्षणं कुर्मः। आराधनया समाजः सुभिक्षः भवति जन्तुजलचरपशुपक्षिमानवादि प्राणिनः सुचारुजीवनं कर्तुं समर्थाः जायन्ते। ऋतूनां सकालागमनं भवति। समये आतपः वृष्टिः शैत्यम् आवश्यकतानुसारं पर्याप्ताग्निश्च लप्स्यन्ते। आहारौषधादीनि पुष्कलं लभ्यन्ते। येन सर्वत्रशान्तिः समुद्भूयते, ततः वसुधैवकुटुम्बभावनां जागर्ति। अस्मद्पूर्वजाः ऋषयः इत्थं मेनिरे –

**ओं द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।**

**वनस्पतयश्शान्तिर्विश्वेदेवाः शान्तिः सर्वं शान्तिः। शान्तिरेव शान्तिः सामाशान्तिः॥**

अन्ततोगत्वा पञ्चभूतानां स्तुत्या संसारः रक्षितः भवति। प्राणिनः सुखेन जीवन्ति। तद्यथा

**काले वर्षतुपर्जन्यः पृथिवी शस्यशालिनी।**

**देशोऽयं क्षोभरहिती ब्राह्मणासन्तु निर्भयाः॥**

अन्ततः प्रपञ्चे विषाणवः बहवो आगताः गताश्च। साम्प्रतं करोनानामकविषाणुः अस्मान् बाधते। तदपि अतिशीघ्रं विनाशं गत्वा पुनः समस्तलोकस्य सर्वप्राणिनाञ्च सुखं भवतु। बुद्धिजीविरयं कालस्य महिमामभिज्ञाय आरोगाय, स्वास्थ्याय, सुखमयजीवनाय च भारतीयपरम्परां संस्कृतिं च अनुसरेदिति आशास्य विरमामि।

॥ इति शम् ॥

# तन्त्रशास्त्रे उपासनायाःसम्प्रत्ययः

डा. श्यामराज.सि
सहायकाचार्याः

संविहितमेव समेषां विपश्चिदां यत्  अस्मच्छास्त्रपरम्परा उपासनामूलमिति । अत एव उपासना बुध्दिवर्धककामधेनु इति कैश्चित् कोविदैः व्यगादि । भगवद्गीतायां यथा-

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

अथ  एव उपासना नामा सर्वविदितं किञ्चिद् व्यावहारिकं तत्त्वं  वरीवर्तते  । प्रायः भारतीयाः मनीषिणः ऋषयः महान्तश्च उपासनेनैव स्वीयप्रयासेषु सुतरां फलग्राहिण अन्वभवन्  इत्यत्र कृत्सनं इदं वाङ्मयं  प्रमिमीते । इयमुपासना सर्वेषु दर्शनेषु तदीयैराचार्यैःआध्यात्मिकज्ञानसाधानपरिपूतसाध्यमिव समाद्रियते स्म । उपासनाः  बहुधा समवर्णिषत दशभिः महाविद्याभिः सह सुस्पष्टं तन्त्रवाङ्मयेषु । यत्र श्रध्दा, वात्सल्यं, स्नेह, कामः, रतिः, इत्यादीनां स्थानम् उपासनामधितिष्ठते । यद्यपि उपासनायाःसाध्यं सर्वत्रदर्शनादिषु समानतामपद्यते तथा सति एतस्य अनुष्ठानादिवर्णनेषु भेदाःदृश्यन्ते । उपासना शास्त्रानुसारम् अधिगमः इति वक्तुं पार्यते परम् अनया उपासकस्य शनैः शनैः मनसः प्रौढत्वं जायते । एवं सति उपासनविषये महान् खलु विवादः भारतवर्षे दृश्यते । कश्चिदवदत् मूर्त्तिपूजा एव उपासना, अपरो मन्त्राणां जपः एवेति, कश्चिद् इतरः एकाग्रचित्तेन आत्मनः शून्यस्य वा अवलोकनम्, अन्यश्च निर्गुणस्य चित्तवृत्त्याधारेण समीक्षणमिति, इतरश्च सर्वकल्याणगुणपूर्णस्य सगुणस्य चित्तवृत्तिभेदेन साक्षात्करणमिति, प्रत्यक्षस्य शरीरस्य च केवलं दृढमवगमनमिति अपरः इति बहुधा उपासनाविषये तदाधाराधेयविषये च भेदाः सन्ति ।

लोकव्यवहारे   शराभ्यासः उपासनं , उपासनम् आसने, परिचर्याप्युपासना इति उपासनाशब्दः व्यवह्रीयते । सूक्ष्मदृशा व्यालोक्यते सद्यैव यःअर्थः बोध्यते सः यतः परोक्षे पदार्थे मनसःसंस्थापनम् अर्थात् तद्विषये  शरविद्यायामिव क्रियमाणः  अभ्यासः  तद्विषयिणी परिचर्या  एव खलु उपासनं कीर्त्यते एवंञ्च ऐन्द्रियप्रत्यक्षम् आलम्ब्य तद्द्वारा परोक्षपदार्थे  प्रत्यालम्बनप्रवाहः  तथैव पारलौकीकविप्रकृष्टतरपदार्थस्य अवगमनाय  तत्सम्बध्दस्य ऐन्द्रियज्ञानजन्यस्य आधिभौतिकपदार्थस्य आलम्बनेन, परोक्षपरमार्थज्ञानप्रवाहस्य अनस्यूततेव उपासना ।

इत्थं क्रमेण संवर्धनं जायते  उपासनाद्वारा बुध्देः  प्रत्यक्षपरोक्षातीन्द्रियस्तरेषु  अतः प्राथमिकप्रत्य्ऩक्षबुध्दिद्वारभूता  मूर्त्तिपूजा प्रथमोपास्या भवति । लौकीकाभौतिकपदार्थेषु प्रसरन्त्याः बुध्देः विकासः पारामार्थिकोपासकेषु जायत एव । एतद्द्वारा परोक्षातीन्द्रिययोः बुध्दयोः विकासः एव न संभवति । एवं यदि क्रमशः प्रथमोपास्या बुध्दिः द्वितीयस्तरं  प्राप्नुयात्  तदा अवर्णिताः अगृहिताः

अपि विषयाःसुगमं बुध्दिविषयाःजायन्ते। एवं द्वितीयोपास्या बुध्दि अन्तर्दृष्टिं सम्प्राप्य इन्द्रियगोचरान् पदार्थान्नपि अलौकिकान् विषयाञ्च प्रत्येति। इयं खलु उपासनायाः तुरीयसीमा। इत्थम् उपासनया बुध्देः समभिवर्धनं शास्त्रे दरीदृश्यते। अयम् अधिगमः अस्मदृषिभिः अन्वाख्यातं यथाशास्त्रम्।

प्राणीनां परिणामदशासु अन्येभ्यः प्राणीभ्यः जीवस्पन्दनं मनुष्ये अधिकमस्ति। तथा सति इदं जीवस्पन्दनं पूर्णतया मानवस्य लब्धं यथा बाह्याभ्यन्तरावयवानां केषाञ्चित् मनसश्च पूर्णनियन्त्रणम् एतावता अस्मदिच्छाशक्तेः विधेयं न जातम्। एवं मानवशरीरे जीवस्पन्दनम् अन्येभ्य अधिकमिति हेतोः किञ्चित अवबोधात्मकतत्त्वमाप्तं तत्तस्मिन् क्रमेण विकसति सति परमपदप्राप्तिसूचकमानवजीवनोद्देश्यं पोपुर्यते। तत्प्राप्त्यर्थं बहुधा विविधपन्थानः उत्पन्नाः अमुष्मिन् देशे ते एव उपासना मार्गाः उत साधनामार्गाः इति ह्लपयति।

**सिध्दान्तयोः सामरस्यम्**

आधुनिकशास्त्रकारैः जगदिदं (BIG BANG) सिध्दान्तत्वात् प्रचण्डस्फोटनात् अजन्यतेति तद्वत् आदिमस्फोटनात् उत स्पन्दनात् एव प्रपञ्चमिदं प्रपञ्चितमिति आर्षग्रन्थकृद्भिः सिध्दान्तीक्रियते।

***बिन्दुस्फोटनमात्रेण ब्रह्माण्डो इज्जण्डसमुत्भवः।***
***भिद्यमानात् परात् बिन्दोः अव्यक्तात्मा रवोऽभवत्***

अतः परिणामप्रक्रियायां यानि वस्तूनि जातानि तेषां समेषां वास्तवरूपं तत्तत् स्पन्दनविशेषा इति सिध्यति। अस्मद्दृग्गोचराणां वस्तूनां मूलभूताः केचित् विद्युत्परमाणवः (neutron, electron, proton) सर्वे शक्तितरसंङ्घाताःइति(wave mechanics) अत्यन्ताधुनिकभौतिकविज्ञानसिध्दान्तः तदेव परमाणुरूपस्पन्दनविशेषाः मन्त्रशास्त्रस्य भूमिकामधिशेरत इति ऋषयः व्याजगीर्षन्। एवं पश्यत्सु सत्सु येषां केषामपि वस्तूनां सुक्ष्मरूपमस्ति तच्छक्तितरंगः मन्त्रः उत सुक्ष्मस्पन्दनः। मन्त्रः तद्वस्तु च नामरुपे भवतः। वस्तूनां सत्भावे स्पन्दनस्य सत्भावः अतः स्पन्दनभावे स्पन्दनं स्रष्टुम् उच्चरितुं शक्यं तर्हि वस्तुरपि आविर्भवेत्। एतत् मन्त्रशास्त्रस्य मूलभूततत्त्वम्। न केवलम् अस्माकं दृगोचराणां पदार्थानां सत्भावे अपि च इन्द्रियातीतानां पदार्थानां सत्भावः तत्तद्वस्तूनां स्पन्दनविषयैः ज्ञातुं पार्यते। यथा अदृश्यमानानां खगोलानामपि सत्वं तत्तत्स्पन्दनविषयैः ज्ञायते सौरमण्डलबहिस्थानां खगोलानामपि।

**योगशास्त्रं मन्त्रश्च**

***ब्रह्माण्डे ये गुणाः सन्ति शरीरे ते व्यवस्थिताः***

एवं मानवशरीरं समष्टिप्रपञ्चस्य व्यष्टिरूपमिति हेतोः शरीरेऽमुष्मिन् (physical body) षट्भिः प्रकारैः विभाजिते सति भ्रूमध्ये आज्ञाचक्रम्, कण्ठदेशे विशुध्दिचक्रम्,हृदयदेशके अनाहतचक्रं, नाभ्यां मणिपूरकं,लिङ्गमूले स्वाधिष्ठानं,तदधस्तात् लिङ्गगुदयोः मध्ये मूलाधारचक्रम्

इत्येवं सूक्ष्मशरीरं(astral body) शास्त्रं स्पष्टं ब्रूते । योगशास्त्रभावनया वीक्ष्यमाणे सूक्ष्मशरीरे कण्ठस्थविशुध्दिचक्रे विद्यमानेषु षोडशदलेषु षोडशस्वराणां, तथा हृदयस्थानाहतचक्रे द्वादशव्यञ्जनाक्षराणां, मणिपूरके दशाक्षराणाम्, स्वाधिष्ठानचक्रे षण्णां वर्णानां, मूलाधारचक्रे चतुर्णां वर्णानां, भ्रूमध्यस्थे आज्ञाचक्रे वर्णद्वयस्य एवं मस्तिष्के सहस्रारचक्रे समेषां पञ्चदशाक्षराणां स्पन्दाःप्रसरन्ति ।

***पञ्चाशत् कादयःषक्षलसहान्ताः समीरिताः।***
***सोमसूर्याग्निभेदेन मातृकावर्णसम्भवः।।***

एवमुपासनया मन्त्रसिध्दित्वात् उच्चार्यमाणशब्दाः वर्णाःतत्तच्चक्रेषु प्रध्वन्यन्ते तथा अस्मद्धियःसमेधन्ते ।

**उपासना मन्त्रप्रयोगश्च**

ह्रीं,क्लीं,श्रीं,हुम् इत्यादीनां बीजाक्षरादीनां विधिना क्रियमाणः वर्णसंघातः अस्ति मन्त्रः । प्रथमदृशा अर्थरहितं तथापि अक्षरं न केवलं लिपिः तेषामुच्चारणसमये विद्यमानाः स्पन्दनविशेषाः एव । मानवे एवं अक्षरम् उच्चरति सति विवक्षौ इच्छानुरूपप्रयत्नेन अन्तस्थो एकत्रितः उद्गच्छन् कण्ठताल्वादिस्थानैः अभिहितः शब्दरूपेण परिणमततीत्यर्थः । सोऽनुप्रदानेन रूपेण परिणतो वायुः कण्ठगते विवृते, कण्ठे श्वासरूपतां संवृते, कण्ठे नादतां च प्रतिपद्यते । वायुमण्डले तादृशस्पन्दनं स्रजति सैव वैखरीवाक् । एतत् पूर्वमपि शब्दस्य अवस्थाः विद्यन्ते परा, पश्यन्ती, मध्यमा चेति। शब्दोच्चारणे कण्ठगतावयवानां मांसपेशीनां तत्तत्प्रयत्नार्थं तत्तन्नाडीविशेषेषु काचित् प्राणशक्तिः(nervouse force) सैव मध्यमा । एवं मनसि कश्चित् शब्दः साक्षीक्रियते तदनन्तरमेव नाडीषु मांसपेशिषु च प्राणशक्तिः उत्पद्यते शब्दस्य अक्षरस्य वा मानसिकसंकल्पः एव पश्यन्ती । ततः प्राक् परावस्तुषु जायमानात्मस्पन्दनं परा इति व्यवह्रियते । अत एवं ज्ञायते न केवलं वायुमण्डले एव शब्दस्य स्पन्दनं चलनं च जायते अपि च सूक्ष्मसूक्ष्मतरेषु प्रपञ्चभूतेषु आविर्भूयते । स्पन्दनादीनां प्रवृत्तौ एव मन्त्रदेवतायाः स्फूर्त्तिः। उपासनया इच्छाशक्तेःदृढतां प्राप्तवता साधकेन स्वेच्छया मन्त्रस्पन्दनमुत्पाद्य सोद्देश्यं पूर्त्तीकर्तुं पार्यतेति । यथा मन्त्रदेवतामाहूय स्वेच्छया साधकः प्रवर्तयतीति श्रूयते खलु सैव इयं प्रक्रिया ।

उपर्युक्तोपासनासम्प्रदायानाम् समाहारः एव तन्त्रशास्त्रम् । तन्मुख्यः मन्त्रः प्रपञ्चस्य शुध्दस्पन्दनानां प्रतिरुपः विद्यते । मन्त्रः देवतायाः सूक्ष्मरुपमस्ति, यन्त्रं स्थूलरूपमस्ति ,मन्त्रस्य ध्यानोक्तरुपम् । तत्प्रयोगकुशलशास्त्रं तन्त्रमित्याख्यया व्यगादि । उपासनायै एकातिविशाला पध्दतिः आविष्कृता । अक्षरस्पन्दनरहस्यम् आसन-प्राणायामः-हठयोगपध्दतयः, कुण्डलिन्युत्थापनं सहस्रारपद्मात् अमृतवर्षणं, लययोगसाधना, एकैकेषु स्थानेषु अवयवेषु मानसम् एकत्रीकृत्य धारणाध्यानासमाधयः, राजयोगमार्गाः अत्र समरसत्वेन सम्मिलिताः। अतः तन्त्रसाधनापद्धतयः क्षिप्रफलप्रदाः इति अनुभवज्ञः प्रतिजानीते । तन्त्रसाधनायां प्रविष्टानां कृते तान्त्रिकयन्त्रैः पुष्पधूपदीपचन्दनजलनैवेद्यैः शङ्खखण्डानादभिः बहुभिः उपकरणैः पूजा क्रियते । एवं सत्यपि पूजा बुध्दिवर्धनाय प्रथमसोपानमेव । जपध्यानादयः अन्तिमसमाधिं प्रति नेष्यति तदा ज्ञायते

कर्मभक्तिराजज्ञानयोगादिकं तन्मार्गे अन्तर्भवतीति । शास्त्रे तावत् पुजार्थं दिव्यदेहप्राप्तये नाडीशोधना,प्राणायामः,तत्त्वसंहारः,शोषणादि,भूतसंहारः,तत्त्वसृष्टिः,भूतसृष्टिः,लिपिन्यासः,पीठन्यासः, करन्यासः,षडध्वन्यासः, प्राणप्रतिष्ठा इत्यादयः बहवःमन्त्रक्रियाः सन्ति तेषु भूतशुध्दिः मुख्या अस्ति।

***देवार्चनायोग्यताप्राप्त्यै भूतशुध्दिं समाचरेत्***

इत्थं निर्देशः पूजायांम् अनुपेक्षणीय एव एवं पूतीकृते साधकशरीरे केषुचित् शरीरावयवेषु रोट्टिकायां यथा घृतं लेपयति तथा मन्त्राक्षराणि न्यस्यति। न्यासक्रियया शरीरं मन्त्रमयं देवतापूर्णं च जायते

***शिवो भूत्वा शिवं यजेत्***

इत्येवं तान्त्रिकनिर्देशात् देवतामयो भूत्वा देवान् उपासितुं योग्यः जायते एतदनुसृत्य उपासकेन आदौ देवस्वरूपत्वं प्राप्तव्यं स्वगुरोः सहायवशात् गुरुभिः शिष्यशरीरं संस्कृत्य स्वार्ज्जिततपसा स्वशक्तेः एका कणिका ब्रह्मरन्ध्रे संनिक्षिप्यते एतद्दीक्षा। स्पर्शदृष्ट्यादिमार्गैः दीक्षा दीयते एव तथापि सामान्यतया मन्त्रदेवान् कलशे संपूज्य तदभिषिञ्चिनोति। सा शक्तिकणिका शिष्यस्य स्थूलसूक्ष्मदेहे आप्लाव्य ब्रह्मरन्धेण प्रविश्य शिष्यशरीरे स्थीयते । दीक्षा, न्यासं, भूतशुध्दिः, प्राणप्रतिष्ठा,ध्यानं मन्त्रजपं, पूजा, होमम् इत्यादयः शास्त्रीयोपासनापध्दतयः शास्त्रे प्रतिपाद्यविषयाः। मन्त्रदेवतायाः पूजया ध्यानजपादिना तादात्म्यभावनया मन्त्रसिध्दिः जायते।

***पूजां ध्यानं जपं होमं तस्माद् कर्मचतुष्टयम् ।***
***प्रत्यहं साधकः कुर्यात् स्वयं चेत् सिध्दिमिच्छति ।।***

तन्मन्त्रसिध्दिद्वारा बुध्द्यां विकसितायां सत्यां अणिमाद्यष्टश्रियः वशीभवन्ति । बुध्दिरपि स्वेप्सितविषयेभ्यः अन्यत्र न स्खलति स्थिरतां प्रौढतां च आपद्यते अतः भुक्तिमुक्तिपदं सेत्स्यतीतीदं शास्त्रम्।

***सहायकग्रन्थसुची***


1) शारदातिलकम्- लक्ष्मणदेशिकेन्द्रः,पदार्थादर्शव्याख्या, चौखम्बा सुरभारति प्राकाशन 2010
2) शारदातिलकम्- मलयालव्याख्या,सम्राट्ट पब्लिकेषन् त्रिशूर् 2006
3) क्षेत्रचैतन्यरहस्यम्-पि.माधवजि, केरलक्षेत्रसंरक्षणसमिति,कोषितोट् 2009
4) महस्विनि-संस्कृतपत्रिका,(7)2009
5) भगवद्गीता-चौखम्बा ओरियन्टलिया 2001
6) आगमरहस्यम्- चौखम्बा सुरभारति प्राकाशन 2006
7) तन्त्रसमुच्चयः मलयालव्याख्या,पञ्चाङ्गपुस्तकशाला त्रिशूर् 2007
8) गरुडपुराणम्- चौखम्बा सुरभारति प्राकाशन 2010
9) भारतीयशास्त्रचिन्ता मलयालम् गङ्गाबुक्स् 2016

# अध्यापकशिक्षा पाठ्यक्रम में राष्ट्रवादी विचारधारा की आवश्यकता

ललित मोहन पन्तोला
अतिथि अध्यापक
केन्द्रीयसंस्कृतविश्वविद्यालय
गुरुवायूर् परिसरम त्रिश्शूर केरल
luckypantola10@gmail.com

**भूमिका** – भारत विश्व की सर्वतोप्राचीन सभ्यता है। वेदों से लेकर वेदान्त तक का अध्ययनक्षेत्र इस बात की पुष्टि करता है कि इतनी विशालतम संस्कृति के वाहक इस देश के निवासी सदा सर्वदा ही विश्व कल्याण की भावना लिए आगे बढ़ते चले हैं। सोलहवीं शताब्दी से जब वैश्वीकरण तथा विज्ञानयुग आरम्भ होता है तब से लेकर आजतक प्रतिपद हमें राष्ट्रवादी विचारधारा में ह्रास स्पष्ट दिखाई देता है। इसके अनेक कारण हैं जिसमें भारत का बिट्रिश शासन के अधीन होना प्रमुख कारण है। यह आलेख स्पष्ट करता है कि अध्यापकशिक्षा के समस्त आयामों में राष्ट्रवादी विचारधारा का समावेश क्यों आवश्यक है।

.........भारत बहु-सांस्कृतिक देश है। भारत ने विश्व को शान्ति का सन्देश हमेशा से दिया है। चाहे वैदिक मन्त्रों द्यौः शान्तिः को ले लें अथवा आधुनिक समय की रचनाओं को, सर्वत्र विश्व शान्ति तथा मङ्गल की कामना भारत ने सदा की है। **यत्र विश्वं भवति एक नीडम्** जैसी महती विचारधाराओं की जननी यह भारतीय संस्कृति सदा से ही नैतिकता के आश्रित रही है। हमारे वेद, उपनिषद् अथवा पुराण कहीं भी किसी की निन्दा नहीं करते वरन् निन्दा समान पाप कोई पाप नहीं ऐसा बताते हैं। इतनी सारी नैतिकताओं से भरी इस संस्कृति में यह विशेष है कि हमने कभी किसी संस्कृति के अमङ्गल की कामना भी न की। जब विश्व वस्त्र धारण करने से परिचित न था तब भारत में वेदों की ऋचाएं पढ़ी जाती थी। जब जगत अच्छे से भोजन करना न जानता था तभ भारत महाभारत युद्ध कर चुका था। ऐसी अनेक सी घचनाएं भारत को विश्व में सर्वाधिक श्रेष्ठ संस्कृति और सर्वतो प्राचीन संस्कृति होने का गौरव देती हैं।

लगभग ईसा के जन्म के बाद से शनैः–शनैःअनेक नव विचारधाराओं का जन्म हुआ। इन विचारधाराओं के जन्म के साथ-साथ नई सभ्यताओं ने भी जन्म लिया। कालान्तर में अनेक सभ्यताओं के जनने के बाद सभ्यताओं की विचारधाराओं में गतिरोध परस्पर देखा जा सकता है।

इन विचारधाराओं के परस्पर फलने-फूलने के बाद लगभग एक हजार वर्ष तक का काल, या यूं कहें कि वैदिक सभ्यताओं की गति के रुकने या अत्यन्त क्षीण होने का काल इसे समझा जा सकता है। इसके बाद का काल सबसे प्राचीन सभ्यता के ह्रास का काल था। यवनों, अंग्रेजों के द्वारा दिए गए आघातों से इस प्राचीन सभ्यता पर कुठाराघात हुआ। मैकाले की आंग्ल शिक्षा पद्धति के सम्प्रत्यय ने तो भारत की आत्मा पर प्रहार करना आरम्भ कर दिया जिसे हम आज भी प्रत्यक्ष देखसकते हैं।

आज की नई भारतीय पीढ़ी पाश्चात्य संस्कृति के प्रभाव के कारण राष्ट्रवादिता को साक्षात् चुनौति देती दिख रही है। स्थिति ऐसी है कि आज का भारतीय पाश्चात्य खानपान, रहन-सहन, विचार, भाषा आदि समस्त पक्षों में यूरोप को श्रेष्ठ समझकर भारतीयत्व का दूषक बनता देखा जा सकता है।

**सार -** अध्यापक राष्ट्रनिर्माता है। एक अध्यापक अपने समस्त अध्यापन काल में औसतन हजारों छात्रों का निर्माण करता है। यदि वह अध्यापक राष्ट्रवादी विचारधाराओं से ओत-प्रोत हो तो निश्चित ही उसके अध्यापन से छात्रों में भी राष्ट्रवादी विचारधाराओं का समावेश हो सकता है। इस हेतु अध्यापक शिक्षा के समस्त आयामों में राष्ट्रवाद को विशेष स्थान देना चाहिए।

# CHANGING MINDSET AND MANAGING LIBRARIES: -ISSUES AND IMPLICATIONS

**Dr. Rautmale Anand S**
**Librarian**
librarian.sansthan@gmail.com

**ABSTRACT:-**

***Today library image confines down to a building in which books are stalked on to the shelves. But modern libraries, its usage, its issues and its management are different today. The knowledge house is losing its sheen in the younger minds. E-Resource sharing, copyrights issues, fast access to ready information are corroding the historic image of library, because there is a stark change in the definition of knowledge in this busy E-era in the minds of the younger generation. With the word library an alphabet E has become inevitable which has its own pros and cons. To bring the younger generation back to library era it is alarming time to give library management and knowledge sharing a serious thought .This paper focuses on these issues and its corrective remedial measures.***

**Introduction:-**

Library can be defined as a place where there is a collection of sources and services. It can be managed by a private, public body or an institution. In ancient terms it was restricted to a mere collection of books based on different subjects, but libraries include maps, prints, CD's, DVDs, audiotapes etc. now the readers even gets access to internet with the help of which he can read what is not there in the books with a short span of time and at least cost.

**Ancient Libraries:-**

The concept of library is not new. It dates back to 330 B.C. in the Persian Empire where it was or personal library available but they appeared in the late republic. In the Greek Libraries there was no direct access of the books to the readers but in the west the readers had direct access to the books. Generally in the ancient times the library stalks were not accessible to the public, the staffs were involved in getting the books available for the readers. Some stalks were even kept chained to protect the books. In some libraries even translators were employed to translate the books written in other languages. Previously also some concepts of modern libraries were used where public library concept started. Categorization of books was also done in those days.

**Modern Libraries:-**

Modern Libraries carry the same image of the ancient libraries. A library image confines to four walls and a building and some books are stalked inside it. But modern libraries are now categorized in the following headings:

- Academic Libraries
- Corporate Libraries
- Government Libraries
- Historical Society Libraries
- Private Libraries
- School Libraries
- Technical Libraries
- Special Libraries

Management of library has changed a lot. Previously it was a closed system where people were not allowed to access the resources themselves but now in modern days people can access the books themselves and with the books they are even given additional resources like DVD's, CD's etc. as the need of the people don't have the time to go to the library and read every book and then derive material of their choice. They can just on the internet and then download the relevant material in a short span of time.

**The E- Era:-**

Now the world is hit by globalization, it is a small village now; similarly the information search is also globalized. With the help of internet one can access the information produced in any part of the world. In India still the penetration of internet is not high in the rural and India major population lives in rural areas. IMRB has released its ICUBE 2018 report on digital adoption and usage trends in India. The annual tracking study; considered as the currency for digital adoption in the country, gauges the changing digital ecosystem in India, measuring Internet usage by demographic, activity and device segments.

**Key findings:**

- The number of Internet users in India has registered an annual growth of 18% and is estimated at 566 million as of December 2018 - 40% overall internet penetration.

- The report also projects double-digit growth for 2019 and estimates that the number of internet users will reach 627 million by the end of this year.

- Of the total user base, 87% or 493 million Indians, are defined as regular users, having accessed internet in the last 30 days. 293 million active internet users reside in urban India, while there are 200 million active users in rural India. Unsurprisingly, 97% of users use mobile phones as one of the devices to access the Internet.

**Rural India's Digital Frenzy**

While internet users grew by 7% in urban India, reaching 315 million users in 2018, digital adoption is now being propelled by rural India – registering a 35% growth in internet users over the past year. It is now estimated that there are 251 million internet users in rural India, and this is expected to reach 290 million by the end of 2019. Increased availability of bandwidth, cheap data plans and increased awareness driven by government programmes seem to have rapidly bridged the digital gap between urban and rural India. Consequently, the penetration in Rural India has increased from 9% in 2015 to 25% in 2018.

**ICUBE™: INTERNET IN INDIA**

**Urban internet Report** **Mom & Kids on**

**Internet**



**Rural Internet Report** **Local**

**Language**

**Digital Commerce Report** **Broadband**

**Report**

**Mobile Internet Report** **Online** **Entertainment**

**Report**

**Social Media Report**

Modern Libraries also have to be globalized now. But when we think about internet copyrights issues are the biggest hurdles as once an E- Copy of any document is floated via

internet one has no control over its circulation but now a days without E distribution one is not willing to visit a library and get the data as it is cumbersome and time consuming. As per statics there is great decline in the readership and circulation in the libraries as people are now more comfortable using E resources.

**Pro's and Cons of Modern Libraries:-**

**PROS:-**

1. At a moment a person can get access to multiple information on various subjects by the use of various books, journals, internet etc.
2. Multilingual availability of material at the press of one button.
3. Easiest access to books and journals from anywhere.
4. Much cheaper than buying books.
5. Readers feel more comfortable as now they can directly access the shelves which were not the case in ancient libraries.
6. It is open to all there is no question of caste system prevails now.

**CONS:-**

1. In modern library the basic problem is it has a lot of access to e resources but in India penetration of internet is very low so they are not able to access the E data and some places where the internet facility is available also it is quite expensive.
2. When photocopying is done copyrights issues are violated but some of the books are so rare there their reprints are not available so one is not left with any other option but to photo copy it and further circulate it.
3. E resources are becoming more popular so the book readership among the youngsters is decreasing. There is no harm in reading the E resources but the basic problem with the E resources is that there is no Certificate of Authenticity which is attached with it. So the knowledge which they get may that they don't even read what they have downloaded.
4. Reading books and then deriving material is time consuming rather downloading from the internet.
5. Image of the library is still confined to the four walls of the building.

**Recommendations:-**

- Library image should be changed. It should not confine to four walls. It should become as popular as Google search engine. Whenever one needs to know anything he/she should think of the library first and this only be done by implementing necessary changes in how we manage the library.
- E- resources should be designed in such a way that it does not violate the copyrights issue i.e. it can be 'ready only' file etc., so the person who took so much pains in producing the materials gets enough royalty and gets motivated to write further.
- The concept of E library should be started which attracts younger generation to go to the website get oneself registered and then can browse the books which they want to refer. This will help the younger generation a lot as they will get authentic data and

they can be bought back to the library culture and even the readership of the libraries will also increase.

- Home delivery of the books from the library can be started so that the segment that does not get time to visit the library.
- Since childhood parents should inculcate the habit of reading and visiting libraries in the children so that this may drive them in the future to visit the libraries and read the authentic data.
- Library should be modernized and updated as per the changing needs of the readers.

**Conclusion:-**

Younger generation is moving away from libraries at a high speed. It is high time that physical image of the library should be changed to an E image to suit the needs and expectations of younger generation so that the concept of library does not become history and it does not loses its sheen and it moves successfully.

**References:-**


1. http://www.alootechie.com/content/45-million-active-internet-users-india-survey.
2. http://www.diglib.org/use/whitepaper.htm.
3. https://www.piie.com/microsites/globalization/what-is-globalization.
4. https://thenextweb.com/contributors/2019/01/30/digital-trends-2019-every-single-stat-you-need-to-know-about-the-internet/.
5. https://www.projectcontest.com/post/concrete-cube-test-competition-2019.
6. https://www.exchange4media.com/digital-news/566-million-internet-users-in-india-18-annual-growth-kantar-icube-2018-report-95137.html.
7. https://imrbint.com/images/common/ICUBE%E2%84%A2_2019_Highlights.pdf.
8. https://www.cubehousing.co.uk/__data/assets/pdf_file/0030/85890/Cube-Annual-report-and-financial-statements-2018-2019.pdf.

# समाजे नारीसुरक्षाधिकारस्य महत्वम्

Dibyendu Kumar Mandal
Ph.D. Scholar
Guruvayoor Campus

वर्तमानयुगे नारीसुरक्षा तु अत्यन्ता प्रमुखा विद्यते। यतो हि वैदिककालाद् आरभ्य नारीणां सम्मानम् अतीव उत्तमम् अस्ति। तस्माद्धेतोः आधुनिककाले अपि तासां सुरक्षा कर्तव्या अस्ति। सुरक्षा नाम समीचीनतया रक्षा करणीया। तस्माद्धेतोः संविधाने ये अधिकाराः उक्ताः सन्ति तेषाम् अधिकाराणां सुष्ठरूपेण पालनं करणीयं भवति।

अस्माकं भारतदेशे नारीणां स्थानं महत्त्वपूर्णं मन्यते। नरः नारी च इति सृष्टिस्वरूपस्य भागद्वयम्। सृष्टौ यावन्ति चराचरसजीवननिर्जीववस्तूनि विद्यन्ते सर्वत्र नरः नारी च अवश्यं भवति। दर्शनशास्त्रे प्रकृतिः पुरुषश्च इति द्वे सृष्टिबीजे स्तः। वेदान्ते तथैव ब्रह्ममाये इति द्वे स्तः। नरनार्योः सम्बन्धः शाश्वतोऽस्ति। न सा एकाकी रमते द्वितीयमैच्छत्। नारी समाजस्य आधारशिला विद्यते। प्रत्येकं सामाजिक – संगठने नारीणां स्थितिः सामाजिकदशायाः परिचायकोऽस्ति। उक्तमस्ति –

**विना नारीं निष्फला लोकयात्रा॥**

नारी समाजस्य पोषणं करोति। महापुरुषाणां जीवननिर्माणे तेषां मातृणां महत्त्वपूर्णं स्थानं वर्तते। नैपोलियनशिवाजीमहात्मागान्धिप्रभृतयः विद्वांसः मातृणां सहयोगेनैव योग्यप्रतिभाशाली आसन्। नेपोलियनमहोदयस्य इयमुक्तिः सत्यमेव प्रतिभाति –Give me good mother and I will give a good nation. इति।

गृहे निवसन्ती अपि नारी अनेकरूपाणि (माता – भार्या – सहचरी - सहयोगिनी) धारयति –

कार्येषु मन्त्री करणेषु दासी, भोजनेषु माता शयनेषु रम्भा ॥इति।

वयं यस्मिन् समाजे वसामः सोऽयं समाजस्तु पुरुषतान्त्रिकः पितृतान्त्रिको वा। नारी तु पुत्तलीका इव कल्प्यते समाजे। नारीणां द्वौ एव पक्षौ समाजे स्तः, एकस्तु नारी भोग्यपण्या अपि तु सन्तानप्रसवस्य यन्त्री इति। परन्तु अस्माकं समाजे नारी भवति सर्वापेक्षया उत्कृष्टा मूल्यवती च सम्पद्। नारी तु स्वस्याः अधिकारेण एव मानवी – समाजस्य अर्धाकाश इव। नारी चिरन्तनी – ताः यदा तासां स्वाधीनता – समता – समानाधिकारप्रतिष्ठाय मतावादिकं फलितम् आन्दोलनं कुर्वन्ति तदा नारी-अधिकार इत्युच्यते। नारी भवति अर्धाकाश इति उक्तिः सुप्रतिष्ठा भवति चेद् एव नार्य्याः

मुक्तियज्ञः सार्थको भविष्यति। क्षयचिह्नात् अस्माभिः दायबद्धोत्तरणस्य दिक् प्राप्स्यते। तदा नारी न केवलं नारीत्वं प्राप्स्यति अपि च स्वाधीन – समानाधिकारसम्पन्नमानविका प्रजातिरूपेण विवेचिता भविष्यति। नारीजातिः सर्वेभ्यः शृङ्खलेभ्यो मुक्ता भविष्यति एवञ्च मानवीरूपेण सुचिह्निता भविष्यति।

यः समाजव्यपस्था चलति तत्र नारीसमाजस्य वास्तवात्मिकविकाशस्य परिस्थितं विविधदिशतः प्रत्याख्यानं भवति। प्रत्याख्यानस्य विषयानां निम्नोक्ताकारे संक्षेपेण सूत्रक्रमेण आलोचना विधास्यामि –

क. प्रचलितसमाजे नारीवादमानवाधिकारयोः एतयोः अभिन्नाकाराधारेण दृष्टयोग्यं न करोति।

ख. परन्तु नारीवादं विस्तृतरूपेण दर्शनार्थं मानवाधिकारमेव एकान्तकाम्यमिति युग्मादर्शः समानरूपेण न पश्यामि। अतः नारीसमाजः क्रमेण पश्चातवर्ग श्रेण्यां प्रत्याख्यातः भवति। एतत् प्रत्याख्यानम् अतीव क्षतिकारकः, अत्यन्तविपज्जनकः।

ग. सतीदाहप्रथावाल्यविवाहश्च कथञ्चित् निर्मूलः जातः (आइनिपन्थानुसारे) किन्तु अस्माकं समाजे, अस्माकं राष्ट्रे 'विधवाविवाहः' अधुनाऽपि तथा सर्वात्मकभावे व्यपकाकारे वा स्वीकृति न अर्जितम्। अतः नार्याः एतादृशि दुर्व्यावस्थारोधस्य मानविकाधिकारः प्रचलितवैषम्ययन्त्रणागत' स्थितः स्वार्थवाहीव्यवस्थायाः अभ्यन्तरे प्रकटविकटरूपेण प्रत्याख्यातः। नार्याः सामग्रिकेतिमूलकपुणर्गठननिर्माणज्ञापकप्रगतिसूचकञ्च जीवनस्य मानविकसामाजिकाधिकारः। वैधव्यनारीजीवने आगतः भवति कठोरामानविकानुशासनम्। वर्तमाने अस्माकं हिन्दुधर्मे विधवाविवाहः निषेधः नास्ति, किन्तु विधवायाः विवाहः अधुनाऽपि समाजे सर्वतभावेन न स्वीकृतमिति अधिकांशमेव प्रत्याख्यानंकरोति।

घ. अस्माकं समाजे अधुनाऽपि कन्यासन्तानहननप्रथायाः अमानविकताप्रवाहः सम्पूर्णरूपेण न निर्गतः। नार्याः गर्भे यदि कन्यासन्तानं अन्तरस्थः भवति तर्हि तां नश्यते (अधिकांशक्षेत्रे)। महिलानां कन्याशिशुप्रसवव्यापारः भवति अपराधमूलकः (Crime), पूर्वतः यथा शिशुकन्या हननं करोति तथैव शिशुकन्याप्रसूतानां महिलानां समाजस्य सर्वत्रैव प्रत्याख्यानः भवति। तेन

ङ. महिलानां मानविकाधिकारः लाञ्छितः भवति। नारीजीवने एतत् अमानविकविषयं विना किमपि भवितुं नार्हति।

च. धर्माचारेण नार्याः स्वाधीनजीवनस्य मानवाधिकारः नस्यते। नार्याः स्वयं शरीरयापनस्य अधिकारोऽपि छिन्नः भवति, धर्मनामाङ्कितनियमारोपेण। स्वेच्छया नारीसमाजः तेषां देहस्य शुचितालावण्यञ्च रक्षयितुं न शक्यः। महिलानां शरीरं वलपूर्वकं निकृष्टरूपेण व्यवहारः क्रियते। प्रत्याख्यानेन शिकारः भवति महिलानां स्वाधीनयौनजीवनं, यौनस्वत्वाधिकारस्य पन्था-पद्धतिगतशृङ्खला सहवासस्य स्वाधीनेच्छा। एतत् नार्याः स्वाधीनाधिकारलङ्घनस्य नेतिमूलकदृष्टान्तः भवति।

छ. अस्माकं समाजे (विशेषतया धर्मप्रतिस्थानेषु) धर्मस्य कारणं ददर्शन् देवदासीप्रथागतामानविकं निपीडनपद्धतिं स्थापितम्। अल्पवयसीनां महिलानां भगवतः जगन्नाथस्य पदपद्मे आजीवनं उत्सर्गं करोति। कदाचित् तेषां मतं न श्रृणोति। अतः आजीवनपर्यन्तं भगवतः सेवान्तराले तेषां यौन-क्रीतदासीत्वरूपजीवनयापनं कारयतीति। वयवृद्धया साकं निःस्वरिक्तावस्थायां देवदास्याः जीवनं तेषां अतिवाहितं करोति। नारीत्वस्य अवदमनमूलकवास्तवता तेषां ग्रासं करोति। समस्तवञ्चनायाः आश्रयस्थलरूपेण धर्ममेव स्वीकरोति। एतेन तेषां मानवाधिकारः विपन्नः भवति।

ज. पणप्रथा अस्माकं समाजे अधुना एकदुश्चिकित्स्यव्याध्याकारे चिह्नितः अस्ति। विशेषतया हिन्दुधर्मीयसमाजे पणप्रथायाः प्रवलप्रभावः लक्षितः भवति। अतएव पणप्रथा नाम किम् ? तत् अस्माकं ज्ञातव्यम् – विवाहसमये पात्रपक्षः कन्यापक्षतः यत् द्रव्यरूप्यञ्च गृह्यते, तत् भवति पणप्रथा। पणप्रथायाः कष्टं असह्यत्वात् अनेकानां महिलानां आत्महत्याः पन्थानं स्वीकरोति, नितान्तभोगे, यौनविकृत्याः शिकारः, अवैधसम्पर्के युक्तः भवति। एवंप्रकारेण पणप्रथा समाजस्य नानाक्षेत्रे नारीवादस्वीकारं करोति। तेन मानवाधिकारः अवलुप्तः भवति। समाजतः आरभ्य नानाक्षेत्रे अस्याः पणप्रथायाः गम्भीरसमस्याप्रकटितः भवति। मानविकाधिकारं भिन्नप्रकारेण प्रत्याख्यानं भवति। नारीवादः असहनीयविभ्रान्त्याः आवर्ते घुर्णयमानाः भवन्ति।

झ. धर्मीयकुसंस्कारवैज्ञानिकञ्च चेतनेन नारीवादः बहुदिनतः आक्रान्तिकवास्तवतायाम् आसीत्। धर्मीयमतान्धतां केन्द्रं कृत्वा नारीमुक्तिवादीतत्त्वीयफलितकर्मकाण्डं, तेन सह मानवाधिकारस्य सम्पर्कयोगयुक्तिता नितान्तभावेन विच्छिन्नः अस्ति। अर्थात् धर्मीयवलम्, उन्मत्तनारीवादं, मानवाधिकारप्रतिष्ठायाञ्च प्रधानवाधकरूपेण चिह्नितः अस्ति।

ञ. धर्षणेन नार्याः नारीत्वं पुरुषतान्त्रिकसमाजः अवमाननां करोति। नारीसमाजस्य अभ्यन्तरे यौनहिंसा, यौनस्वत्वाधिकारः, यौनाधिपत्यस्य शिकारः भवति।

भारतवर्षे १९३१ शतके पण्डितः जवाहलालनेहरुः राजनीतौ महिलानां कृते राजनैतिकवैधानिकाधिकाराय मतमुपस्थापितवान्। स उक्तवान् यत् आर्थिकाधिकारं विना समानतायाः सर्वेऽपि अधिकाराः निर्थकाः भवन्ति। यतो हि महिलानां कृते सर्वासु विधिषु सक्रियरूपेण भागं ग्रहीतव्यं, तेन प्रशिक्षणं प्राप्स्यति एवञ्च तस्याः दायित्वं तया अनायेसेन कर्तुं शक्यते।

प्राचीनकाले नारीणां तु गौरवास्पदं स्थानम् आसीत्। परन्तु मध्ययुगे तासां स्थितिर्द्रयनीया अस्ति। नारीणां गौरवस्य संरक्षणार्थं तासां सक्षमतायाः प्रयोजनमस्ति। परन्तु तासां प्रति उपेक्षाभावः हिनताभावो वा प्राबल्यम् आयाति। नार्यो हि स्वाधिकारं प्रति न तथा जागरुकाः यथा पुरुषाः। भारतीयसंविधाने नारीभ्यः केचन विशिष्टाः अधिकाराः प्रदत्ताः सन्ति। यथा – समानाधिकारः, पुरुषवत् स्त्रियोऽपि स्वेच्छानुसारं विवाहं कर्तुं प्रभवति, पितुः पत्युश्च सम्पत्तौ तासां समानोऽधिकारः भविष्यति, शिक्षाक्षेत्रे व्यापारक्षेत्रे नियोजनक्षेत्रे च ताः समानाधिकारं भजनते, सामाजिक – राजनीतिक – गति – विध्यादिषु तासां समानोऽधिकारः।

एवं संविधाने प्रदत्तसमानाधिकारविधाने व्यवहारिकक्षेत्रे तस्य सदुपयोगः आवश्यकोऽस्ति। यथा नारीणाम् असंगठित्वम्, जागरूकतायाः अभावः, संगठितप्रन्नस्य अभावः, संवेदनशीलतायाः अभावः,

संगठनं प्रति तासाम् उपेक्षादृष्टिः। अतः ताः संगठिताः भवेयुः। नारीणां सशक्तकरणे काश्चन अन्याः बाधाः अपि वर्तन्ते। यथा – नारीणाम् अशिक्षा, नारीषु रूढिवादि दृष्टिकोणम्, नारीषु गृहाद् बहिः कार्ये सम्पादने अरुचिः, आधुनिकराजनीतेः दूषित्वम्, अपराधि – तत्त्वस्य अभिवृद्धिः, केन्द्रियराज्यस्तरीय संसदादीनाम् उचितस्थानाभावः। एते विषया त्यक्तव्याः भवन्ति। तेन एव नारसुरक्षाधिकारयोग्यस्य समक्षता भविष्यतीति।

**सन्दर्भग्रन्थाः**


•यशोधरा वागची, नारी ओ नारी समस्या, अनुष्टुप प्रकाशनी, कोलकाता, 2002.

•साधना आर्य, निवेदिता मेनन, जिनी लोकनीता, नारीवागी राजनीति संघर्ष एवं मुद्दे, हिन्दी माध्यम कार्यान्वय निदेशालय, दिल्ली विश्वविद्यालय, 2001.

•चौधरी तथा चौपडा, शैक्षिकमानवाधिकारः, स्वाति पाब्लिकेशन्, चौडा रास्ता, जयपुर।

•पाणडेय रामशकल मित्र करूणाशङ्करः, मानवाधिकार और मूल्यशिक्षा, अग्रवल पाब्लिकेशन्।

•Agarwal .C (2005) Human Rights and Constitutional Provisions, New Delhi, Vikas PublishingCo.

•Bharti, Dalbir. 2008. Women and the Law. APH Publishing Corporation, New Delhi

•Banarjee , Somya (ed): National Policy for Women (with Schemes and Guidelines),( Arise Publishers, New Delhi, 2009)

•Chouhan , Laxmidhar: Women and The Law, (Mittal Publications, New Delhi, 2007)

•Kavitha G.S (2010) Awareness of women rights among secondary school female teachers, Un Women's initiatives, Kerala, India,

•Mukharjee Dev (1974) Status of women in India, New Delhi, Allied Publishers Ltd.

•Ram Sharma (1996) Women Education, New Delhi,Discovery Publishing House.

•Seth, Mira. 2001. Woman and Development. Sage Publications, New Delhi.

# अहं नारी

एलिना जेना
शिक्षाशास्त्रीद्वितीयवर्षम्
Eli.jena114@gmail.com

कन्यारूपेण अहं जन्म अलभम्,
पितुः मातुः च वचनं पालयितुम्।
भगिनीरूपेण अपेक्षां कृतवती,
भ्रातुः हस्ते रक्षासूत्रं बध्नातुम्।
वधूरूपेण सर्वंसहा अभवम् ,
दुःखं कष्टं सोढ्वा च।
भार्यारूपेण तु स्वजीवनमहं,
मम सर्वं समर्पितवती ।
मातृ-रूपेण मया सर्वदा,
सन्ततेः रक्षणं कृतं निर्भयेन।
तथापि अहं सर्वदा,
पीडिता दुःखिता अवहेलिता च।
संसारे नारी सर्वदा,
दुहिता अन्नपूर्णा सम्पूर्णा।

# साम्प्रतिकसमाजे उत्तम-अध्यापकस्य आवश्यकता

पुष्पाञ्जलि प्रधानः
शिक्षाशास्त्री द्वितीयवर्षम्
अणुवाक् –
puspanjalipradhan794@gmail.com

## उपोद्घातः

शिक्षकः कः इति प्रश्ने सति भारतीयानां मतं यदि पश्यामश्चेत् प्रसिद्धः कश्चन श्लोकः तस्य सारं वदति। तद्यथा -

**"अज्ञानतिमिरान्धस्यनज्ञानाञ्जनशलाकया।**
**चक्षुरुन्मिलितं येन तस्मै श्री गुरवे नमः ।।"**[1]

अर्थात् अज्ञानरूपकमन्धकारं दूरीकृत्य यः ज्ञानप्रदानं करोति सः भवति गुरुः। बालकस्य प्रथमगुरुः भवति तस्य माता। परन्तु औपचारिकरूपेण यदा बालकः विद्यालयं गच्छति शिक्षकः एव तस्य मार्गदर्शकरूपेण प्रत्येकक्षेत्रेषु साहाय्यं करोति। अतः छात्रस्य सफलतायाः पृष्ठे यथा पाल्यस्य भूमिका भवति, तथैव गुरोः भूमिका अपि अनिर्वचनीया स्यात्। साम्प्रतिकसमाजे सर्वत्र कीदृशं वातावरणमस्ति, किं किं प्रचलतीति सर्वे जानन्ति एव। तद् परिवर्तयितुं यदि एकः उत्तमः अध्यापकः छात्रेभ्यः समुचितं शिक्षां प्रददाति तर्हि समाजे परिवर्तनमागमिष्यति एव। तत्र उत्तमस्य अध्यापकस्य का आवश्यकता इति विषये यथामतिस्वमतं प्रकटीकरोमि।

## विषयवस्तु

विद्यालयः भवति एकः लघुसमाजः। आदौ छात्रः परिवारं त्यक्त्वा यदा विद्यालयं प्रति गच्छति तदानीं सः समाजस्य विषये ज्ञातुम् आरभते। उत्तमच्छात्रस्य निर्माणे उत्तमस्य अध्यापकस्य भूमिका अत्यन्तगुरूत्वपूर्णा अस्ति। गुरोः आशीर्वादं विना छात्रस्य विकासः एव भवितुं नार्हति। गुरोः निमित्तं शिक्षणं एका वृत्तिः न भवति इति भारतीयमनीषिणां चिन्तनेन ज्ञायते। पुराणपृष्ठातः इतिहासपृष्ठपर्यन्तं सर्वत्र गुरोः अवदानविषये वर्णितमस्ति। यथा महाभारते अर्जुनस्य गुरुः द्रोणाचार्यस्य, चन्द्रगुप्तमौर्यस्य गुरुः कौटिल्यादीनां स्वछात्रान् प्रति अवदानं को वा न जानाति।

[1] स्कन्दपुराणे, उत्तरकाण्डे, श्लोकसंख्या 32-34।

साम्प्रतिकसमाजे यत्र कुत्रापि पश्यन्तु नाम सर्वत्र एव दुर्नीतिः, व्यभिचारः, नारिणामुपरि अत्याचारः बहुत्र दृश्यते । एताषां सामाजिककुरीतीनां मुख्यकारणं भवति अज्ञानम् अशिक्षा वा । यदि बाल्यादेव अध्यापकः विद्यालयेषु उत्तमरीत्या पाठयेत्, उत्तमसमाजनिर्माणार्थं प्रेरयेत् च तर्हि अग्रे एतादृशकुरीतीनां शनैः शनैः निवारणं भवितुमर्हति । वयं जानीमः यत् अद्यतनशिशुः स्वस्तन नागरिकः । यदि सः अद्य उत्तमरीत्या शिक्षाग्रहणं करिष्यति तर्हि उत्तमसमाजस्य घटनमपि करिष्यत्येव, अत्र नास्ति कोऽपि सन्देहः ।

पुनः साम्प्रतिकसमाजे गुरुशिष्य सम्बन्धः एव तादृशः नास्ति यथा पूर्वे भवति स्म । तस्य कारणं भवति छात्राः तादृशाः न सन्ति न अध्यापका एव । अतः साम्प्रतिकसमाजे एकस्य उत्तम-अध्यापकस्य आवश्यकता अनुभूयते नितरां । गीतायामपि उक्तं भगवता श्रीकृष्णेन –

**यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥** [2]

यदि शिक्षकः उत्तमकार्यं करोति उत्तममार्गे गच्छति तर्हि छात्रः अपि तस्मिन् मार्गे गमिष्यति । अतः गुणवतः शिक्षकस्य आवश्यकता वर्तते एव । साम्प्रतिकसमाजे शिक्षकस्य प्रधानदायित्वमस्ति स्वस्य व्यवहारसापेक्षपरिवर्तनमिति । किमर्थमिति चेत् शिक्षाक्षेत्रे छात्रशिक्षकयोः प्राधान्यं सर्वदा एव तथैव तिष्ठति यथा सूर्यचन्द्रगिरयः तिष्ठन्ति । अतः शिक्षकः समाजे सच्चिदानन्दस्वरूप इव ।

## निर्ष्कर्षः

गुरोः छात्रान् प्रति अवदानं पूर्वमेव आसीत्, अधुना अपि अस्ति अग्रे भविष्यति एव च । परन्तु अधुना समाजस्य परिस्थितिं दृष्ट्वा गुरोः आवश्यकता बहु अधिका प्रतीयते उत्तमसमाजस्य निर्माणं प्रति अत्र नास्ति कोऽपि सन्देहः इति ।

## सन्दर्भग्रन्थसूची -


1. श्रीमद्भागवद्गीता तृतीयोऽध्यायः कर्मयोगः श्लोकः – 21 प्रकाशकः – गीताप्रेस – गोरखपुर – 276005 गोविन्दभवन – कार्यालयः, कोलकतासंस्थान ।
2. पुरातनी शिक्षा – डाँ. लोकमान्यमिश्रः प्रकाशिका – श्रीमती मञ्जूमिश्रा मृगाक्षी प्रकाशनम् 5/113, विरामखण्डः, गोमतीनगरम्, लखनऊ – 226010 (U.P)
3. स्कन्दपुराणम्, उत्तरखण्डम्, शिवपार्वतीसंवादे गुरुगीतायां श्लोकः 32-34 ।


[2] श्रीमद्भागवद्गीता तृतीयः अध्यायः श्लोकः - 19

# शिक्षणाभ्यासे अनुशासनस्य महत्वम्

मीनकेतन माझी
शिक्षाशास्त्रिद्वीतीयवर्षम्
minaketanmajhi16594@gmail.com

- **उपोद्घात**

किं नाम अनुशासनम् ? 'अनु' उपसर्गपूर्वकं 'शास्' धातोः 'ल्युट्' प्रत्यये सति अनुशासनमिति शब्दस्य निष्पत्तिर्जायते । शासनं विधिर्नियमो वा तदनुकूलं चाचरणमनुशासनमिति । अस्माकं जीवने अनुशासनस्य तादृशी आवश्यकता वर्त्तते यादृशी शरीररक्षायै भोजनस्य बौद्धिकविकासाय ज्ञानस्य च ।

- **अनुशासनस्य शाब्दिकार्थः**

अनुशासनमित्यस्य आंग्लभाषायां 'Discipline' इति पदं भवति । डिसिप्लिन् (Discipline) शब्दस्य उत्पत्तिः लैटिनभाषायाः ' शब्दात् मन्यते । यस्यार्थः व्यवस्था, नियमः, शिक्षा, अभ्यासः, अध्यापनं, प्रशिक्षितावस्था च । Discipline शब्दस्य कृते संस्कृतभाषायामनेकेषां शब्दानां प्रयोगः दृश्यते । यथा नियन्त्रणम्, नियमनम्, संयमः, विनयः, अनुशासनमित्यादयः। क्रमशः एतेषां विषये पश्यामः –

1. **नियन्त्रणम्** - बलपूर्वकं स्थापनं नाम नियन्त्रणमिति शब्दस्य प्रयोगः । तद् स्थापनं वस्तुनः, विचारस्य वा भवितुमर्हति ।
2. **नियमनम्** - यत्र निर्धारितनियमानुसारेण कार्यं कर्तुं कथनस्य बोधो भवति चेत् तत्र नियमनमिति शब्दस्योपयोगः ।
3. **संयमः** - आत्मानं स्ववशे स्थापयेत् चेत् तत्र संयमः इति शब्दस्य प्रयोगः ।
4. **विनयः** - यत्र बालकः विनम्रतया श्रद्धया सह ज्येष्ठानां गुरूणाञ्च आदेशानां पालनं करोति तत्र विनयः इति शब्दस्य प्रयोगः ।

- **अनुशासनस्य परिभाषा :-**

"Discipline must be based on and controlled by love "[3]

[3] Pestalazzi

- **अनुशासनस्य प्रकाराः -** यदि पश्यामः चेत् अनुशासनस्य मुख्यतया प्रकारद्वयं वर्त्तते। आन्तरिकानुशासनं बाह्यानुशासनञ्च।
- **अनुशासनस्य महत्वम् –**

अनुशासनस्य महत्त्वविषये भारते बहुकालात् पूर्वमुक्तम्। तद्यथा - **"लालयेत्** पञ्च वर्षाणि दश वर्षाणि ताडयेत्। प्राप्तेतु षोड़शे वर्षे पुत्रं मित्रवदा**चरेत्"**[4] **।** अर्थात् पञ्चवर्षपर्यन्तं शिशोः लालनं पालनं च करणीयम्। पुनः दशवर्षपर्यन्तं शिक्षार्थं पुत्रशासनं कर्तव्यम्। किन्तु षोड़शवर्षेभ्यः परं पुत्रेण साकं मित्रवदाचरणं करणीयमिति। पुनः उच्यते "**लालने** बहवो दोषाः ताड़ने बहवो गुणाः, तस्मात् पुत्रं च शिष्यं च ताडयेन्न तु लाल**येत्**"[5]। अधिकं लालनं क्रियते चेत् बालेषु अधिकाः दोषाः दृश्यन्ते। परन्तु अनुशासनेन तेषु सद्गुणविकासः जायते। अतः बालकानां कृते अनुशासनं परमावश्यकम्। जीवने अनुशासनस्य महत्वपूर्णं स्थानं वर्त्तते। जीवनोन्नत्यै जीवनसाफल्याय चानुशासनमावश्यकम्। शैशवादारभ्य वृद्धत्वं यावद् अनुशासनमावश्यकम्। गृहे मातापित्रोः, विद्यालये गुरोः, गृहस्थजीवने पत्युः पत्न्याः वा, वृत्तिस्थाने उच्चाधिकारिणाम् अनुशासनं पालनीयम्। अनुशासने एव व्यक्तिः उत्तमशक्तिं प्राप्नोति। अनया च शक्त्या जनः स्वनैसर्गिकप्रवृत्तीनां विकासे समर्थो भवति। अस्मिन् प्रसङ्गे दार्शनिकस्य अफलातूनमहोदयस्य कथनमस्ति "राष्ट्रस्य निर्माणे शिलाभिः वृक्षैश्च नैव क्रियते, अपितु नागरिकाणां चरित्रेण निर्माणं क्रियते।" इदं कथनं पूर्णरूपेण सत्यमस्ति। यदा कस्यापि देशस्य नागरिकाः अनुशासिताः भविष्यन्ति। तदा ते स्वदेशम् उन्नतिपथिमानेतुं समर्थाः भविष्यन्ति। अनुशासिताः जनाः सच्चरित्रेण, मनसा, वचसा, कर्मणा च शुद्धाः भवन्ति। अनेन स्पष्टं भवति यत् राष्ट्रस्य कृते सम्पूर्णसमाजस्य कृते च अनुशासनस्यातीवमहत्वमस्ति। रेनमहोदयस्य इदं कथनं सत्यमस्ति यत् "येन प्रकारेण स्थलसेनायां, जलसेनायां वा राज्यस्य अस्तित्वस्य कृते अनुशासनं परमावश्यकं तथैवानुशासनं विद्यालयस्य कृते महत्वपूर्णं वर्त्तते"।

- **शिक्षणाभ्यासे अनुशासनम् –**

उक्तकथनानुसारं व्यक्तिगतं सामाजिकं च अनुशासनं महत्वपूर्णं वर्त्तते। विद्यालयेषु उत्तममनुशासनं स्थापयितुं शक्नुमः चेत् अस्मिन् सम्बन्धे कस्यापि निश्चितसिद्धान्तस्य निर्धारणं कर्तुं न आवश्यकम्। यतः एकस्य विद्यालयस्य परिस्थितिः

[4] चाणक्यनीतिः श्लोकः-164,

[5] चाणक्यनीतिः श्लोकः-165,

द्वितीयविद्यालयात् भिन्ना भवति । अतः मया परामर्शरूपेण केचन विषयाः अधः प्रस्तूयन्ते । यैः विद्यालये शिक्षणाभ्याससमये सहायता भवति ।

१. स्नेहात्मकव्यवहारः, विश्वासः, सद्भावना च स्यात् ।
२. शिक्षकच्छात्रयोः पारस्परिकं प्रेमभावना एव अनुशासनस्याधारः स्यात् ।
३. सर्वेषामध्यापकानां मध्ये मधुरसम्पर्कस्थापनं परमावश्यकम् ।
४. अनुशासनस्थापनार्थं दण्डस्य प्रयोगः न भवेत् ।
५. विद्यालयस्य सम्पूर्णावातावरणं सुन्दरं सामञ्जस्य पूर्णञ्च निर्मितं भवेत् ।
६. छात्राः अध्यापकाः च स्व-स्वदायित्वानि पूर्णं कर्तुं स्वतन्त्रता साधनानि च प्रदीयेरन् ।
७. अभिभावकानां पारिवारिकजीवनं सुन्दरं सुखमयं च निर्मातुं प्रोत्साहनं कुर्यात् । यतोहि बालकाः अधिकं समयं गृहे एव यापयन्ति ।
८. बालकाः अनुशासनस्य महत्वविषये परिचिताः भवेयुः । तदर्थमुपदेशाः नोचिताः अपि तु विभिन्नमहापुरूषाणाम् उदाहरणैः अस्मिन् विषये ज्ञानं दातव्यम् ।

यदि वयमेतानि सर्वाणि कारणानि अनुसरामः चेत् शिक्षणाभ्याससमये कष्टं न आगमिष्यति ।

- **उपसंहारः**

विद्यालयस्य समस्तकार्याणि अनुशासनस्याभावे सम्यक् रूपेण सञ्चालयितुं न शक्यन्ते । अस्याभावे विद्यालयेषु अनैतिकतायाः साम्राज्यं भविष्यति । अतः अनुशासनं सा शक्तिः वर्त्तते, यया व्यक्तिः समाजः राष्ट्रं विद्यालयः इत्यादयः उन्नतिपथि अग्रसराः भवन्ति । अर्थात् अनुशासनस्यैव एतन्महत्वं यत् सामाजिकं राष्ट्रियं च कार्यजातं सारल्येन प्रचरति ।

- **सन्दर्भग्रन्थाः**


**१.** डाँ. द्विवेदी कपिलदेव, संस्कृत-निबन्धशतकम्, विश्वविद्यालय प्रकाशन, वाराणसी 2010

**२.** सन्तोष मित्तलः फतेहसिंहः, विद्यालयप्रशासनं सङ्घटनञ्च, मानितविश्वविद्यालयः नवदेहली 2009

# साम्प्रतिकसमाजे बालापराधः

रश्मिरेखा पात्र
शिक्षाशास्त्रीद्वितीयवर्षम्
patrarrg@gmail.com

- **शिक्षा '**

शिक्षा विद्योपादने' भौवादिकधातोः 'गुरोश्च हलः' इति पाणिनीय सूत्रेण 'अ' प्रत्यये सति अजाद्यतष्टाप् इत्यनेन निष्पन्नो भवति शिक्षाशब्दः । शिक्षा नाम आन्तरिकशक्तीनां बहिः आनयनम् । अर्थात् मनुष्याणामन्तः उह्यरूपेण या शक्तिः भवति तस्याः बहिः आनयनं नाम शिक्षा । शिक्षा माध्यमेन वयं सर्वाणि कार्याणि साधयितुं शक्नुमः । आधुनिकशिक्षाव्यवस्थायाम् अनेके विभागाः सन्ति येषु वर्णितः बालापराधः कश्चन प्रमुखः सम्प्रत्ययः वर्त्तते । अधुना न केवलमेकं राष्ट्रे अपि तु समग्र प्रपञ्चे बालापराधः दृश्यते । बालापराधः एक अवरोधः भवति । आधुनिकभारतनिर्माणे अस्य परिहारः सर्वकारेण करणीयः इति तमे वर्षे राष्ट्रशिक्षानी 1983परामृष्टम् ।

- **बालापराधस्य परिभाषा –**

बर्टमहोदयस्य मतानुसारेण बाल्यावस्थायायां क्रियमाणकार्येण यदि कस्यापि हानिर्भवति तर्हि एतस्य कर्ता बालापराधी इति ।

- **बालापराधस्य कारणानि –**

  - वंशानुक्रमस्य प्रभावः
  - शारीरिकप्रभावः
  - वातावरणस्य प्रभावः
  - बुद्धिहीनता
  - दमितेच्छानामपूर्तिः

- मनोवैज्ञानिककारणम्
- सामाजिककारणम्
- सांस्कृतिककारणम्
- विद्यालयगतकारणम्
- सङ्गदोषः

- **बालापराधस्य उपचारोपायाः –**

बालापराधनिराकरणे परिवारविद्यालयमित्राणां समाजस्य च महत्वपूर्णकार्याणि वर्त्तन्ते । यथा –

- **परिवारस्य कार्याणि –**

**ल**घुपरिवारनियोजनम्उ ,त्तमवातावरणनिर्माणम् ,बालकानामावश्यकतापूर्तिसंपादनं, बालानां पुरतः समुचितव्यवहारप्रदर्शनम्, आत्मनिर्भरताप्राप्तये सुयोग्यवातावरणप्रदानम् इत्यादयः ।

- **विद्यालयस्य कार्याणि**

विद्यालये उत्तमवातावरणनिर्माणं, पाठ्यसहगामिक्रियाणामायोजनम्, उपचारात्मक – व्यवसायिकशिक्षाप्रदानं, योग्यशिक्षकाणां नियुक्तिः, विषयचयने सौविध्यताप्रदानम् ।

- **समाजस्य राष्ट्रस्य च कार्याणि**

निर्धनबालेभ्यः आर्थिकसहायताप्रदानं, सामूहिकसंघस्य निर्माणम्, अनैतिककार्ये प्रतिबन्धकताप्रदानम्, चलनचित्रदर्शने नियन्त्रणं, मनोरञ्जनस्य व्यवस्थापनं, राजनैतिकवातावरणतः बालकान् दूरे स्थापयेत् इत्यादयः ।

- **बालापराधिनां कृते शिक्षाव्यवस्था –**

विभिन्नविधीन् आधारीकृत्य अपराधिबालकानां कृते शिक्षाप्रदानं, स्वयं सुरक्षाकर्त्तुं बालकानाम् अभिवृत्तिमूल्यादीनां परिवर्तनाय समुचितशिक्षाप्रदानं, विशिष्टाध्ययनानन्तरम् अपराधिबालकानां कृते संस्कारात्मककार्यकरणम्, अपराधीबालकानां कृते मनोचिकित्सायाः व्यवस्थापनम्, अपराधिबालकानां व्यवहारे पर्याप्तत्रुटिनिराकरणम् ।

राष्ट्रस्य प्रगतिः मानवः निर्माति । अद्यतनबालकाः भविष्यराष्ट्रनिर्मातारः राष्ट्रस्य रक्षकाः च भवन्ति । परन्तु नितरां बालपराधः भवति चेत् राष्ट्रस्य हानिः भविष्यति । तदर्थं समुचितवातावरणनिर्माणेन शिक्षया च बालापराधनिराकरणे वयं सर्वे प्रयन्तरताः भवेम ।

**सन्दर्भग्रन्थाः –**

1. त्यागी, नीता (2014) शिक्षामनोविज्ञान, अग्रवाल पब्लिकेशन्स अगरा - 2
2. सिंह, आर. पी. (2012) बालक विकास के मनोविज्ञानिकाधार, ओर लाल बुक डिपो , मेख
3. बिष्ट, एच, वी, (2012) बालमनोविज्ञान, अग्रवाल पब्लिकेशन्स, अगर

******************

# मूल्याङ्कनस्य विहङ्गावलोकनम्

सुषमा मिश्रः
शिक्षाशास्त्रीद्वितीयवर्षम्
sushamamishra009@gmail.com

- **उपोद्घातः -** 'मूल्याङ्कनम्' इति शब्दस्य श्रवणमात्रे वयं **'EVALUATION'** इति आङ्लपदं स्वीकुर्मः। मूल्याङ्कनम् एका प्रक्रिया भवति यत्र अनेकाः क्रियाः अन्तर्भवन्ति भवन्ति। पुनश्च उद्येश्यः, परिभाषाः, प्रमाणम्, निर्णयः आदि अपि अन्तर्भवन्ति एव। अत्र किं भवति इत्युक्ते विद्यालयीयस्तरीय छात्राणां रूचिः, वृत्तिः, आदर्शः, व्यवहारः आदिगुणाः समाहिताः भवन्ति। मूल्याङ्कनमाध्यमेन छात्रस्य व्यक्तिगतेषु तथा सामाजिकव्यवहारविषये च ज्ञातुं शक्यते।
- **मूल्याङ्कनंस्य प्रकाराः -** अत्र बहवः प्रकाराः दृश्यन्ते। परन्तु सुख्यतः मूल्याङ्कनप्रकाराः द्विधा गुणदृष्ट्यामूल्याङ्कनं, समयदृष्ट्यामूल्याङ्कनञ्चेति। पुनः गुणदृष्ट्यामूल्याङ्कनमध्ये अपि विभाजनं दृश्यते। मात्रात्मकमूल्याङ्कनं, गुणात्मकमूल्याङ्कनञ्च।
  - **मात्रात्मकमूल्याङ्कनम् -** अत्र छात्राणाम् अङ्कान् दृष्ट्वा मूल्याङ्कनं भवति। यथा 60%, 70%, 90% आदयः। पुनः गुणात्मकमूल्याङ्कनम् इत्यत्र मात्रात्मकमूल्याङ्कने ये दोषाः अभवन्, तेषु परिष्कारं कृत्वा श्रेणीपद्धत्या मूल्याङ्कनं भवति। एषा पद्धति सर्वोतमा इति ज्ञायते।

- **समयदृष्ट्यामूल्याङ्कनम्** – समयदृष्ट्यामूल्याङ्कनमपि द्विधा निर्माणात्मकमूल्याङ्कनम् (FORMATIVE EVALUATION) , योगात्मकमूल्याङ्कनञ्च (SUMMATIVE EVALUATION) इति ।

- **मूल्याङ्कनस्य भूमिका** –
  १. **शिक्षणक्षेत्रे** -अत्र छात्रस्य साफल्यस्य वैफल्यस्य च मूल्याङ्कनं कर्तुं शक्यते ।
  २. **पाठ्यचर्यायाम्** – अत्र किमन्तर्भवति, कथं मूल्याङ्कनं कर्तुं शक्यते ? इत्यस्मिन् विषये सम्यक् निर्णयः भवति ।
  ३. **छात्राणां कृते** -मूल्याङ्कनप्रक्रिया छात्रस्य स्तरनिर्धारणं करोति । अत्र तुलनात्मकरीत्या परीक्षणं सम्भवति । छात्रस्य उपलब्धिः ज्ञायते अत्र ।
- **सततं व्यापकं च मूल्याङ्कनम्** – यत्र निरन्तरं तथा व्यापकरूपेण मूल्याङ्कनं भवति तादृशमूल्याङ्कनं वर्तमानसमाजे अधिकाधिकोपयोगी इति गण्यते । तादृशं भवति सततव्यापकमूल्याङ्कने । अनेन बहुविधलाभाः भवन्ति, तेषां साररूपमत्र प्रस्तूयते तद्यथा - निरन्तरं मूल्याङ्कनं सम्भवति, अतः अन्ततो गत्वा शुद्धता दृश्यते । मूल्याङ्कनस्य क्षेत्रव्यापकं भवति, विद्यालयीय तथा बहिः कार्यक्रमाः सम्मिलिताः भवन्ति तत् आधारेण मूल्याङ्कनं भवति । अत्र मूल्याङ्कनं निदानात्मकं भवति इत्यादयः ।
- **उपसंहारः**– मूल्याङ्कनं छात्रेभ्यः उपकारी अङ्गरूपेण कार्यं करोति । स्वकीयजीवनस्य स्वयं मूल्याङ्कनेन मानवः अग्रे गच्छति । अतः अध्यापकाः मूल्याङ्कनविषये सम्यक् ज्ञानं सम्प्राप्य छात्राणां मूल्याङ्कनं कुर्युः । एषा प्रक्रिया पाठ्यक्रमे सर्वदा भवेत् ।

**सन्दर्भग्रन्थः -**

1. प्रो. कपिलदेव सिंह (श्री त्रजन्ता प्रेस लिमिटेड़)

# ज्योतिषशास्त्र  दृष्ट्या रोगविचारः तन्निवारणोपायाः

मनीष कुमार तिवारी
शिक्षाशास्त्रीद्वितीयवर्षम्
mktmothihari949@gmail.com

- **उपक्रमः -** सूर्यादिग्रहणबोधशास्त्रं ज्योतिषशास्त्रम् । जातकस्य जीवने संघटितानां शुभाशुभघटनानां ज्ञानं केवलं ज्योतिषशास्त्रमाध्यमेन एव भवितुमर्हति । सूर्यचन्द्रादिग्रहाणां गतिस्थितिः आधारीकृत्य शुभाशुभकालस्य निर्णयं करोति शास्त्रमिदम् । षट्सु वेदाङ्गेषु महत्वपूर्णं शास्त्रं ज्योतिषशास्त्रमस्ति । ज्योतिषशास्त्रे त्रयः स्कन्धाः वर्त्तन्ते । प्रथमः सिद्धान्तः, द्वितीयः संहिता एवञ्च तृतीयः होरा इति । त्रिषु स्कन्धेषु होराशास्त्रस्य अन्तर्गतं जातकस्य शुभाशुभफलस्य विचारः क्रियते । जन्मकुण्डल्यां द्वादशभावाः भवन्ति । तेषु द्वादशभावेषु षष्ठभावेन जातकस्य रोगविचारः तथा च अष्टमभावेन मृत्युः विचारः भवति । जातकस्य जन्मकुण्डल्यामष्टमेशः अष्टमभावे स्यात् एवं जन्मकुण्डल्यां तस्य दशभुक्तौ जातकः रोगग्रस्तः अवश्यमेव भवति । तत्र कतिचन प्रमुखरोगाणां स्थितिदृष्ट्या उपचारपुरस्सरं विवरणमत्र दीयते यथा –

**1. उन्मादरोगः**

लग्ने त्रिकोणे यदि सूर्यचन्द्रौ स्थितौ स्याताम् । गुरूःतृतीय स्थाने वा स्यात्, तथा लग्ने धनुराशेः नवमांशः स्यात्  चेत् जातकः उन्मादरोगेण ग्रसीतो भवति । यथा **लग्न**त्रिकोणे दिननाथचन्द्रौ शौर्ये गुरौ केन्द्रसमन्विते वा । सोन्मादबुद्धिः स भवेत्तदानीं शरासनादौ यदि जन्म**लग्ने ।**[6]

- **उपायः -** प्राणायामे अनुलोम-विलोम-कपालभाति-भ्रामरादीनां माध्यमेन उन्मादरोगे लाभो भवति ।

**2. अपस्माररोगः**

भौमेन सह चन्द्रः, भौमेन सह शनिः, भौमेन सह राहुः यदि अष्टमभावस्य स्यात् तर्हि अपस्माररोगस्य सम्भावना भवति । यथा - **त्रिकोणे** केन्द्रे वा यदि पितृतनुक्षेत्रपतयो दशाभुक्तौ

[6] जा.प.श्लो. 80

तेषामनुमरणमाहुर्मुनिगणः । सभौमे मन्दादये फणियुजे तु वेन्दौ निघनगे, त्वपस्मारस्तस्मान्मेथन्दौ **कृशतनौ** ।[7]

- **उपायः -** योगासनप्राणायाम माध्यमेन कुम्भकप्राणायां कारणेन शीघ्रमेव लाभो भवति। यथा **-योगासन** प्राणायामिति ग्रन्थे स्वामि आत्मानन्दने **लिखित** ।[8]

**3. दन्ताक्षिरोगः**

चन्द्रः वा राहुः द्वादशस्थाने स्यात्, शनिः त्रिकोणस्थाने एवं सूर्यः सप्तमाष्टमभावयोः स्यात्तदा दन्तनेत्ररोगाः जायन्ते । तद्यथा - **चन्द्र**त्यये वा यदि वाऽसुरेशे मन्दे त्रिकोणे मदरन्ध्रगेऽर्के। दन्ताक्षिरोगी च भवेत्तदानीं नीचारिपांशगता**स्तथैव** [9]।

- **उपायः -** नेत्रकष्टे चक्षुषोपनिषदः अनुष्ठानं शुभफलदायकं भवति। सूर्योपासनापि लाभदायका भवति।

**4. स्वतविकारस्य रोगः**

जन्मसमये यदि कन्याराशिस्थचन्द्रः द्वयोः पापग्रहयोः मध्ये भवति तदा स्वतविकारस्य रोगः भवति । अथवा जातकस्य जन्मकुण्डल्यां कर्कराशौ यदि भौमः स्यात्तदा जातकः रक्तविकाररोगेन पीडितो भवति। तद्यथा - **कन्यायां** पद्मिनीशत्रु पापमध्यगतः सदा। रक्तोऽथ शोषजं मृत्युः करोति **ध्रुवमेव हि** ।[10]

- **उपायः -** स्वामिरामदेवेन रक्तशोधनाय चर्मरोगादिनिवारणाय च सूर्यनमस्कारशीर्षासनयोरः उपरि विशेषं बलं दत्तं वर्त्तते। प्रतिदिनं तुलसीपत्रसेवनेन अपि रक्तशुद्धिः भवति।[11]

- **सहायकग्रन्थानां सूची**


1.पाण्डेय, रामचन्द्र, मनसागरी, चौखम्बा कृष्णादास अकादमी, वाराणसी।

2.मिश्रः, सत्येन्द्रः, जातकपरिजातः, चौखम्बा संस्कृत सीरीज, वाराणसी।


[7] जा.प.श्लो. 62

[8] पृ.141 प्रथम-द्वितीय अभ्यासः

[9] जातकपरिजाते पृ.193

[10] मनसागरी पृ.290 श्लो.295

[11] योगासाधना एवं योग चिकित्सा सहस्य पृ.90-91

# आत्मरक्षा उपाय

सुभद्रा दाशः
शिक्षाशास्त्रीद्वतीयवर्षम्
subhadratikili21@gmail.com

भगवान सुन्दर सृष्टि बनाये हैं,
नारी और पुरूषों को भेजे हैं।
क्यों मानव सोचते ऐसा हैं,
भगवान नारी को दुर्बल बनाये हैं ॥१॥
कभी यहाँ कभी वहाँ होता है,
दिन भर ये घटना बढती जाती है।
मानव हैं या दानव हैं ये,
बलात्कार कभी दानव भी न किये हैं ॥२॥
खुद को कभी दुर्बल न समझो,
अपने अन्दर की दुर्गा को समझो।
अकेले जाते कोई सताए तुमको,
उन्हें भगाने का तरीका सीखो ॥३॥
कान के नीचे नस है कमजोर,
रक्षा के लिए मारो वहाँ दो जोर ॥
दो मिनिट वह होगा मूर्छित,
छेडने से पहले होगा चिन्तित ॥४॥
दूसरा तरीका बताती हूँ अब,
ध्यान से याद रखना सब ॥
कोई छूना चाहे शरीर को जब,
झट से मारो उसके यौनाङ्ग में तब ॥५॥
खुद की रक्षा खुद करना सीखो,
छुरी, मिर्च, पैन आदि पर्स में रखो।
मानवरूपी पशु जब पास आए,
इन्हीं सब चीजों से मार भगाएं ॥६॥

शोभायात्रा से कुछ नहीं होता,

आत्मरक्षा खुद करनी होती है।

कमजोर कोई लड़की नहीं है,

शक्ति उसमें झाँसी की रानी की है ॥७॥

******************

# शिक्षाक्षेत्रे आधुनिकशिक्षकः


जागृति आढ्य

शिक्षाशास्त्री द्वितीयवर्षम्

jagruti.adhya@gmail.com


- **शिक्षा का ? -** शिक्षा भवति अर्न्तनिहितशक्तीनां बहिरानयनम् । शिक्षा भवति आजीवन-प्रचाल्यमाना एका प्रक्रिया । शिक्षायाः आङ्ग्लपदं भवति "Education" । एतत् पदं लेटिनभाषायाः "Educatum", "Educare" तथा "Educere" एतेभ्यो पदेभ्यो निष्पन्नः भवति । Educatum शब्दस्यार्थः आन्तरिकवस्तूनां बहिरानयनम् । Educare शब्दस्यार्थः लालनं पालनं च । Educere शब्दस्यार्थः प्रेरणाप्रदानम् इति ।
- **कः शिक्षकः ? -** यः सर्वेषां प्रतिनिधिरूपेण सर्वान् सुमार्गे संचालयति तस्य नामकरणं शिक्षकत्वेन अस्माभिः निर्धायते । वेदेऽपि उच्यते "आचार्यदेवो भव" । शिक्षकस्य स्थानं सर्वत्र वरीवर्ती । शिक्षकः सर्वत्र गुरुः, आचार्यः, अध्यापकः इत्यादिरूपेण अभिज्ञायते । अतः एव ज्ञानप्रदायकः, गुणशीलसम्पन्नः, प्रेरणादायकः, अन्धकारनिरोधकः शिक्षकपदस्य पदवाच्यम् । तस्मात् उच्यते अज्ञानतिमरान्धस्य ज्ञानाञ्जन शलाकया । चक्षुरून्मीलितं येन तस्मै श्री गुरवे नमः ।
- **पुरातनीयशिक्षा** – पुराकाले बालकाः गुरुगृहे निवासं कृत्वा अध्ययनं कुर्वन्ति स्म । छात्राः केषाञ्चित् नियमानां पालनं कुर्वन्ति स्म । विद्यार्थी स्वगुरोराज्ञायाः पालनं सर्वदा करोति स्म । वैदिककालीनाः प्राचीनतमाः शिक्षणसंस्थाः ऋषीणां ग्रामेषु आसन् । पुरा शिक्षकः पूर्ण घटः सदृशः आसीत् । उद्याने बहूनि पुष्पाणि तिष्ठन्ति यथा, तथैव विद्यालयाः उद्यानत्वेन आसन् । तदानीतमसमये गुरुशिष्यसम्बन्धः दृढतरः आसीत् । तदानीन्तसमये शिक्षकः मार्गदर्शकः भवति स्म । छात्राः च जानन्ति स्म यत् शिक्षकस्य कर्त्तव्यं भवति मार्गदर्शनम् इति ।

- **आधुनिकशिक्षा** – आधुनिके युगे शिक्षकाणां भूमिका योगदानं च राष्ट्रनिर्माणक्षेत्रे अत्यन्तविचारयोग्यः भवति । सम्प्रति शिक्षा व्यवसायसम्पन्ना जाता परन्तु पुराकाले नासीत् एषा व्यवस्था । अस्याः समस्यायाः मूलोत्पाटनं कर्त्तुम् इदानीम् अध्यापकाः तत्पराः भवेयुः । सुराष्ट्रनिर्माणं तदा सम्भवति यदा सर्वेषां मनस्सु राष्ट्रप्रीतेः भावना जागर् ति । तदर्थम् अध्यापकाः प्रयत्नं कुर्वन्ति, बाल्यकालात् आरभ्य यौवनपर्यन्तम् । एवमेव न केवलं शिक्षाक्षेत्रे अपि तु राजनैतिक-वैज्ञानिक-सामाजिक-आर्थिक-सांवेगात्मक-कृषि-स्वास्थ-प्राकृतिकपदार्थ-संरक्षण प्रदूषणनिराकरणं यदि सम्यक् भवति चेत् अपि स्वर्णमयराष्ट्रनिर्माणं सम्भवति । विश्वे अनेके गुरुकल्पाः विद्वासः यथा वाल्मिकिविश्वामित्रवसिष्ठकण्वादयः अभवन । आधुनिकयुगे ए.पी.जे अब्दुलकलाम, सर्वपल्लिराधाकृष्णन्, रविन्द्रनाथटैगोर, सि.वी.रमण, विवेकानन्दः इत्यादयः ।
- **उपसंहारः** – आधुनिकसमये प्रौद्योगिक्याः माध्यमेन सर्वेषु क्षेत्रेषु संगणकोपयोगद्वारा गृहकार्यं साधयितुं शक्यते । एवमेव न केवलं शिक्षाक्षेत्र अपि तु सर्वेषु क्षेत्रेषु स्वीय आचारव्यवहारद्वारा सर्वान् नागरिकान् प्रेरयन्ति अधुना अध्यापकाः । एतदर्थम् अध्यापकानाम् अवदानम् अत्यन्तं प्रत्यक्षरूपेण सहभागीरूपेण च भवति ।

**सन्दर्भग्रन्थाः**


1. पुरातनी शिक्षा, प्रकाशिका – मिश्रा श्रीमती मञ्जू, मृगाक्षी प्रकाशनम्, विराम खण्ड, गोमति नगर, लखनऊ (उ.प्र), प्रथमसंस्करणम्-2004 डॉ लोकमान्य मिश्र ।
2. शिक्षा की दार्शनिक पृष्ठभूमि। ओड.लक्ष्मीलाल, राजस्थान हिन्दी अकादमी,जयपुर, संस्करणम् - 2014,
3. www.rajhga.com


******************

# हम्पिवैभवम्


राघवेन्द्र नरसिम्ह गांव्करः
शिक्षाशास्त्रीद्वितीयवर्षम्
graghu319@gmail.com


ऐतिहासिकस्थलं भवति हम्पी । कर्णाटकराज्ये बल्लारि-इत्यस्मिन् जनपदे विद्यते स्थलमिदम् । 1226 तः 1565 पर्यन्तं हम्पी विजयनगरसाम्राज्यस्य राजधानी आसीत् । हम्पिराज्यस्य पुरातननाम पम्पा इति । गच्छता कालेन विजयनगम् अथवा विरूपाक्षपुरम् इति प्रसिद्धः जातः । एवं

“युनेस्कोविश्वपरम्परास्थानम्” इति हम्पिराज्यं सर्वकारेण उद्घोषितम् । विजयनगरस्य राजा कृष्णदेवरायस्य काले “हम्पिबजार” इत्यस्मिन् स्थाने वज्राऽभरणानां क्रयणं कुर्वन्ति स्म । अस्मिन् हम्पिनगरे द्रोण्या मापनं कृत्वा व्यापारं भवति स्म । शाकानां क्रयणस्य अपेक्षया वज्राऽभरणानाम् एव आधिक्यं वर्त्तते स्म । एतादृशवैभवयुक्ते राज्ये कृष्णदेवरायस्य कालात् अनन्तरकाले तालिकोटयुद्धस्य प्रभावेण मुस्लिमजनानाम् आक्रमणेन हम्पिराज्यस्य अवनतिः जाता । हम्पिराज्ये शिल्पेन निर्मिताः विग्रहाः दरीदृश्यन्ते । तेषां नाशाय सततं षण्मासाः सैनिकैः स्वीकृताः । अधुना विरूपाक्षदेवालयः, हजाररामदेवस्थानम्, पाषाणेन निर्मितः रथः, महानवमी दिब्बः, सासिवेकालुः गणपतिः, उग्रनरसिम्हः, कमलप्रासादः, बडिविलिङ्गम्, गजशाला एवं च सुप्रसिद्धः सप्तस्वरशिलास्तम्भः अत्रत्य वैशिष्ट्यम् । एतानि सर्वाणि प्रसिद्धस्थानानि ।

हम्पिराज्ये नयनमनोहरसुन्दरनदी तुङ्गभद्रा प्रवहति । अत्रत्य वातावरणं, वास्तुकला, देवालयाः च नयनयोः आनन्दं जनयन्ति इत्यत्र नास्ति संशयलेशः । विदेशीयाः अत्रत्यं सौन्दर्यं दृष्ट्वा मुखविस्मिताः । कर्णाटकराज्यसर्वकारेण प्रतिवर्षं जनवरिमासे विजयनगरसाम्राज्यस्य वैभवस्य पुनः प्रदर्शनार्थं “हम्पी उत्सवः” इति आयोज्यते ।

- **सन्दर्भग्रन्थसूची –**


- www.hampi.in


******************

## केरलराज्ये संस्कृतशिक्षणस्य वर्तमानकीलीनस्थितिः


दिपिन्

शिक्षाशास्त्रीद्वितीयवर्षम्


भारतस्य विद्याभ्यासाय सांस्कृतिकमण्डलेषु केरलस्य स्थानं सर्वप्रथमं भवति । भारतस्य राज्येषु सम्पूर्णसाक्षरता प्रथमतया केरलाय प्राप्तमस्ति । केरलस्य शैक्षिकक्षेत्रे इदानीं बहुपरिवर्तनानि जायन्ते । नूतनप्रविधिः एव तत्र कार्यं करोति । केरलस्य संस्कृतिः महत्त्वपूर्णा भवति । सांस्कृतिकवैविध्यानां देशः इत्यपि प्रसिद्धमस्ति केरलम् । तस्य कारणं किमित्युक्ते अत्र विभिन्नजातिविभागानां , जनविभागानां, प्रादेशिकसंस्कृतीनां भाषाभेदानां च वैविध्यात्मकं समग्रस्वरूपं भवति ।

यथा भाषा तथा देशः इति वयं सर्वे श्रुतवन्तः । केरलस्य मातृभाषा मलयालं भवति । मलयालम् इति यदा श्रूयते तदा सर्वेषां मनस्सु केरलम् इति भावना भवति । सा भवति भाषा । अस्यां

मलयालभाषायां विद्यमानानि अधिकानि पदानि संस्कृतभाषायाः भवन्ति । संस्कृतभाषायाः स्वाधीनं मलयालभाषायां बहुः अस्ति । सर्वासां भाषाणां जननी भवति संस्कृतभाषा । मणिकणेषु सूत्रमिव संस्कृतभाषा नानाभाषाणां समन्वयनं कुर्वती अस्ति । अस्माकं राज्ये विद्यमानसहस्राधिकभाषासु संस्कृते एव भारतस्य सांस्कृतिकविचाराः, नैतिकमूल्यानि , शास्त्रीयसिद्धयः च समाकलिताः । तस्मात् उच्यते "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" विना वेदं विना गीतां विना रामायणीं कथां विना कविं कालिदासं भारतं भारतं न हि । एतादृश्याः संस्कृतभाषायाः शिक्षणं केरले अपि चलति । केरलेषु विद्यालयेषु प्रथमकक्ष्यातः आरभ्य छात्रेभ्यः संस्कृतं पठितुम् अवसरः अस्ति । उच्चस्तरीयकक्ष्यासु छात्राः ऐच्छिकरूपेण संस्कृतं पठन्ति । 2014 तमे वर्षे केरलसर्वकारेण उद्घोषितमासीत् केरलेषु प्रथमकक्ष्याताः आरभ्य पाठ्यक्रमे अवश्यं संस्कृतं भवेत् इति । किन्तु अधुनापि सर्वेषु विद्यालयेषु संस्कृतं न पाठ्यते । नूतनाध्यापकानां नियुक्तिः अपि न जायमाना अस्ति । यत्र पूर्वमेव पञ्चमीकक्ष्यातः संस्कृतं पाठ्यते तत्रत्य अध्यापकाः एव स्वयं प्रयासं स्वीकृत्य प्रथमकक्ष्यातः संस्कृतं पाठयन्ति ।

विद्यालयेषु पञ्चमीकक्ष्यातः आरभ्य छात्रेभ्यः इष्टानुसारं भाषां चित्वा पठितुम् अवसरः वर्त्तते । तत्र ऐच्छिकरूपेण संस्कृतमपि विद्यते । तत्रापि केचन छात्राः इष्टेन संस्कृतं पठन्ति । केचन छात्राः केवलम् अङ्कानां कृते संस्कृतं पठन्ति । संस्कृतपरीक्षायां किमपि न लिखति चेदपि अङ्कान् प्राप्नुवन्ति इति तेषां मतिः । तस्य कारणं भवति संस्कृतं पठितुम् अधिकाः छात्राः न आगच्छन्ति इत्यतः अध्यापकः छात्रान् आकर्षयितुं परीक्षायाम् उत्तमाङ्कान् ददति । वर्तमानकेरले मलयालं विद्यालयेषु पठति चेदेव सर्वकारपक्षतः उद्योगं प्राप्नुवन्ति इति नूतन नियमः आगतः । तस्मात् कारणात् मातापितरौ पुत्रान् संस्कृतं पठितुं न प्रेरयन्ति । संस्कृतशिक्षणस्य केरलस्य वर्तमानकालस्थितिः भवति एषा । केरलस्य संस्कृतशिक्षणक्षेत्रे इतोऽपि काश्चन समस्याः वर्त्तन्ते । तद्यथा –

- संस्कृतं संस्कृतभाषया अध्यापयितुं शिक्षकाणाम् अभावः ।
- संस्कृतस्य क्षेत्रम् इतरक्षेत्रमिव विस्तृतं न दृश्यते ।
- संस्कृतस्योपरि सर्वकारस्य अनादरभावः ।
- पाठ्यक्रमेषु कुत्रापि संस्कृतभाषायाः अनिवार्यता नास्ति ।
- संस्कृतं प्रति छात्राणाम् अनाग्रहभावः ।
- संस्कृतक्षेत्रे उद्योगानाम् अभावः ।
- पाठ्यपुस्तकेषु कालानुगुणम् आधुनिकविषयाणां समावेशः न दृश्यते ।

▪ **सन्दर्भग्रन्थसूची**


१. रसना मासिकी केरलम्, Asmitha Publication Kozikodu, Main Editor Dr. K Syanala

२. Source from internet, www. kerala.edu.in

# व्याकरणशास्त्रशिक्षणे प्राचीनाधुनिकशिक्षणपद्धत्योः तुलनात्मकविवेचना

निधि आर्या
शिक्षाशास्त्रीद्वितीयवर्षम्
nidhiarya2003@gmail.com

**उपोद्घातः** – **"छन्दः** पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात्साङ्गमधीत्यैव ब्रह्मलोके **महीयते"** ।।[12] इत्यत्र षडङ्गशास्त्रेषु व्याकरणम् अन्यतमम् उक्तम् । व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेनेति व्याकरणम् । विआङित्युपसर्गयोः पूर्वकं कृञ्धातोः ल्युट्प्रत्यये सति व्याकरणमिति शब्दः निष्पद्यते । व्याकरणे प्रकृतिप्रत्ययादीनां विवेचनमेव प्रधानमिति मुख्यार्थः । व्याकरणशास्त्रस्यापरं नाम शब्दानुशासनमिति । शब्दानां साधुत्वनिरुपणम्, असाधुशब्दानां निवारणञ्च अस्य शास्त्रस्य प्रधानं कार्यं वर्त्तते । भारतीयपरम्परायां धर्माधर्मयोः कर्त्तव्याकर्त्तव्ययोः सत्यासत्ययोः विवेकज्ञानार्थं श्रुतिस्मृतिशास्त्राणि प्रमाण्यन्ते । अत एव प्रमाणभूतं शास्त्रम् अस्मत्संस्कृतेः आवश्यकं तत्वं वर्त्तते । संस्कृतस्य अनेकानि शास्त्राणि सन्ति तद्यथा व्याकरणशास्त्रं, निरुक्तशास्त्रं, योगशास्त्रं धर्मशास्त्रं, ज्योतिशास्त्रं, गणितशास्त्रम् इत्यादीनि । एतेषां शास्त्राणां शिक्षणपरम्परा अतिप्राचीनकालाद् अद्यावधि अनुवर्त्तते । तेषु पाणिनीयव्याकरणं समग्रविश्वे अप्रचलत् एवं संक्षिप्तकारणेन सुप्रसिद्धमस्ति । एतदेव व्याकरणमधुनापि पठनपाठने प्रचलति । शास्त्रशिक्षणेन शास्त्रस्यैषा परम्परा रक्षिता भवति । एतेन शास्त्रज्ञानेन ऐहिकामुष्मिकफलप्राप्तये सौकर्यमस्ति । अपि च मनुष्यस्य तृतीयं नेत्रं भवति ज्ञानम् इति "**नहि** ज्ञानेन सदृशं पवित्रमिह **विद्यते**"[13] गीतायामुक्तमस्ति । यतोहि भारते ज्ञानमेव सर्वदा वाचि राराजते । इमानि ज्ञानमयानि शास्त्राणि शिक्षणपरम्परया एव रक्षिताः संवर्धिताः च । परन्तु गच्छताकालेन एतस्याः शिक्षणपरम्परायाः गुणवत्ता प्रतिदिवसं क्षीयमाणा दृश्यते । अतः व्याकरणशिक्षणस्य प्राचीनपद्धतयः काः ? तस्य तुलनात्मकविवेचना अत्र विचार्यते ।

- **व्याकरणशिक्षणस्य प्राचीनपद्धतयः** – व्याकरणशिक्षणस्य बहव्यः प्राचीनपद्धत्यः सन्ति । तासु कतिचन एवं सन्ति यथा सूत्रविधिः, टीकाविधिः, भाष्यविधिः, अष्टाध्यायीविधिः आदयः ।

[12] पा.शिक्षा.41/42
[13] श्रीमद्भग्वद्गीता ।

- **व्याकरणशिक्षणस्य आधुनिकपद्धतयः-** वर्तमानकाले येषां शिक्षणविधीनां व्याकरणपाठनावसरे प्रयोगो भवति, ते विधयः यथा आगमनविधिः, अन्वेषणविधिः, निगमनविधिः, सम्भाषणविधिः, समस्याविधिः, अनुवादविधिः, प्रयोजनाविधिः, प्रयोगविधिः आदयः।
- **व्याकरणशिक्षणस्य प्राचीनाधुनिकशिक्षणपद्धतयः** - संस्कृताध्ययने अध्यापने च धाराद्वयं प्रवर्त्तते । एका प्राचीनपद्धतिः द्वितीया चाधुनिकपद्धतिः । संस्कृतशिक्षणप्रसङ्गे तत्रापि विशिष्य व्याकरणशिक्षणप्रसङ्गे द्वयोः प्रमुखं स्थानं विद्यते। यथा
- **प्राचीनपद्धतिः** - प्रो.बाफमहोदयानां विचारः वर्त्तते यत् संस्कृतभाषा एकस्मिन् काले विश्वस्य केवलमेका प्रथमा भाषा आसीत् । प्राचीनपद्धत्यनुसारम् अस्माकं देशस्य एनां गौरवमयीं संस्कृतमयीं च भाषा उच्यते । प्राचीनपद्धतेः तात्पर्यमिदमस्ति यत् एतादृशी शिक्षणव्यवस्था यत्र अध्ययनाध्यापनञ्च नियमितरूपेण सुसंस्कारैः आश्रमेषु, गुरुकुलेषु, विद्यापीठेषु, पाठशालासु च प्रचलन् आसीत् । यदा भारते आधुनिकसंसाधनानां वैज्ञानिकयन्त्राणां वैज्ञानिकविकासस्य च प्रभावः नासीत् तदा अस्याः पद्धतेः प्रभावं ददर्शः । वैदिककालदेव गुरुकुलेषु एतद् परम्परानुगुणं शिक्षणकार्यं प्राचलत् । विद्यायाः रूपद्वयं व्यवहारे आसीत् पराविद्या, अपराविद्या च । उपनयनादिभिः क्रियाभिः छात्रजीवनस्य संस्कारस्य इयं विशिष्टा पवित्रा च व्यवस्था आसीत् । गुरोः समीपे अन्तेवासिभूत्वा छात्राणां जीवनम् ऊर्ध्वमुखम् आसीत् । पाठ्यक्रमे वेदाङ्गानाम् अध्ययनमध्यापनञ्च व्यावृतम् । षड्दर्शनानां शनैः शनैः पाठ्यक्रमे समायोजनम् अभवत् । कालान्तरे धर्मं प्रति रूचेः प्रभावात् धर्मशास्त्रस्य प्रादुर्भावः जातः । गुरुमुखात् अष्टाध्यायीसूत्राणां, वेदानां, पदानां लकाराणाञ्च मौखिकाभ्यासद्वारा श्रवणं श्रावणञ्चासीत् । अनेन विधिना छात्राः उत्तरोत्तरं ज्ञानार्जनं कृत्वा भाविकालिकाध्यापकाः भूत्वा तस्य ज्ञानस्य प्रसारप्रचारश्च कुर्वन्ति स्म। इयं ज्ञानस्य एका अनवरतप्रक्रिया आसीत्।
- **आधुनिकपद्धतिः** - तम 1800शताब्द्यां वैज्ञानिकयान्त्रिकसंसाधनानाम् आविष्कारेण नूतनजीवनधारायाः प्रादुर्भावः जातः । संसारे जनानां जीवने परिवर्तनम् अभवत् । जीवनमूल्यानि परिवर्तितानि । सामाजिकमान्यतासुधार्मिकविचारेषु च ,नैतिकविचारेषु , परिवर्तनम् अभवत् । एतस्य प्रमुखं कारणम् औद्योगिकविकासः एव मन्यते । अस्मिन् काले शिक्षाक्षेत्रेऽपि महान् प्रभावः सञ्जातः । संस्कृतभाषाक्षेत्रे तमे 1835 वर्षे **लार्ड मैकालेमहोदयस्य**दुष्प्रचारेण संस्कृते व्याघातं जातम् । संस्कृतभाषायाः अध्ययनमध्यापनञ्च आङ्गलभाषामाध्यमेन प्रारब्धम् । पारम्परिकपाठशालानां कलाशालानां गुरुकुलानां च स्थाने

नूतनविश्वविद्यालयाः शिक्षाक्षेत्रे निर्मिताः । तेषु विश्वविद्यालयेषु आङ्गलभाषा एव शिक्षणस्य माध्यमम् अभवत् । शनैः शनैः प्राचीनपरम्परा ह्रासोन्मुखी अभवत् ।

- **उपसंहारः-** प्राचीनसंस्कृतेः भाषा संस्कृतं बहुप्राचीनं वर्त्तते । एवं वक्तुं शक्यते यत् संस्कृतव्याकरणाध्ययनस्य या पारम्परिकी नियमिता च पद्धतिरासीत् । तस्याः स्थानं वर्तमानाधुनिकीधारया लब्धम् । परमद्यापि विद्वांसः तां पारम्परिकपद्धतिम् अनुसर्तुमेव निर्दिशन्ति इति ।

**सन्दर्भग्रन्थः-**


1 – आर. देवनाथन्, व्याकरणशिक्षणविधयः ।

2 – उपाध्यायः भुवनेशः, (1992) भारतीयविद्यासंस्थानम्, वाराणसी


******************

# एक विचार


स्मृतिमञ्जरी राउत

शिक्षाशास्त्री द्वितीयवर्षम्

smrutimanjaria147@gmail.com


जिस प्रकार से कदम आगे पीछे होते रहते हैं , संसार में भी सभी प्रणियों की ऐसी ही स्थिति होती रहती है । ये विचित्र नहीं है परन्तु आज विश्व में श्रेष्ठ प्राणी कहलाने वाला मनुष्य समझने के लिए नाकामयाब दिखता है । हर क्षेत्र में हिंसा, क्रोध, घृणा, अधर्म तथा अंहकाररूपी प्रतिद्वन्दियों से घिरा रहता है । मानव की आँख में दो पुतलियां होती हैं, एक आगे जो दूसरों की गलतियां देखती है , और दूसरी पीछे जो अपनी गलती देखते हुए भी अनदेखा कर देती है । महाभारत में भी ऐसा ही हुआ था । अश्वत्थामा ने ब्रह्मास्त्र छोडकर अपनी वीरता दिखाने की मन्शा से विनाश को पुकारा । बिना सोच समझकर लिए हुए निर्णय विवेक को भ्रष्ट कर देते हैं, उसी की सजा आनेवाली पीढी को भोगना पडता है । राजनैतिक क्षेत्र में भी वही हाल है , किसी को जिन्दगी जीने के लिए एक समय का भोजन भी नहीं मिलता, दूसरी तरफ खाना नष्ट तो कहीं हजम करने की भी फुरसत नहीं । सच में भगवान की सृष्टि विचित्र है , हम अपना भाग्य नहीं बदल सकते है किन्तु आदत में तो परिवर्तन ला ही सकते हैं । हो सकता है यही आदत हसारे भविष्य को बदल देगी । गीता, कुरान, गुरुग्रन्थ सब यही कहते हैं । हर क्षेत्र में आज हमारा प्राधान्य है, फिर भी कुछ कम है तो वो है “विचार” । इस अमृतमयी धरती में हम

प्रकृति का भिन्न-भिन्न स्वाद लेते हैं। उस के बाद भी हम अपने विचारों में बदलाव नहीं लाते हैं। जब तक हम खुद को नहीं पहचानेंगे तब तक दूसरे को जानना नामुमकिन है। सब कुछ बदल चुका है। हमें भी जातीय संहति तथा संस्कृति स्थापित करने के लिए उदाररूपी कदम बढाना चाहिए। जैसे सूरज की किरण सभी के मन में सकरात्मकता लाती है उसी किरण की तरह एक अच्छा विचार मन में खुद लाना पडेगा।

*****************

## प्राचीनार्वाचीनशिक्षकयोः मनोवैज्ञानिकचिन्तनम्

सुश्रीस्मिता खुण्टिआ
शिक्षाशास्त्रीद्वितीयवर्षम्
khuntiachinu4@gmail.com

- **उपक्रमः -** आजीवनप्रक्रिया भवति शिक्षा। मानवः विभिन्नेभ्यः स्थलेभ्यः शिक्षां प्राप्नोति। परं मानवस्य शिक्षा कुतः प्रारब्धा ? इति पश्यामः तर्हि उत्तरमायाति मातृगर्भादेव। अयं मानवः कालं परिवेशञ्च अनुसृत्य स्वव्यवहारास्य शाश्वतपरिवर्तनं करोति। अतः यदि वयं कालं गृहीत्वा मनोविज्ञानं तथा मनोवैज्ञानिकचिन्तनं पश्यामः तर्हि तद् द्वविधं भवति। प्राचीनकालः अर्वाचीनकालः च। अस्मिन् संसारे मानवः औपचारिकरूपेण अनौपचारिकरूपेण तथा च निरौपचारिकरुपेण शिक्षां प्राप्नोति। अतः औपचारिकरूपेण विद्यालये यः अध्यापयति सः गुरुः इति जनीमः। परन्तु अधुना प्राचीनार्वाचीनगुरूणाम् विषये तथा तेषां शिक्षाक्षेत्रे मनोवैज्ञानिकचिन्तनं कथमासीत् इत्यत्र तुलनां करोमि।
- **कः गुरुः ? -** प्राचीनकाले यः अध्यापयति स्म, सः गुरुः, आचार्यः, उपाध्यायः, प्रवक्ता, श्रोत्रियः, अध्यापकः इति नाम्ना ज्ञायते स्म। सच्चिदानन्दस्वरूपः गुरुः इति। अतः उच्यते "गकारः सिद्धिदः प्रोक्तौ रेफः सत्वप्रकाशकः। उकारस्तु शिवपादात्तयं दद्यादिति **गुरुस्मृतः"** परन्तु आधुनिककाले शिक्षकः अस्ति "TEACHER" इति। T – Tactful or Trained In Teaching methodology .E – Enthusiasm .A – Address or Attentiveness . C – Capacity of Leadership .H – Honesty .E – Emotional Stability .R –

Respectful or Reserved इति आधुनिकशिक्षकस्य स्वरूपं भवति । अतः प्राचीनार्वाचीनशिक्षकयोः शिक्षणक्षेत्रेष्वपि चिन्तनं भिन्नं भवति ।

- **शैक्षिकक्षेत्रे शिष्यस्य विकासाय चिन्तनम्** – प्राचीनकाले अध्यापकस्य चिन्तनं आसीत् शिष्यस्य कर्मानुसारेण । ते वदन्ति ब्राह्मणकुले समुत्पन्नः पुत्रः क्षत्रियः, वैश्यः, शूद्रोऽपि भवितुमर्हति । एतद् सर्वं तस्य कर्मानुसारं भवति । परन्तु अधुना ये मनोवैज्ञानिकाः सन्ति ते वदन्ति “ **मह्यं** विविधवंशजान् २२ स्वस्थबालान् ददातु । अहं तान् वैद्यः, अभियन्ता, शिक्षकः, लिपिकः इत्यादीन् करोमि । यदि भवान् आकाङ्क्षते चोरान् अपि निर्माय प्रदर्शयति **इति”[14] ।**
- **छात्रस्य व्यक्तित्वमवगमनाय चिन्तनम्** –प्राचीने काले अध्यापकः छात्रस्य व्यक्तित्वस्य परीक्षणाय उपनयनसंस्कारात्प्राक् क्षण्मासपर्यन्तं निरीक्षणं करोति स्म । शिष्यस्य व्यवहारं दृष्ट्वा तस्य मूल्यांकनं करोति स्म । यदा विद्या-अध्ययनाय शिक्षकस्य सम्मुखं गच्छन्ति स्म । तदा वदति स्म यत् आजार्च ! अहं तव निधिः**,** रक्ष इति । अत एव मह्यं सुशिष्यैव ददातु[15] इति । आधुनिकयुगे अध्यापकाः व्यक्तित्वं ज्ञातुं विभिन्नाः परीक्षाः कुर्विन्ति स्म । अध्यापकः मनेविज्ञानं पठित्वा छात्रस्य व्यक्तित्वं निरीक्षते स्म । यद् मनोविज्ञानं सम्प्रति पृथक् शास्त्रत्वेन अस्ति तद् शास्त्रं पुराकाले ऋषिभिः अध्ययनाय व्यावहारिकं कृतम् ।
- **छात्र शिक्षकयोः सम्बन्धः** – साम्प्रतिकयुगस्य जनाः प्रविधिशास्त्रस्य स्वजीवने उपयोगं कुर्वन्ति । अतः शिक्षकाः शिक्षाक्षेत्रे मनोविज्ञानशास्त्रं पठित्वा कक्ष्यायां कथं व्यवहारः करणीयः इति जनाति । अर्थात् छात्रशिक्षकयोः मध्ये कथं अन्तर्क्रिया भवेत् ? तस्मिन् विषये अधुना शिक्षकाः प्रशिक्षणम् प्राप्नुवन्ति । परन्तु इत्यस्मिन् विषये प्राचीनकाले विशेषरूपेण व्यवस्था दृश्यते । कारणं गुरूशिष्ययोः मध्ये पितापुत्रसम्बन्धः आसीत् । महाभारते प्रमाणरूपेण वर्णितं यत् “**स** आवृणोत्यमृतं संप्रयच्छन् तस्मै न द्रुह्यत् कृतमस्य ज्ञानम्, गुरुं शिष्यो नित्यमभिवादयति स्वाध्यायामिच्छेच्च **सदाऽप्रमत्तः”[16] ॥**
- **अनुशासनक्षेत्रे अध्यापकस्य चिन्तनम्** – शैक्षिकक्षेत्रे अनिशासनम् अपरिहार्यं भवति । अतः प्राचीनकाले गुरवः गुरूकुले अनुशासनस्य प्राधान्यं दत्तवन्तः । तस्मिन् समये अनुशासनाय दमनवादः, प्रभाववादः, मुक्तिवादः चेत्यादयः अध्यापकाः प्रयोक्तवन्तः । परन्तु

[14] शिक्षायाः मनोवैज्ञानिकाधाराः पृ. ४१

[15] पुरातनी भारतीय शिक्षा, पृ.१५

[16] महाभारतम् ।

अधुना अध्यापकाः स्वतन्त्रतावादं स्वकक्षायां प्रयुङ्क्ते । अतः भारतदेशे दण्डमुक्तशासनव्यवस्था प्रचलिता अस्ति ।

- **उपसंहारः** – प्राचीनार्वाचीनशिक्षकयोः मध्ये यदि तुलना क्रियते तर्हि पार्थक्यं विशिष्टं न लभते । अधुना शिक्षकाः नूतनप्राविधीनाम् आधारेण शिक्षां यच्छन्ति । परन्तु यद् व्यवहारशास्त्रं पृथक् रूपेण पठित्वा अध्यापकाः कक्षायाम् अनुसरन्ति, तदैव प्रविधिशास्त्रं पुराकाले आसीत्। परन्तु तेषां चिन्तनम् अधुना एव प्रयोक्तव्यो भवति । अतः उच्यते सर्वदा प्राचीनं सुवर्णं भवति । Old Is Gold इति ।

- **सहायकग्रन्थसूची** –


१. बी. पद्ममित्रश्रीनिवासः, शिक्षायाः मनोवैज्ञानिकाधाराः, जगदीशसंस्कृतपुस्तकालयः जयपुरम्, संस्करणम्-२०१२ (ISBN-978-93-80857-43-5) ।

२. श्रीमती मञ्जू मिश्रा, आधुनिकं शिक्षामनोविज्ञानम्, मृगाक्षी प्रकाशनम्, लखनऊ, प्रथमसंस्करणम्, २००५ ।

३. प्रो. लोकमान्यमिश्रः, भारतीया पुरातनी शिक्षा, मृगाक्षी प्रकाशनम्, लखनऊ, प्रथमसंस्करणम्, २०११ ।

४. डॉ. मदनमोहन झा, विद्यालयप्रबन्धनम्, प्रकाशनम् – १००८ ।


******************

## नारीणां सशक्तीकरणम्


मामा जेना

शिक्षाशास्त्री द्वितीयवर्षम्

**jenamama626@gmail.com**


अस्माकं समाजे वैदिककाले नारीणां गौरवास्पदं स्थानम् आसीत् । यथा - **न गृहं** गृहमित्याहुः गृहिणी गृहमुच्यते । यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता इति शास्त्रप्रमाणम् । किन्तु मध्ययुगे तासां स्थितिः दर्शनीया संवृत्ता । ताः भोग्याः सन्तानोत्पादनहेतवे एव उदिष्टाः जाताः । सैव स्थितिः प्रायः वर्तमानयुगे अपि संलक्षते । अत एव ताषाम् अधिकाररक्षणार्थं विविधाः प्रयोगाः प्रवर्त्तन्ते । कदाचित् समाधिकारचर्चा कदाचित् आयोगादिगठनम् । केन्द्रियसंस्थादिष्वपि बहुवर्षस्य पूर्वम्

आरक्षणविधेयकः प्रस्तुतः । परं साम्प्रतं यावत् न काचित् सन्तोषप्रदा प्रगतिः नारीणां गौरवस्य संरक्षणार्थमं दृश्यते । ताषां सशक्तीकरणं परमावश्यकम् । भारतीयसंविधाने स्त्रीभ्यः केचन विशिष्टाः अधिकाराः प्रदत्ताः सन्ति । यथा समानाधिकारः । पुरूषां स्त्रियोऽपि स्वेच्छानुसारं विवाहं कर्त्तुं प्रभवन्ति । पितुः पत्युश्च सम्पत्तौ तासां समानः अधिकारः । शिक्षाक्षेत्रे व्यापारवृत्तौ च ताः समानाधिकारं भजन्ते । सामाजिकराजनैतिकगतिविध्यादिषु ताषां समानाधिकारः । तत्र कश्चन भेदभावः संविधानविरूद्धः । परन्तु संविधानप्रदत्ताधिकारः शिक्षिताः अपि युवत्यः न जानन्ति । का कथा अशिक्षितानां स्त्रीणाम् । एव संविधाने सत्यपि समानाधिकारविधाने व्यवहारिकक्षेत्रे न तथा तस्य सदुपयोगः दृश्यते यथा आवश्यकमस्ति । एतस्य विशिष्टं कारणं वर्त्तते नारीणां असंगठितत्व-जागरूकतायाः अभावः । संगठितप्रयत्नस्याभावः संगठनं प्रति ताषाम् उपेक्षादृष्टिः संवेदनशीलतायाः अभावः । यदि ताः संगठिता भवेयुः तर्हि न किञ्चत् दुर्लभम् । नारीणां सशक्तीकरणे काश्चन अन्याः अपि बाधाः सन्ति । ताः नारीणाम् अशिक्षा, रूढिवादिप्रभृतयः आदयः । ततोऽपि विशिष्टं कारणं वर्त्तते वर्तमान राजनीतेः दूषणम् । तत्र अपराधितत्त्वस्य बुद्धिः । राजनैतिकसत्तायाः कृते बहुमतम् आवश्यकम् ।

******************

## वायुमण्डलस्य स्तराः


राजलक्ष्मी बिश्वालः

शिक्षाशास्त्री द्वितीयवर्षम्

**rajlaxmi8454@gmail.com**


- **प्रस्तावना** – पृथिव्याः चतुर्पार्श्वे वायोः आवरणं वर्त्तते, तस्य नाम भवति वायुमण्डलम् । वायुमण्डलं भू-पृष्ठात् 16 कि.मी उच्चतापर्यन्तं विस्तृतं वर्त्तते । वायुमण्डलस्य तापमात्रा, चापः, घनत्वम् आदि सर्वत्र समानं न वर्त्तते । वायुभिः पृथिवी आच्छादिता वर्त्तते । अस्मिन् वायुमण्डले मनुष्याणां कृते तथा जन्तूनां कृते जीवनाय आवश्यकवायुः (आँक्सीजन्) प्राप्यते । वायुः तु सर्वत्र वर्त्तते परन्तु तद्दृष्टुं न शक्नुमः किन्तु अनुभवं कर्तुं शक्नुमः । वायुः वर्णहीनः, गन्धहीनः च भवति ।
- **वायुमण्डलस्य सङ्घ▯नम्** – वायुमण्डलं वायुभिः, जलवाष्पेन, धूलिकणैः च निर्मितमस्ति । श्वसनक्रियायां वयं वायोः उपयोगं कुर्मः । वायुमण्डले बहवः वायवः प्राप्यन्ते । वायवः नामानि यथा – नाइट्रोजन्, आँक्सीजन्, कार्बन्-डाई-आँकसाइड्, हीलियम्, ओजोनइत्यादयः वायवः मिलन्त्यैव वायुमण्डले । तेषु नाइट्रोजन्, आँक्सीजन् च मुख्यं वर्त्तते । वायुमण्डले स्थितानां

वायुनां भागं एवं वर्त्तते – नाइट्रोजन् -78 प्रतिशत् भागं, आँक्सीजन् - प्रतिशत् 21 भागं । अन्ये प्रतिशत् वायवः – 1 भागं च ।

- **वायुमण्डलस्य संरचना** -वायुमण्डलं स्थलमण्डलात् 1600 कि.मी पर्यन्तं भवति । वायुमण्डलस्य उपरि पश्माश्चेत् वायुमण्डलस्य पञ्चभागाः सन्ति इति ज्ञायते । स्थलमण्डलात् तेषां मण्डलानां क्रमशः स्थानं वर्त्तते । निम्नस्तरे वर्त्तते आदौ क्षोभमण्डलम् । इतः अनन्तरं समतापमणडलम्, मध्यममण्डलम्, बर्हिमण्डलम् च क्रमशः भवन्ति । यथा –

१. **क्षोभमण्डलम्** – अयं स्तरः वायुमण्डलस्य महत्त्वपूर्णस्तरः वर्त्तते । अस्य मण्डलस्य स्तरः 13 कि.मी पर्यन्तं भवति । अस्य मण्डलस्य एव वायवः अस्माभिः उपयुज्यते । जैविकप्रक्रियायै अयं स्तरः महत्वपूर्णः वर्त्तते । वर्षादिप्रक्रियाऽपि अस्मिन् मण्डले भवति ।

२. **समतापमण्डलम्** – वायुमण्डलस्य अनन्तरस्तरं समतापमण्डलम् । क्षोभमण्डलात् परम् इदं मण्डलम् । अस्मिन् मण्डले ऋतूनां परिवर्तनं जायते । वयं जानीमः यत् ओजनस्तरः सूर्यस्य हानिकारकरश्मीतः अस्मान् रक्षति । ओजनस्तरः अपि अस्मिन् मण्डले भवति । वायुयानमपि अस्मिन् मण्डले डयते ।

३. **मध्यममण्डलम्** – वायुमण्डलस्य तृतीयमण्डलं वर्त्तते मध्यममण्डलम् । प्रायः इदं मण्डलं 80 कि.मी पर्यन्तं विस्तृतं वर्त्तते । समतापमण्डलस्य उपरि मण्डलमिदम् । अस्मिन् मण्डले उल्काः अन्त्यरिक्षात् आगत्य ज्वलन्ति ।

४. **बाह्यवायुमण्डलम्** – मण्डलमिदम् 80 तः 800 किमी0 पर्यन्तं वर्त्तते । आकाशवाण्याः संचाराय इदं मण्डलम् उपयुज्यते । अस्य मण्डलस्य अपरं नाम वर्त्तते आयनमण्डलम् ।

५. **बर्हिरमण्डलम्** - वायुमण्डलस्य उच्चतमं मण्डलं बहिर्मण्डलम् । हीलियम-हाइड्रोजन-इत्यादयः न्यूनभारवायवः अस्य मण्डलस्य उपरि तरन्ति । इदं सर्वोत्तमं मण्डलम वर्त्तते । अतः अस्य मण्डलस्य विषये अधिकं वक्तुं न शक्यते ।

- **निष्कर्षः** - वायुमण्डलस्य रक्षणं करणीयम् । अतः अस्माकं दायित्वं वर्त्तते पृथिव्याः रक्षणमिति । वयम् अस्माकं सुखाय अरण्यानां छेदनं कुर्मः । यद्द्वारा वायुमण्डले तस्य प्रभावो पतति । वायुमण्डले co इत्यस्य संख्या अधिका भवति । ओजोनस्तरे रन्ध्राः भवन्ति । यस्य 2 फलं सूर्यस्य हानिकारकरश्मयः प्रत्यक्षरूपेण अस्माकमुपरि पतन्ति । अतः नैके रोगाः शरीरे आगच्छन्ति । अतः अस्माभिः वायुमण्डल्य रक्षणं करणीयम् ।

**सन्दर्भाः –**


१. https:// niwa.co.nz, School & mass Education Department , Orisha Government-2010

# आधुनिकसमाजे व्यवहारस्य प्रासाङ्गिकता

देवयानी रथ
शिक्षाशास्त्रिद्वितीयवर्षम्
rathdebajani79@gmail.com

- **उपक्रमः** - सम्प्रतिकमानवीयसमाजस्यास्य सुष्ठुः परिचालनाय उत मानवीयमूल्यानाम् संरक्षणाय व्यवहारस्य विशिष्टमहत्वं वरीवर्ति । समाजे अस्याभ्युदयेन एव व्यक्तेरभ्युदयः सम्भवति । मानवजीवनस्य कृते नियमाः व्यवस्थापिताः वर्त्तन्ते । तत्रादौ मन्वादयः धर्मशास्त्रनिष्णातव्यवहारपरकं विषयं विचिन्त्य विषये अस्मिन् लिखितं पुरा । तत्र व्यवहारस्थानं स्वतन्त्रेणाभिहितं वर्त्तते । यतोहि व्यवहारं विना समाजः श्रृङ्खलितो सुव्यवस्थितो भवितुं नार्हति।
- **व्यवहारस्य महत्वम्** – आधुनिकसमाजे उत्तमव्यवहारः अनिवार्यः एव । समाजेऽस्मिन् आदर्शव्यवहारः कुत्रचित् विलुप्तपथि वर्त्तते । एतादृश्याः असमञ्जसायावस्थायाः कारणं किम् ? इति प्रश्ने सति आधुनिकपरिवारःतथा वातावरणमेव मूलकारणम् ,आधुनिकसमाजः , । शिशोः प्रारम्भिकशिक्षा स्वपरिवारे एव जायते । एतदर्थं बालकानां प्रारम्भिकविद्यालयः तस्य परिवारः एव । यतो हि जन्मना शिशोः बुद्धिः शून्यावस्थायां भवति । तदा बालः केवलम् अनुकरणेन शिक्षां प्राप्नोति । वस्तुतः परिवारसदस्यैः यद् यद् आचर्यते तद् तद् बालैः अनुक्रियते, यतोहि सदस्यानां मेलनं खलु समाज इत्युच्यते । यदि तस्मिन् समये परिवारसदस्यानां सम्यक् व्यवहारः अन्वाचरति चेत् सः शिशु अवश्यं विनयवान् भविष्यति । पुनः अनुशासनं विना कदापि कोऽपि जीवनयापनयितुं न शक्नोति । सम्प्रतिके सामाजे अनुशासनहीनतायाः कारणात् जनाः प्रतिदिनं बहुः कष्टमनुभवन्ति । तस्मात्कराणात् परिवारे न कोऽपि सुखी दृश्यते । सर्वत्र कलहः प्रवर्त्तते । सर्वे स्वार्थपरायणाः अभवन् । परोपकारः , विनय ,मधुरवाणीगुणश्च जनमनसः बहुदूरं गतः । नान्यः कोऽपि दुर्दशायाः अस्याः कारणं केवल मानव एव । यदि एकस्मिन् परिवारे एकं उत्तमचिन्तनं , आचारः अनुशासनं पालनं करोति चेत् परिवारस्य इतर सदस्याः तस्य प्रभावेण प्रभाविताः भविष्यन्ति । स्वपरिवारे सुव्यवहारं क्रियते चेत् समाजः प्रभावितो भविष्यति । उच्यते च

**सर्वदाव्यवहारे स्यात् औदार्यं सत्यता तथा ।**
**ऋजुतामृदुता चापि कौटिल्यं न कदाचन ॥**

- **उपसंहारः** –न कश्चित्कश्स्यचित्मित्रं न कश्चित्कस्यचिद्रिपुः । व्यवहारेण जायन्ते मित्राणि रिपवस्तथा ॥[17] सूक्ष्मदृष्टया अवलोकनेन ज्ञायते यत् प्रकृतौ सर्वे अपि अनुशासिताः वर्त्तन्ते तथा च इयं प्रकृतिः अपि अनुशासिता अस्ति । ताम् अनुशासितां प्रकृतिं दृष्ट्वा मानवाः अनुशासितः भवेत् । वस्तुतः सर्वेषु कार्येषु केचित् नियमाः निर्धारिताः सन्ति । तेषाम् अनुपालनेन मानवस्य विकासः नितराम् अभिवर्धयिष्यति । अतः स्वकल्याणमेव समाजकल्याणमिति मत्वा मानवीयनियमानाम् अनुपालनं स्वीकर्त्तव्यम् । तेन सर्वेऽपि सुखिनः भविष्यन्ति ।
- **सन्दर्भग्रन्थसूची:**

1.पुरातनीशिक्षा, डॉलोकमान्यमिश्रः ., मृगाक्षी प्रकाशनम्, गोमती नगर लखनऊ . 2004

******************

# व्याकरणाध्ययनप्रयोजनानि

स्वागतिका चम्पति
शिक्षाशास्त्रीद्वितीयवर्षम्
campatiswagatika@gmail.com

- **प्रस्तावना** – विश्वेस्मिन् नैकानि शास्त्राणि उपलभ्यन्ते । तेषु प्रमुखं प्रधानं च स्थानं अलङ्कृतशास्त्रमिदं व्याकरणशास्त्रम् । वेदस्य मुखरूपेण स्वीक्रियमाणशास्त्रमिदं व्याकरणम् । पतञ्जलिना महाभाष्ये वर्णितमस्ति "प्रयोजमनुदिश्य न मन्दोपि प्रवर्तते" । प्रत्येकं शास्त्रस्य प्रयोजनं भिन्नम् । यथा काव्यशास्त्रे व्यवहाररक्षणम् इति प्रयोजनमूलकम् ,व्याकरणशास्त्रे रक्षा-ऊहा-आगम-लघु-असन्देहाः प्रयोजनम् इत्यादयः ।
- **व्युत्पत्तिपरकः अर्थः** – व्याकरणशब्दस्य व्युत्पत्तिः वि+आ+कृ+ल्युट्-एभिर्भवति । लक्ष्यलक्षणं व्याकरणं, शब्दानुशासनं व्याकरणम् । महाभाष्येऽपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गे वेदोध्येयो ज्ञेयश्च इत्यस्मिन् षडङ्गवचने वेदाङ्गानां निर्देशो विद्यते । पाणिनीयशिक्षायां व्याकरणं वेदस्य मुखम् इति मन्यते । यथा - छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषमयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते । शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।

[17] चा.नि.श्लो.सं.९२

तस्मात्साङ्गमधीत्यैव ब्रह्म लोके महीयते[18] । महर्षिणा पतञ्जलिना उक्तं यत् व्याकरणस्य अध्ययनं वेदानां रक्षणार्थम् । एतदर्थं महाभाष्यस्य पस्पशाह्निके व्याकरणाध्ययनस्य पञ्चमुखप्रयोजनानि प्रोक्तानि । तानि यथा रक्षा-ऊहा-आगम-लघु-असन्देहः इति । आचार्यवररुचिर्व्याकरणशास्त्रस्य महनीयतां गायन् अध्ययनप्रयोजनानि पञ्चप्रतिपादयति तदा महर्षिः पतञ्जलिस्तदध्यनप्रयोजनानित्रयोदश ब्रूते । तेन हि व्याकरणशास्त्रं नितरां प्राचीनशास्त्रमस्ति । तर्हि आदौ रक्षा इत्यस्मिन् विषये विचारयामः ।

- **रक्षा** - व्याकरणाध्ययनस्य प्रधानं लक्ष्यं अस्ति – वेदानां रक्षा, वेदस्योपयोगः, “रक्षा नाम वेदस्य रक्षा” । उदाहरणं वेदे लोके यथा – संजभार संजहार, अदुह् अदुहत, शकलं, सकलम् । व्याकरणं न पठामश्चेत् अनयोः भेदः अज्ञात्वा अर्थस्पष्टतां कर्तुं न शक्नुमः । अतः उच्यते यद्यपि बहुनाधिषे तथापि पठपुत्र व्याकरणम् । स्वजन स्वजन मा भूत शकलं सकलं, सकृत् शकृत् । अतः वेदानां रक्षणार्थं व्याकरणस्य अध्ययनम् अनिवार्यरूपेण कर्त्तव्यम् ।
- **ऊहा** - ऊहा शब्दस्यार्थः भवति कल्पना । यज्ञस्यावश्यकतानुसारं एषां मन्त्राणां शब्दानां विभिन्न-विभक्तिषु विभिन्नलिङ्गेषु च विपरिणाम् अनिवार्यरूपेण भवति । ते चावश्यं प्रज्ञगतेन पुरुषेण यथायथं विपरिणामितव्या तत्र वैय्याकरणः शक्नोति । व्याकरणं न पठामश्चेत् यथा अग्नये स्वहा-वेदे वर्णितमस्ति । कल्पना अस्माकं सुर्याय स्वाहा अर्थात् वेदे विभक्त्यनुगुणं प्रयोजनं न भवति । कल्पनां कृत्वा अनन्तरं विभक्तिः योज्यते । यथायथं विपरिणमयितुं तस्मात् अध्येयं व्याकरणम्।
- **आगमः**- ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोध्येयो ज्ञेयश्च । प्रधानं च षडस्वङ्गेषु व्याकरणम्। प्रधानं च कृतो यत्नः फलवान् भवति । विधेयकं शास्त्रम् (आगमनशब्दस्य अर्थः) आगमः तु मित्रवत् भवति । शास्त्रोक्त वाक्यम्-प्रामाण्यं स्वीकृत्य ब्राह्मणेन व्याकरणस्याध्ययनं करणीयम्।
- **लघु**-लघ्वर्थं चाध्येयं व्याकरणम् । लघुशब्दस्य सरलता संक्षिप्तता वा इत्यर्थः । भाषायां सरलता निमित्तमपि व्याकरणं पठनीयम् । “ब्राह्मणावश्यं शब्दाः ज्ञेयाः” इति च चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्त्याः ज्ञातुम् । लघुतायाः कृते व्याकरणस्य पठनपाठनम् अनिवार्यं भवति। व्याकरणस्याध्ययनं सकलशास्त्राणां कुञ्चिका वर्त्तते । उदाहरणम्- अहं ग्रामं गमनं करोमि, अहं गच्छामि । मम ज्ञातुम् इच्छाऽस्ति, मम जिज्ञासा अस्ति । गणानाम् ईशः- गणेशः । व्याकरणं सरलता-संक्षिप्तताम् आनयति । यया सरलतया शास्त्राणां रहस्योद्घाटनं भवितुम् अर्हति ।
- **असन्देहः** – सन्देहस्य निवृत्ति एव असन्देहः । अर्थबोधे एव सन्देहः सन्देहनिवारणार्थं व्याकरणं पठनीयम् । उदाहरणं पीताम्बरः (विष्णुः) । पीतम् अम्बरं यस्य सः पीताम्बरम् (वस्त्रम्) कर्मधारय । स्थूलपृषति-शुभ्रचिन्हायुक्ता मृगी, स्थूलपृष्टन्ती- बिन्दु (.), मित्रम्-सुहृद्,

[18] पाणिनीय.शिक्षा 41-42

मित्रः – सूर्यः इत्यादयः । स्थूला चासौ पृषती च स्थूलपृषती । स्थूलानि पृषन्ती यस्यां सेयं स्थूलपृषती इति । यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः अथ समासान्तोदात्तत्वं तत्पुरुषः इति । शब्दानुशासनस्य कृते व्याकरणस्याध्ययनस्य प्रयोजनानि अत्यन्तम् आवश्यकं वर्त्तते ।

- **उपसंहारः** – अन्तिमे इदं वक्तुं शक्नुमः यत् ये संस्कृताध्येतारः सन्ति तैः अवश्यं व्याकरणम् अध्येतव्यम् । कारणम् अस्पष्टोच्चारणेन न ज्ञात्वा कथनेन अनिष्टप्राप्तिं भवति । तदर्थं व्याकरणस्य अध्ययनं कर्तव्यम् उक्तं यत् तद्यपि बहुनधिषे......इत्यादयः ।
- **सन्दर्भग्रन्थाः**


**1**.महाभाष्यम्, शास्त्री, चारुदेवः, प्रथमसंस्करणम्-1968, मोतीलाल बनारसीदास ।

**2.**वैयाकरणसिद्धान्तकौमुदी, आचार्यः, गोविन्द, सम्पादिका - लक्ष्मी शर्मा, चौखम्बा सुरभारती प्रकाशन वाराणसी ।


******************

# योगरहस्यम्


**स्मिता राणी मिश्रः**

शिक्षाशास्त्रि द्वितीयवर्षम्

smitaranimishra19@gmail.com


योगशब्दः युज् धातोः घञ् (भाववाच्ये) प्रत्यययोगेन निष्पन्नः । युज्-धात्वर्थः समाधिः । समाधिशब्दस्यार्थः सम्यग्भावेन भगवता सह संयोगीकरणम्, यत् प्रकारान्तरेण मुक्तिपदवाच्यः । जीवानां कामनावासनाऽऽसक्तिप्रभृत्तिमलिनतां दूरीकृत्य स्वस्वरूपे मुक्तभावेन भगवता सह मेलनस्य सरलस्वाभाविकोपायः समाधिशब्दान्तर्गतः । अतः जीवब्रह्मणोः मेलनं योग इति उच्यते । अर्थात् स्वागत-स्वजातीय-विजातीयभेदैर्निवृत्तजीवब्रह्मणोः एकत्वप्राप्तिः । हठ-लय-मन्त्र-राजभेदैः योगः चतुर्विधः । परन्तु हिरण्यगर्भपतञ्जलिभ्यामनुशासितः पातञ्जलयोगः मुख्यं प्रसिद्धं च योगदर्शनम् अन्यदर्शनेषु प्राचीनतमं च । अयं तु परमधर्मो यद्योगेनात्मदर्शनम् जीवात्मपरमात्मनोः मिलनमिति योगदर्शनस्य महत्त्वम् । पतञ्जलिमतानुसारं मनसः इन्द्रियाणां च निषेधपूर्वकं मनोयोगसंलग्नेन भगवत्प्राप्तिर्भवति । योगश्चित्तवृत्तिनिरोधः [19]। सुखदुःखयोः, पापपुण्ययोः, शत्रुमित्रयोः, शीतोष्णयोश्च

[19] यो.सू.1/2

द्वन्द्वातीतपूर्वकं समत्वप्राप्तिर्हि 'योगः' इति गीतायाम् । "समत्वं योग उच्यते ।" [20] पदार्थविज्ञानानुसारं भिन्नपदार्थयोः मेलनेन स्वरूपपरिवर्त्तनपूर्वकं नूतनपदार्थस्य सृजनं भवति । यथा अम्लजानयवक्षारजानयोः संयोगेन जलमुत्पद्यते ($H_{2+}O_1=H_2O$) इति

जीवात्मपरमात्मनोः भिन्नत्वेऽपि तयोः मेलनेन कैवल्यप्राप्तिर्भवति । एतद् मेलनं योगपदवाच्यम् । योगिनः मनः स्थिरं कृत्वा मन्त्रतन्त्रयोः रहस्यमाविष्कुर्वन्ति । तेषां नये प्रत्येकं चक्रे (मूलाधार-स्वाधिष्ठान-मणिपुरानाहत-हृद्-विशुद्धि- सुषुम्नभेदेन सप्त चक्राणि) स्नायविककेन्द्रे अलौकिकशक्तिः निहिता । तच्छक्तिं ध्यानेन प्राणवायुमाध्यमेन च प्रबुद्धीकृत्य योगसाधकाः दूरदर्शन-दूरश्रवण-परकायप्रवेशाकाशरोहणानि सम्पादयन्ति । पुनश्च योगबलेन देहत्यागमलौकिककार्य्यजातञ्च कुर्वन्ति ।

योगः न केवलं आध्यात्मिकजनानां कृते प्रयुज्यः अपि तु दैनान्दिनकर्मक्षेत्रे व्यवहारयोग्यः । सर्प-मण्डुक-सिंह-वृश्चिक-कूर्मादि-आसन-मुद्रा-प्राणायाममध्यमेन स्वास्थमायुषं च वर्धते । अस्य माध्यमेन कामादिषड्रिपून् दूरीकृत्य जनाः शान्तचित-जितेन्द्रियात्मदर्शनयोग्याश्च भवितुमर्हन्ति इति ।

**सन्दर्भग्रन्थाः**

1.योगसूत्रम्, पतञ्जलिः, Aslan Reads, 28 नवम्बर 28, 2018. ISBN – B07KYS9GMS

2.श्रीमद्भग्वद्गीता, गीता प्रेस, गोरखपुर, 2012

******************

# ॐ कारस्य महत्त्वम्

कल्पना नन्दः

शिक्षाशास्त्रिद्वितीयवर्षम्

k2kalpanananda@gmail.com

ओङ्कारः सकलस्रष्टेः आधारो भवति । शास्त्रकाराः ओङ्कारविषये विभिन्नेषु शास्त्रेषु विश्लेषणं प्रकुर्वन्ति । अवति रक्षति इति ओम्, इति ओङ्कारस्य व्युत्पतिः भवति । अकारोकारमकारवर्णत्रयात्मकः ओङ्कारः । तथा च उक्तम्- "अकारो विष्णुरूद्दिष्ट अकारस्तु महेश्वरः । मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः" । अकारो विष्णु, उकारो महेश्वरः, मकारस्तु ब्रह्मा इत्युच्यते । अ-उ-म इति त्रयाणां वर्णानां समाहारेण ओङ्कारः परमज्योतिर्वा स्पृष्टम् । ओङ्कारस्य मुख्यदशनामानि सन्ति यथा "ओङ्कारं प्रणवं चैव सर्वव्यापिनमेव च । अनन्तस्य तथा सारं शुक्लं

[20] गीता-2/86

वैद्युतमेव च । तुर्य्यं हसं परंब्रह्म इति नामानि जायते ।" ओङ्कार एव प्रणवः । अयं तु ईश्वरस्य द्योतक इति योगसूत्रकारेण महर्षिपतञ्जलिना योगदर्शने वर्णितम् । तद्यथा "तस्य वाचकः प्रणवः[21]" ।

प्र+णम्+कर्मणि घञ्-इति प्रणवस्य प्रकृतिप्रत्ययः । प्रकर्षेण नूयते स्तूयतेऽनेनेति, प्रकर्षेण नौति स्तौतीति वा प्रणवः ओङ्कारः[22] । प्रकर्षेण नूयते स्तूयते आत्मा स्वेष्टदेवता वानेनेतिप्रणवस्य व्युत्पत्तिः । योगमार्गेण परिचालिताः साधकाः ओङ्कारमाध्यमेन ईश्वरस्य उपासनां कुर्य्युः ।अन्यसमस्ता गौणाः, संकीर्णार्थबोधकाः भवन्ति । सर्वासु श्रुतिस्मृतिषु च ओङ्कारः मुख्यरूपेण वर्ण्णितः अस्ति । यथा "प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्मुच्यते । अप्रमतेन बोद्धव्यं शरवत्तन्मयो भवेत्" । ओङ्कारः प्रणवस्तारो वेदादिर्वर्त्तुलाध्रुवः । त्रैगुण्यं त्रिगुणो ब्रह्मसत्यो मन्त्रादिख्ययः, ब्रह्मबीजं त्रितत्वञ्च पञ्चशिमस्चिदैवतः[23] । ओङ्कारश्च ब्राह्मणो नामविशेषः तथा – ओम्तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुराः । तस्मादोमित्युदाहृत्य यज्ञदानपक्रियाः । प्रवर्त्तन्ते विद्यानोक्ताः सततं ब्रह्मवादिनाम् । ओङ्कारः भवति उत्तमाधारः त्राणकर्त्ता ओकारेण सह परमात्मनः नामोच्चारणेन परमात्माऽपि सन्तुष्टो भवति इति ।

**सन्दर्भग्रन्थाः –**


1- श्रीमद्भग्वद्गीता, गीता प्रेस गोरखपुर, 2012 ।
2- http://hi.m.wikipedia.org


******************

# ओडिशाराज्ये संस्कृतभाषायाः अधोगतेः कारणानि


एलिना राय
शिक्षाशास्त्री द्वितीयवर्षम्
elinarjk@gmail.com


- **उपक्रमः** – सस्कृतभाषा एका प्राचीना भाषा । अस्माकं देशस्य सर्वाषु भाषासु पुरातना भाषा सर्वेषां जननीस्वरूपा । "अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः" । धर्मस्य संरक्षणार्थं संस्कृतभाषा देवभाषारूपेण वर्त्तते । संस्कृतसाहित्ये

[21] योग-2/26
[22] भोजवृतिः
[23] बीजवर्णाभिधानम्

भागद्वयं वर्त्तते वैदिकसाहित्यम् लौकिकसाहित्यञ्च । वैदिकसाहित्यमस्माकं वेदपुराणानि द्वारा उपलभ्यन्ते । लौकिकसाहित्यं व्याकरणनियमानुसारं विद्यते ।

- **पुरातनाधुनिकभाषयोः मध्ये संस्कृतभाषायाः भेदः - प्राचीनकाले** संस्कृतभाषा साधारणजनानां व्यावहारिकी भाषा आसीत् । परन्तु अधुना आधुनिकजनाः संस्कृतभाषां न इच्छन्ति व्यावहारिकी भाषा तु बहुदूरम् । अधुना आधुनिकयुगे सर्वे आंग्लभाषामिच्छन्ति । ओडिशाप्रदेशे संस्कृतभाषां प्रति आकर्षितः न भवति कोऽपि । ओडिशाराज्यं परम्परया-उत्कृष्टचारूकला-शिल्पकला-उन्नतसंस्कृतसम्पन्नं राज्यं भवति । एवं च ओडिशायाः राजधान्याः अन्यनाम भवति मन्दिरमालिनी नगरम् । यत्र सर्वत्र भिन्नभिन्नकलायाः सुस्पष्टं चिरन्तनं दर्शनं जायते । ओडिशीनृत्यस्य प्राचीनपरम्परा या ओडिशायाः संस्कृतिः सा संस्कृतिः कुत्र लुप्ता ? वयमपि ज्ञातुं न शक्नुमः । परन्तु इदं तु वक्तुं शक्नुमः यत् ओडिशाराज्यं तस्यां परम्परायां विदायग्रहणं कृतम् । तद् सुस्पष्टाभिलेखः संस्कृति-साहित्य-कला-परम्पराइदानीं लुप्ता । तथापि ओडिशायाः संस्कृतिः मनसि स्थापयित्वा अद्यावधिः विदेशीजनाः आकर्षिताः । वयमपि संस्कृतस्य निमित्ताय प्रचेष्टां कर्तुं शक्नुमः ।
- **ओडिशामध्ये संस्कृतस्याधेगतेः कारणानि -**

1. प्रथमतः संस्कृतभाषा मातृभाषारूपेण कोऽपि न इच्छति ।
2. परिवारजनाः संस्कृतं न इच्छन्ति ।
3. संस्कृतपठितुं लाभः कोऽपि नास्ति । यत्र विदेशगमने संस्कृतभाषा न प्रचलति ।
4. आधुनिकयुगे आंग्लभाषायाः प्राधान्यं वर्त्तते ।
5. संस्कृतशिक्षकः संस्कृतनिमित्तं परिश्रमः न करोति ।
6. संस्कृताध्ययनेन छात्राणां मनसि औदासीन्यं दृश्यते यत्पाठने आधुनिकोपकरणस्य प्रयोगः नास्ति ।
7. आधुनिकयुगे संस्कृतं विहाय प्रयुक्तविद्या सर्वे इच्छन्ति ।
8. संस्कृतभाषायाः कृते अभ्यासमावश्यकम् । श्लोकानां कण्ठस्थीकरणेऽपि क्लेशः आयाति ।
9. केवलमाधुनिकाङ्गानां निमित्ताय संस्कृतमिच्छन्ति ।
10. संस्कृताध्यापकः भवितुं सर्वेषामिच्छा नास्ति ।
11. वर्तमानस्थितिषु ओडिशायाः संस्कृतिः परिवर्तिता । आंग्लभाषायाः प्रभावः अधिकः दृश्यते ।
12. सर्वकारः अपि संस्कृतभाषां प्रति ध्यानं वा प्रचेष्टानिमित्तं प्रयासं न करोति ।
13. विद्यालये संस्कृतशिक्षकाणामभावः दृश्यते ।
14. ये विद्वांसः ते संस्कृतमावश्यकमिति न मन्यन्ते । आंग्लभाषां प्रति प्राधान्यम् ।

- **उपसंहारः** -ओडिशामध्ये सर्वेषु विद्यालयेषु कलालयेषु च संस्कृतस्यावश्यकता अस्ति । सर्वेषां मनस्सु धर्मः कः ? इतियसिय अवगमनं न भविष्यति नो चेत् । परोपकार-उदारभावना न समागमिष्यति । संस्कृतभाषां विना कोऽपि यर्थायभारतीयो भवितुं नार्हति । कस्यापि मनसि वसुधैवकुटुम्बकम् इति आदर्शः न आगमिष्यति । संस्कृतं समानभावं शिक्ष्यति । भातृभाव-सौहार्दब-न्धुत्व-सहनशीलताश्च अस्मान् शिक्षयति संस्कृतम् । तर्हि संस्कृतं विहाय संस्कृतिः न सम्भवति । अत एव ओडिशाराज्ये सर्वे संस्कृतच्छात्राः संस्कृतभाषायाः उन्नतिनिमित्ताय महानप्रयासं कुर्युः ।
- **सहायकग्रन्थसूची –**

संस्कृतशिक्षणम् – नवीनप्रविधयश्च , फतेहसिंहः, आदित्यप्रकाशनम् । जयपुरम् ।

******************

# सङ्गणकयन्त्रे संस्कृतस्य उपादेयता

ज्योतिर्मयी दासः
शिक्षाशास्त्री द्वितीयवर्षम्
jyotirmayeedas900@gmail.com

सम्प्रतिकाले सङ्गणकं सर्वस्मिन् क्षेत्रे प्रयुज्यते । सङ्गणकमेकं तादृशं यन्त्रमस्ति यदद्वारा सर्वाणि कार्याणि सुलभतया साधयितुं शक्यते । संस्कृतभाषायाः सङ्गणकमाध्यमेन कथं प्रचारप्रसारः सम्भवेत् ? कथं संस्कृतभाषायाः लेखने पठने-पाठने शैक्षिककार्ये च सङ्गणकस्य प्रयोगः सिध्येत् । संस्कृतं संगणकं च संयोजयितुं चिन्ता कल्पनीया । शोधकार्येषु सङ्गणकस्य सदुपयोगः भवेत् । इत्यादिविषये विविच्यते अत्र ।

- **किं नाम सङ्गणकम्** – सूचनां संग्रहीतुमन्वेषणं कर्त्तुम् एवं तद्व्यवस्थितं कर्त्तुमपराणां यन्त्राणामुपरि यत् विद्युत् यन्त्रं नियन्त्रणं करोति तदेव सङ्गणकम् ।
- **संस्कृतभाषा -** भारतीयमहाद्वीपस्य एका भाषा भवति संस्कृतभाषा । इमां भाषां देववाणी सुरभारती इत्यपि उच्यते । एषा भाषा विश्वप्राचीना भाषा वर्त्तते । संस्कृतभाषा भारोपीयभाषा-परिवारस्य एका शाखा भवति । भारतीयानां विश्वासानुसारं सृष्टिकर्तुः ब्रह्मणः मुखात् वेदमयी

संस्कृतवाणी निस्ससृता। तदर्थमुच्यते - अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः[24] । ऋग्वेदः न केवलं संस्कृते अपितु विश्वे प्राचीनतमा रचना भवति। यत् संस्कृतभाषया अस्ति।

- **सङ्गणकदृष्ट्या संस्कृतभाषायाः विशेषताः** – कस्यामपि भाषायां सङ्गणकदृष्ट्याऽपेक्षिता गुणाः न उपलभ्यन्ते। यथा सङ्गणके संस्कृतभाषायाः अस्ति। संङ्गणकदृष्ट्या संस्कृतभाषायाम् एताः उपादेयताः सन्ति ते यथा –

I. सङ्गणकस्य कृते संस्कृतभाषा सर्वोत्तमा भवति।
II. सङ्गणके कूटशब्दानां पारिभाषिकशब्दानाम् आधिक्यं वर्त्तते। तस्मिन् कूटशब्दनिर्माणेऽपि संस्कृतस्य गतिः अव्याहताऽस्ति।
III. संस्कृतभाषायामुत्कृष्टं समृद्धं साहित्यं वर्त्तते। यत् संगणकस्य कृते आवश्यकमस्ति।
IV. संस्कृते सर्वे ग्रन्थाः विज्ञानसम्बद्धाः लभ्यन्ते। यथा पदविज्ञानम्, आयुर्विज्ञानं, नक्षत्रशास्त्रं, होराशास्त्रं, व्याकरणं, जीवविज्ञानं, कृषिविज्ञानम् इत्यादयः।
V. नूतनशब्दनिर्माणविधिः संस्कृते वर्त्तते। आवश्यकतानुसारमेकस्य धातोः बहूनां शब्दानां निर्माणं कर्तुं शक्यते। तदेव सङ्गणकस्य कृते अतीव उपयोगी।
VI. भारतीयानां सर्वासां भाषणामाधारभूता भाषा संस्कृतभाषा वर्त्तते। भारते दक्षिणदिशि यानि राज्यानि सन्ति तेषां राज्यानां भाषासु संस्कृतस्य बाहुल्यमं बहुःअधिकं वर्त्तते।
VII. संस्कृतभाषा तादृशी भाषा अस्ति यत्र वेदाः, रामायणं, महाभारतं, पुराणानि, स्मृतयः, श्रुतयः, उपनिषत् आदयः वर्त्तन्ते। एते ग्रन्थाः मानवानाम् इतिहाससूचकाः प्रगतिसूचकाश्च।
VIII. संस्कृतभाषा अधुनातनसमये उन्नत किर्लियनम फोटोग्राफी प्रविधौ व्यवह्रियते।

- **उपसंहारः** - सङ्गणकाय संस्कृतभाषा कृत्रिमबुद्धिः) Artifisial intelligence( भवति। संस्कृतभाषाद्वारा सङ्गणकः प्राकृतिकरूपेण स्व परिचयमप्राप्नोति। सङ्गणके यदि इतोऽपि संस्कृतभाषायाः प्रयोगः उपयोगः वा भविष्यति चेत् संस्कृतभाषायाः प्रचारप्रसारः - भवितुमर्हति एवं च वैज्ञानिकीनियमानुगुणां संस्कृतभाषां सङ्गणके उपयोगकरणेन सङ्गणके अपि नवीनत्वमागच्छति।

- **सन्दर्भग्रन्थाः**


1. संस्कृतनिबन्धशतकम् – डॉ सूर्यमणिरथः,पुरी, अन्नपूर्णा प्रेस।
2. संस्कृतशिक्षणम् – नवीनप्रविधयश्च, डॉ चल्ला लक्ष्मीनारायणशर्मा, डॉ फतेहसिंहश्च , जयपुरम्।


[24] महाभारते ,शान्तिपर्वणि,305.13.94

## आदर्शछात्रस्य संकल्पः

मामालि राउत
शिक्षाशास्त्री द्वितीसवर्षम्
mamalirouts10@gmail.com

- **उपोद्घातः -** शिशुः स्वयमेकः महान् शक्तिपुञ्जः । उत्तरोत्तरसततसाधनया ,परिश्रमेण ,तपसा , मातृपितृभ्यां च, आचार्यस्य मार्गदर्शनेन च सः शक्तिपुञ्जः पूर्णतया विकसितः भवति । विकासप्रक्रियायाम् उचितसंस्कारयुक्तशिक्षायाः बहुमहत्वं वर्त्तते । स्वामिविवेकानन्द उक्तं यथा –If you have assimilative ideas and made them your life and character , you have more education them any man who has got by heart a whole library. अतः बालेषु श्रेष्ठमूल्यावबोधानां विकासकरणं महत्वपूर्णं वर्त्तते । अस्माभिः स्वीये विद्यालये पाठ्यक्रमानुसारं परीक्षात्मकशैक्षिकज्ञानेन सह तेषु श्रेष्ठगुणानां विकासकरणेन सह तदनुसारं तेषां चरित्रं सुदृढीकर्तुं तथा जीवनं गुणवान् कारयितुं च प्रयासः विधातव्यः ।
- **आधुनिकछात्रस्य चिन्तनम् -** अस्माकं शिक्षाव्यवस्थायां भ्रातृभगिन्यः परीक्षायाम् उत्तमाङ्कप्राप्तकरणे दक्षाः । परन्तु इदमवास्तविकं वर्त्तते । छात्राः स्वच्छतायाः उपरि उत्तमनिबन्धं लिखन्ति परन्तु स्वयं स्वच्छाः न भवन्ति । छात्राः समयपालनमितिविषये सम्यक् भाषणं ददति परन्तु स्वयं समयपालनं सम्यक्तया न कुर्वन्ति । संस्कृतिज्ञानपरीक्षायां छात्राः उत्तमाङ्कप्राप्तया सता जीवने नियमितताराष्ट ,्रियता तथा सामाजिकसंपत्तेः रक्षणदायित्वं सुरक्षां च ,एतादृशभावनाः न अङ्गीकुर्वन्ति चेत् सा संस्कृतिपरीक्षा व्यर्था एव । केवलं शारीरिकः तथा च मानसिकश्रमः एव भवति एतादृशपठनेन न तु आत्मसाक्षात्कारः । विद्यार्थीनां स्वजीवनस्य लक्ष्यः स्पष्टतया विकसितः भवेत् । एवं च तं पूर्णरूपेण प्राप्तुं संकल्पः करणीयः ।
- **विद्यार्थीनां पञ्चलक्षणम् –** काकस्नानं बको ध्यानंश्वाननिद्रा तथैव च । , अल्पहारी गृहत्यागी विद्यार्थी पञ्चलक्षणम् । आदर्शछात्रः गुरुभक्तः भवति । तस्मै अध्ययनतपः भवति । सः सदाचारी भवति । स हि मातृदेवः पितृदेवश्च भवति । स हि मधुरभाषी भवति । कदापि असत्यं न वदति । आलस्यं शत्रुरिव पश्यति । स्वलक्ष्यप्राप्तये स्वस्य संकल्पः कथं सुदृढः भविष्यति स्वयं च कथं ,भगवतः आशीर्वादं प्राप्तुं शक्नोति, अधिकयोग्यभवितुं तस्य समीपे

सपर्पितः भूत्वा साधना करणीया एतादशलक्षणानि भवन्ति उत्तमानां छात्राणाम् । सर्वदा उत्तमकर्म कुरु । सर्वदा पवित्रचिन्तनं कुरु । स्वस्य अशुद्धप्रभावं पूर्णतः शुद्धकर्तुम् एतत् एकमात्रम् उपायं वर्त्तते । सद्विचारः सर्वदा स्मरणे भवेत् । आदौ चरित्रनिर्माणमेकः छात्रस्य आधारः वर्त्तते । वयं प्रतिदिनं वन्दनासमये गायत्रीमन्त्रं पठामः । मन्त्रोऽयं वैदिककालात् एव अस्मान् व्रतस्य स्मरणं कारयति । वयम् अस्माकं प्रतिज्ञाम् अनेन मन्त्रेण सुदृढीकुर्मः । परमात्मनः स्मरणेन सह तेन प्रदत्तसद्गुणान् स्वजीवने धर्तुं संकल्पं नयामः । पञ्चसंकल्पसूत्रारम्भसमये यज्ञे आहुतिदानेन सह प्रतिदिनं प्रातः काले स्मरणं रात्रौ शयनात् प्राक् ध्यानं। यथा

- **प्रथमसंकल्पः -** शरीरमाद्यं खलु धर्मसाधनम् ।
- **द्वितीयसंकल्पः** –छात्राणाम् अध्ययनं तपः ।
- **तृतीयसंकल्पः -** सत्यमेव जयते नानृतं सत्येतन पन्था विततो देवयानः ।
- **चतुर्थसंकल्पः** -स्वार्थं यस्य परार्थ एव स पुमानेकः सताम् ।
- **पञ्चमसंकल्पः -** सुपरिचालिता संहिति शक्तिरेव समाजं संगच्छध्वं संवदध्वं सम् वो मनांसि जानताम् ।

*****************

# आधुनिकराष्ट्रनिर्माणे युवकस्यावदानम्

रञ्जिता प्रधान
शिक्षाशास्त्री द्वितीयवर्षम्
pradhanranjita2525@gmail.com

- **उपोद्घातः -** अस्माकं राष्ट्रस्य विकासः युवकेषु निर्भरशीलः वर्त्तते । वर्तमानस्य युवकः स्वस्तन पौरः भवति । आदौ युवकः कः ? प्रश्ने सति उत्तरमायाति यः अन्यायस्य प्रतिरोधं करोति सः युवकः । अन्यायात् दूरं तिष्ठति सः युवकः । कालस्य परिवर्तनं करोति सः युवकः चेत्यादयः । अतः उच्यते – "नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा । शीलं च दुर्लभं तत्र

विनयास्तत्र सुदुर्लभः"[25] । अर्थात् युवकं विना राष्ट्रनिर्माणम् असम्भवं भवति । राष्ट्रनिर्माणे युवकस्य भूमिका अतीव महत्वपूर्णा भवति ।

- **विषयवस्तु** – पुण्यभूमिभारतवर्षे बहवः शिक्षितयुवकाः सन्ति । परन्तु ते कदापि स्वस्य कर्त्तव्यं प्रति प्रयत्नशीलाः न दृश्यन्ते । ते कदापि न अवगच्छति यत् तेषु देशस्य भविष्यः वर्त्तते । वर्तमानस्य युवकस्य उपरि देशस्य नूतनभविष्यः निर्भरशील । अर्थात् युवकानामुत्तमप्रशिक्षणमावश्यकम् । युवकान् स्वस्य कर्त्तव्यविषये चेतना दातव्या । वर्तमाने यः शिशुः भवति भविष्ये सः एकः उत्तमनागरिकः भवति । अधुना तु युवकानां शिक्षणनिमित्तमुत्तमा शिक्षा व्यवस्था अस्ति । परन्तु ते कदाचित् तस्य उपयोगं न कुर्वन्ति । इदानीं बहवः युवकाः कुमार्गेषु गच्छन्ति । युवकानां मनस्सु बहुः क्रोधः, लोभादीनां जागरणं भवति । अस्मिन् विषये सम्यग्भणितं वर्त्तते अत्र यथा "शोको नाशयते धैर्यं शोको नाशयते श्रतम् । शोको नाशयते सर्वं नास्ति शोकः समो रिपुः[26] । अर्थात् युवकाः स्वस्य शोकस्य कारणात् बहुसमस्याः अनुभवन्ति । पुनः क्रोधकारणात् अपि युवकः स्वस्य अनर्थं कुर्वन्ति । यथा उच्यते - "लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते । लोभात् मोहश्च नाशश्च लोभः पापस्य कारणम् [27] । अर्थात् सर्वेषाम् युवकानां कृते उपयुक्तशिक्षा आवश्यकी । तेषां कर्तव्यविषये बोधः कारणीयः । कारणं युवकस्य उपरि एव देशस्य भविष्यं भवति ।

**युवकानां कृते उपदेशः** – युवकानां कृते केचन उपदेशाः निर्दिष्टाः सन्ति । यः उपदेशः उत्तम नागरिकनिर्माणाय साहाय्यं करोति । यथा –

(1) यदि युवकाः कानपि दोषान् कुर्वन्ति चेत् ते कदापि धैर्यं न त्यजेयुः । सः दोषः एव तस्य कृते सफलतायाः प्रेरणां ददाति ।

(2) सर्वदा मनसि सकारात्मकं चिन्तनं जागरणं करणीयम् ।

**(3)** लक्ष्य प्राप्तेः निमित्तं गच्छति चेत् मार्गे विघ्नम् आगच्छति चेत् अपि लक्ष्य प्रथमं त्यागं न करणायम् ।

**उपसंहारः** – राष्ट्रनिर्माणे युवकानां भूमिका गुरुत्वपूर्णा वर्त्तते । अतः युवकानां कृते उपयुक्तं प्रशिक्षणम् आवश्यकम् । अस्मिन् विषये विचिन्त्य स्वामिविवेकानन्दः स्वस्य जन्मदिवसं विश्व-युवदिवसपालननिमित्तं निर्देशं दत्तवान् । अधुना प्रत्येकं वर्षे जनवरीमासस्य 12 दिनाङ्के समग्रविश्वे राष्ट्रीययुवदिवसरुपेण पालनं भवति । युवकानां स्वस्य कर्त्तव्यविषये अवगमनं

[25] नीतिशतकम्
[26] नीतिशतकम्
[27] नीतिशतकम्

करणीयम् । यः युवकः अध्ययनं न करोति तेषां कृते अध्ययनं देयम् । अध्ययनस्य निमित्तं समस्तव्यवस्था अपि करणीया । पुनः यः युवकः कुमार्गे गच्छति तेषां कृते उपयुक्त मार्गदर्शनं करणीयम् । फलतः एकः उत्तमः राष्ट्रः भवति ।

******************

# विद्यालयीयपाठ्यक्रमेषु मूल्यशिक्षा

प्रज्ञापरिमिता जेना
शिक्षाशास्त्री द्वितीयवर्षम्
prangyapritijena@gmail.com

मूल्यं जीवनस्य सारसत्वं वर्त्तते । जीवने मूल्यस्य महत्त्वमधिकं वर्त्तते । मूल्यमित्युक्ते आंग्लभाषायां 'Value' इति । 'Value' इति शब्दः लेटिनभाषायाः 'Valere' इति शब्दात् उत्पन्नोऽस्ति । यस्य च अर्थः कस्यचन वस्तुनः मूल्यं, गुणं, विशेषतामुपयोगितां च सूचयति । इदं मूल्यं सद्-गुणानां समूहः भवति । येन मूल्येन व्यक्तिः व्यक्तित्वविकासं कर्त्तुं समर्थः भवति । अत्र मानवस्य धारणा, विचारः, विश्वासः, मनोवृत्तिः तथा स्थितिः च समन्विता भवति । मूल्यं नास्ति चेत् कस्यापि पदार्थस्य, विचारस्य, मानवस्य किमपि महत्त्वं न भवति । समाजे सर्वेषां मूल्यं वर्त्तते । समाजस्य अपि मूल्यं भवति । तत् मूल्यं किमिति सर्वेऽपि जानीयुः । अतः विद्यालये सर्वेऽपि छात्राः मूल्यशिक्षायाः विषये जानीयुः । तेभ्यः मूल्यशिक्षाविषये ज्ञानं प्रदेयम् । तर्हि विद्यालये प्रदीयमानानां मूल्यशिक्षायां के के विषयाः स्युः ? सा शिक्षा कीदृशी स्यात् ? विषयेऽस्मिन् शिक्षाशास्त्रिणः चिकीर्षन्ति यत् पाठ्यक्रमनिर्धारणसमये मूल्यशिक्षायाम् एते विषयाः पाठ्यक्रमे समायोजनीयाः । येषामाध्ययनेन छात्राः मूल्यशिक्षाविषये अधिकं ज्ञातुमर्हन्ति । अपि च तेषां जीवनमपि मूल्ययुक्तं भविष्यति । पाठ्यक्रमे योजनीयाः विषयाः तद्यथा –

1 – **सदाचारपालनम्** -सदाचारः इत्युक्ते सत् आचारः । सर्वदा सद्व्यहारसत् वाक्यस्य परिपालनं करणीयम् । सदव्यवहारेण सर्वेषु जनेषु परिवर्तनमागच्छति । यदि कोऽपि सम्यक् व्यवहरति तं दृष्ट्वा अन्येऽपि तथैव व्यवहरन्ति । सर्वैः सह मिलित्वा मधुरवचनेन व्यवहारो भवेत् । मधुरवचनेन सर्वे सन्तुष्टाः भवन्ति । अतः उच्यते –**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः । तस्मात् तदेव वस्तव्यं वचने का दरिद्रता ।** सम्प्रति समाजे सदाचारस्य अभावः सर्वत्र दृश्यते । तस्याः समस्यायाः निवारणाय गृहेलये च एतस्मिन् विषये छात्रेभ्यः ज्ञानं विद्या , दद्यात् । येनतेषां व्यवहारे परिवर्तनमागच्छति । सदाचारपालनेन समाजस्य राष्ट्रस्यस्वस्य च , परिवर्तनमवश्यं भवति । एवं जीवनं सानन्दमयं भवति । इतोऽपि सदाचारे बहवः विषयाः

–। तदर्थमुक्तं यत्  चरित्रनिर्माणमित्यादयः ,व्यवहारः – आगच्छन्ति। यथा**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरनं पृथिव्यां सर्वमानवाः।**

**2 अहिंसापालनम् -** मनसा, वाचा, कर्मणा च हिसांयाः परित्यागमेव अहिंसा। अहिंसायाः महान् समर्थकः आसीत् महात्मागान्धी। अहिंसापालनेन मानवे मानवत्वं ,भ्रातृभावना , परोपकारभावना च आगच्छति। तदर्थमुच्यते 'अंहिसा परमो धर्मः'।

**3 परोपकारः –** मानवः भवतु वा प्राणी परेषामुपकारार्थं यत् किमपि क्रियते तत् भवति परोपकारः। परोपकाराय बहवः महापुरुषाः अस्माकं हिताय स्वजीवनं त्यक्तवन्तः। तदर्थमुक्तं यत् मानवसेवा माधव सेवा। नरसेवा नारायणसेवा। जनसेवा जनार्दनसेवा। सम्प्रति छात्रसमाजे परोपकाराय यत् सर्वं वर्तते वेदपुराणादिग्रन्थेषु तत् सर्वमुदाहरणत्वेन स्वीकृत्य , छात्रेषु परोपकारभावना जागरणीया। **परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः। परोपकाराय दुहन्ति गावः परोपकाराय इदं शरीरम्॥**

**4 विश्वबन्धुत्वभावनायाः विकासः -** विश्वेऽस्मिन् नैकाः जनाः निवसन्ति। तेषु जनेषु विविधता वर्त्तते। सर्वेषु जनेषु बन्धुत्वभावना स्थापनाय अस्माभिः प्रयासः करणीयः। कीदृशः प्रयासः इत्युक्ते अस्माभिः सर्वैः सह सम्यक् व्यवहारः कर्तव्यः। सर्वे अस्माकं भ्रातरः भगिन्यश्च इति विचिन्त्य भ्रातृत्वभावना प्रदर्शनीया।

**5 समाजसेवा -** मानवाः प्राणी वा भवतु सर्वेषां मूल्यं भवति। कुत्रचित् गुणं दृष्ट्या कुत्रचित् परिमाणं दृष्ट्या च मूल्यं वक्तुं शक्यते। यतोऽहि सर्वेषां मूल्यं भवति अतः तस्मिन् विषये अधिकं ज्ञानप्रदानाय प्रयासः करणीयः। अतः विद्यालयपाठ्यक्रमे मूल्यशिक्षा विषयः भवेत्।

**सन्दर्भग्रन्थाः -**

1. शिक्षायाः दार्शनिकाधारः 2005- ड़ाँ सोमनाथ -नाम , साहु -उपनाम, जगदीशसंस्कृतपुस्तकालयःजयपुरम्।,
2. चाणक्यनीति।

# अन्तद्वारपाठ्यसहगामीक्रियाणां संस्कृतशिक्षणे समावेशः

सस्मिता बिसोइ
शिक्षाशास्त्री द्वितीयवर्षम्
sasmitabisoi1@gmail.com

संस्कृतभाषा देवभाषा भवति। सर्वाः भाषाः संस्कृतभाषातः निस्सृताः भवन्ति। संस्कृतभाषा सर्वं सिध्यति। पूर्वकाले संस्कृतभाषया पाठनमासीत्। इदानीमपि संस्कृतभाषायाः महत्वं वर्त्तते। परन्तु सा भिन्नरूपेण भवति। यथा संस्कृतशिक्षणम्। यः संस्कृतं न जानाति सः सुसंस्कृतिपूर्णः न भवति। अर्थात् जीवने धर्मस्य, परम्परायाः आवश्यकता वर्त्तते। वयं तु समाजविषये बहुःकिमपि जानीमः परन्तु संस्कृतशिक्षणविषये ज्ञातव्यमस्ति। संस्कृतशिक्षणं प्रधानतः द्विधा भवति। संस्कृतपाठशालासु, संस्कृतविद्यालयेषु च पारम्परिकरूपेण, सामान्यविद्यालयेषु, सामान्यमहाविद्यालयेषु च आधुनिकरूपेण इति। पारम्परिकरूपेण गुरुकुले अर्थात् संस्कृतपाठशालासु शिक्षणमासीत्। सा तु एकमुखीप्रक्रिया आसीत्। तत्र केवलमध्यापकस्य पाठनमासीत्। छात्रक्रियाः न आसीत्। परन्तु इदानीं द्विमुखीप्रक्रियया बहुमुखीप्रक्रियया च संस्कृतस्य पाठनं भवति। अर्थात् कक्षासु अध्यापकक्रिया अपि च छात्रक्रिया भवति। कथं भवति ? इत्युक्ते सर्वदा अध्यापकः कक्षासु पाठयति चेत् कक्षा सक्रियात्मिका न भवति। अतः कासाञ्चित् पाठ्यसहगामिक्रियाणामावश्यकता वर्त्तते।

पाठ्यसहगामिक्रियाः इत्युक्ते छात्राणां मनसि क्रियासदृशं सक्रियत्वम् उत्पादनम्। अर्थात् कक्षासु क्रियामाध्यमेन पाठनं भवति पाठ्यसहगामिक्रिया। अद्यतन सर्वेषु विद्यालयेषु पाठ्यसहगामिक्रियाभिः पाठनं भवति। नो चेत् पाठनं नीरसं भवति। ताः पाठ्यसहगामिक्रियाः अधोभागे वर्तन्ते।

**1.साहित्यिकक्रियाः -** साहित्यिकक्रियाकरणेन छात्राणां मनसि प्राकृतिकानुभवः रसानुभवः च आगच्छति।

**2. वादविवादः -** वादविवादेन छात्राणां मनोरञ्जनं भवति। इच्छाशक्तिः वर्धते। छात्राः कक्षायां स्थित्वा संस्कृतेन भाषितुं पञ्चवाक्यं वक्तुं शक्नुवन्ति।

**3. विद्यालयपत्रिका –** छात्राः विद्यालयपत्रिकां लिखन्ति चेत् तेषां लेखनकौशलस्य विकासः भवति। छात्राणां संस्कृतभाषाविषये चिन्तनशक्तेः विकासः भवति। ते स्वयं चिन्तयित्वा लिखन्ति। तेषां मनसि नूतनचिन्तनमागच्छति। एतद्द्वारा छात्राणां सर्वाङ्गीणविकासः भवति।

**4. संगीतं तथा नृत्यम् -** संगीतं तथा नृत्यादिक्रियाद्वारा छात्राः मनोरञ्जकाः भवन्ति। संगीतश्रवणेन छात्राणां स्वास्थ्यं सम्यक् भवति। नृत्यकरणेन छात्राणां शरीरस्य अवयवाः सम्यक् कार्यं कुर्वन्ति। छात्रेषु उत्सुकता वर्धते।

**5. क्रीड़ा- शारीरिकव्यायामः** – स्वस्थे शरीरे स्वस्थमनः। छात्राणां शरीरं स्वस्थं भवति चेत् मनः स्वस्थः भवति । अतः स्वस्थशरीरस्य कृते क्रीडाव्यायामादि-आवश्यकं वर्त्तते । छात्राः शारीरिकव्यायामं कुर्वन्ति चेत् स्वस्थमनुभवन्ति।

**6. छात्रसमितिः** – छात्रसमितिमध्ये विभिन्न पाठ्यसहगामिक्रियाः भवन्ति यथा अन्त्याक्षरी, अक्षरश्लोकं, शब्दक्रीडा इत्यादयः। अत्र छात्राः सक्रियाः भूत्वा भावग्रहणं कुर्वन्ति।

**7. समस्यापूर्तिः** – कक्षायां छात्राणां मनसि आग्रहमानयितुं गानस्पर्धा, शब्दक्रीडा, कथाकथनं, वाक्यरचना, प्रश्नोत्तरस्पर्धा इत्यादीनि आवश्यकानि।

**उपसंहारः -** एवं प्रकारेण पाठ्यसहगामिक्रियाणां द्वारा छात्राः कक्षायां पठनाय आग्रहं यच्छन्ति। तैः कक्षा सक्रिया भवति। कक्षायां पाठ्यसहगामिक्रियामाध्यमेन पाठनं भवति चेत् छात्राः संस्कृतपठने रूचिं ददति। ये छात्राः विद्यालयं जामिता कारणेन न आगच्छन्ति ते आगन्तुम् आग्रहं प्रकाशयन्ति। तेषां विविधक्रियाणां रूचिः आगच्छति। सम्यक् तया विषयमपि अवगच्छन्ति।

**सन्दर्भग्रन्थाः**


1. संस्कृतशिक्षणम् – नवीनप्रविधयश्च जयपुरम्(2008)302015-
2. विद्यालयप्रशासनम् जयपुरम्


******************

## संस्कृताध्यापकः


श्रद्धाञ्जली सेनापतिः

शिक्षाशास्त्री द्वितीयवर्षम्

sradhanjalisenapati786@gmail.com


- **उपोद्धातः** -अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मिलितं येन तस्मै श्री गुरवे नमः। इदानीं भारतं यस्यां परिस्थितौ वर्त्तते, तत्रावश्यं शिक्षकाणां कर्तव्यहीनता येन केन प्रकारेण एकां महत्वपूर्णभूमिकां निर्वहति। अर्थशास्त्रस्य प्रणेता आचार्यः स्वाभिमतं प्रकटितवान् यत् – तस्य हस , शिक्षकः साधारणः न भवति्ते सृष्टिः प्रलयश्चोभौ सदा भवतः। सः विद्वान् , पण्डितःअश्रद्धवान् अस्ति तर्हि ,म्यक् न तु यदि सः अंहकारयुक्तःसर्जकः अस्ति चेत् स ,

विनाशकारणमेव । सर्वे वदन्ति शिक्षकः राष्ट्रस्य निर्माता भवतीति । अतः शिक्षकस्य गुणदोषकर्तव्यविमर्शनाय विलिख्यते मया।

- **अध्यापकस्य लक्षणम्** -अत्र सर्वप्रथममध्यापकस्य लक्षणं विविधशास्त्रेषु कथं वर्णितमिति दृष्टिपथे आनीयते । महाभारते कृष्णद्वैपायनेन पण्डितस्य लक्षणत्वेन आध्यापकलक्षणं प्रतिपादितम् । आत्मज्ञानं समारम्भस्तितिक्षा धर्मनित्यता । यमर्था नापकर्षन्ति स वै पण्डित उच्यते। श्रुतं प्रज्ञागुणं यस्य प्रज्ञा चैव श्रुतागुणा। अस्मम्भिन्नार्यमर्यादः पण्डिताख्यां लभेत् सः । अर्थात् अध्यापकः आत्मज्ञानी, समयानुवर्ती ,सुचिन्तकः ,सहिष्णुः ,क्षमाशीलः ,सुकार्यकर्ता , सन्तोषी च भवेत् । ,अपरिग्रही ,ईश्वरप्रणिधानः ,श्रद्धावान् ,सुमार्गदर्शकः न केवलमेतदेव अपितु उत्तमानुत्तमविवेचनज्ञानम् ,अहिंसा ,तेजः ,क्षमा ,शान्तिः ,त्यागः ,अक्रोधः ,सत्यम् , – धैर्यमित्यादि मूलभूतगुणाः स्यादिति। अतः मालविकाग्निमित्रे अध्यापकस्य लक्षणम् उवाच श्लिष्टा क्रिया कस्यचिदात्मसंस्थासंक्रन्तिरन्यस्य विशेषयुक्ता। , यस्योभयं साधु स शिक्षकाणां , धुरु प्रतिष्ठापयतिव्यएव । अर्थात् कस्यचित् शिक्षकस्य अन्तः ज्ञानानुभवश्च सन्ति चेत् सः सम्प्रेषणकौशले दक्षः नास्ति यस्य सम्प्रेषणकुशलता वर्तन्ते सः ज्ञानवान् नास्ति । अतः , यस्योभयं ज्ञानं सम्प्रेषणकौशलं च वर्तन्ते सः शिक्षकाणामग्रगण्यः साधु च वर्तते। अध्यापकः न केवलं ज्ञानवान् अपितु सम्प्रेषणे कौशलेनापि उत्तमः भवेत्। उपयुक्तगुणाः अध्यापकेषु भवेत् । एते गुणाः तु केवलं संस्कृताध्यापकेषु न सर्वेषु अध्यापकेषु अपेक्षन्ते एव।
- **कर्तव्यानि** -संस्कृतशिक्षकस्य कानि कर्तव्यानि ? समाजे संस्कृतशिक्षकाणां वर्तमानस्थितिः का ? विद्यालयः लघुसमाजः भवति । तत्रापि सर्वक्षेत्रेषु प्राविधिकम्भवनानां बाहुल्यं सर्वथा अवलेक्यते एव। विद्यालये सामाजिकविकासाय च ,नैतिक राष्ट्रयमूल्यानां पूर्तये -सांस्कृतिक- – ज्ञानं दीयते एवमावश्यकमपि अङ्गीक्रियते जनैः। अतः आध्यापकस्य कर्तव्यानि

1. **विविधशिक्षणविधिषु कुशलता** – संस्कृतशिक्षकेण विषयाबोधनसमये न केवलं प्राचीनशिक्षणविधीनामाश्रयणं कर्तव्यमपितु आधुनिकशिक्षणविधीनामपि आवश्यकमेव । प्राविधिक्कतकनीकीषु च कुशलः स्यात्।
2. **प्रभावात्मकचरित्रस्य विकासः** – संस्कृतशिक्षकस्य महत्वपूर्णम् अनिवार्यं कर्तव्यं यत् सः आत्मनः चरित्रमुच्चं प्रभावात्मनकम् अनुकरणीयञ्च कुर्यादिति।
3. **छात्रेषु विविधमूल्यानां विकासः -** यद्यपि छात्रेषु विविधमूल्यानां विकासाय उत्तरदायित्वं प्रत्येकशिक्षकस्य वर्तते। परन्तु इदानीं न तथा। अतः संस्कृतशिक्षकस्य दायित्वमिदं यत् सः

अध्यापनेननै ,तिकमूल्यानां यथा सम्भवं विकासं कुर्यादिति। यथा –**सत्यं वद ,धर्मं चर ,**
**परोपकारः पुण्याय पापाय परपीड़नम्। ,वसुधैव कु□म्बकम् ,स्वाध्यायान्मा प्रमदः**

4. **भाषयाः विकासः** – संस्कृताध्यापकः भाषाध्यापकः इत्युच्यते। अतः छात्रेषु भाषुकतत्वानां विकासस्य उत्तरदायित्वमपि तथ्यैव। भाषा कौषलानां (लेखनश्च-पठन -भाषण -श्रवण) विकासोऽपि करणीयः। एतदर्थम् अध्यापकः प्रथमे शुद्धाशुद्धज्ञानं विधाय तदनुगुणमाचरणमपि भवेत् ।संस्कृतस्य शिक्षकः भाषासु कुशलः ,स्वाध्यायशीलः ,सम्प्रेषणदक्षः ,ज्ञानवान् , छात्रवत्सलः स्यादिति। संस्कृताध्यापकस्य प्रयासः पुनर्भारतं ,व्यवहारे उदारभावना ,मधुरभाषी भविष्यति।

- **उपसंहारः -** संस्कृताध्यापकः अध्यापकवत् भवेत्। अध्यापकः ज्ञानं यच्छति। येन कारणेन सर्वे मुक्तिं प्राप्नोति अतः सांख्यसूत्रानुसारमुच्यते –**"ज्ञानात् मुक्तिः "**अध्यापकः अज्ञानात् ज्ञानं प्रति नयति। वैज्ञानिकयुगे अध्यापकःउपाध्यायः ,शिक्षकः उच्यते परन्तु पुराकाले गुरुः ,। अतः उच्यते "अध्यापकः समाजस्य मानदण्डः कथ्यते " । Teachers are backbone of socity . अतः एकवारं समेऽपि संस्कताध्यापकाः भारतं भारतं करणाय कटिबद्धाः भवेयुः।

**सन्दर्भग्रन्थसूची –**


1. महाभारतम् – भगवान् कृष्णद्वैपायनः।
2. मालविकाग्निमित्रम् 969 –/9
3. संस्कृतशिक्षणम् – उदयशंकर झा।
4. श्रीमद्भगवद्गीता 3 –/29
5. श्रीमद्भगवद्गीता 96 –/9/2/3गीताप्रेस्


*****************

# राष्ट्रनिर्माणे छात्र-शिक्षकयोः भूमिका


पूर्णिमा परिडा
शिक्षाशास्त्री द्वितीयवर्षम्
Purnimaparida934@gmail .com


सामाजिकदृष्टिकोणात् शिक्षा मनुष्यस्य एकः मौलिकाधिकारः । तम् अधिकारं सफलीकर्तुं शिक्षकः एकः उत्तमः माध्यमः यः स्वस्य स्वार्थं त्यक्त्वा उत्तमछात्रान् निर्माति। शिक्षकस्य महानता निष्ठा च अवर्णनीया। शिक्षकः छात्राणां मार्गदर्शकः एव। शिक्षकं विना छात्रस्य जीवनम् अपूर्णं भवति। शिक्षकः छात्रस्य चरित्रगठनाय मुख्यभूमिकां वहति। शिक्षकः एकमात्रजनः यः उत्तमराष्ट्रगठनाय

सहायतां करोति । समाजं प्रति शिक्षकस्य कर्त्तव्यः अधिकः अस्ति । शिक्षकः कुम्भकारसदृशः भवति । यथा एकः कुम्भकारः मृत्तिकातः घटनिर्माणं करोति तथा शिक्षकः बहुपरिश्रमेण उत्तमछात्रान् निर्मीति । सः छात्रः तस्य परिवारस्य, समाजस्य, देशस्य च उन्नत्यै कार्यं करोति । छात्रः राष्टस्य भाविनागरिकः । राष्ट्रनिमाणे छात्र-शिक्षकयोः भूमिका आवश्यकी । अतः उच्यते - "**स्वार्थत्यागपराःसुनीतिकुशला निर्मत्सरा धार्मिका । विद्याभ्यासरताः परार्थघ□काः सत्यप्रिया बालकाः । देशस्योन्नतये भवन्ति प□बः सत्शिक्षकाध्यापिता- स्तस्मात् शिक्षकता सदा बलवति रराज्यते भूतले** [28]" । समाजनिर्माणे छात्र-शिक्षकयोः भूमिका अत्यन्त्यावश्यकी । यदि समाजस्य उन्नतिः भवति चेत् राष्ट्रस्य उन्नतिः भविष्यति । अतः बाल्यकालात् एव छात्रान् समाजसेवायै नियोजिते सति समाजस्य दुर्नीतिः, कुसंस्कारः, अशिक्षादयः दूरीकर्तुं शक्नुमः । एतेषां कुकार्याणां निवारणाय छात्रैः निम्नोक्तीनां पालनं करणीयम् । यथा - (1) छात्राः राजनीत्यां भागग्रहणं कुर्युः । (2) सामरिकक्षेत्रेषु योगदानं कुर्युः । (3) राष्ट्रस्य उन्नत्यै योजनां कुर्युः । (4) छात्राः समाजसेवां कुर्युः । (5) समाजे स्थित-दुर्निर्तिं निवारयेत् । (6) राष्ट्रस्य परम्परानामनुकरणं कुर्युः । (7) मम राष्ट्रः मम जन्मभूमिः इति भावना छात्रेषु स्यात् । एतानि कर्त्तव्यानि छात्रैः अनुकरणीयानि । इतोऽपि छात्रेषु मुख्यगुणाः भवेयुः यथा - "**सत्यं** बोधदया क्षमा च रुचिरा प्रज्ञा परा शोभना । लोकानां हितकाराता प्रतिपदं दीने जने मार्दवम् । प्रतिदेवगुरौ द्विजे परिजने सत्संगतौ मानसम् । हयते दिव्यगुणाः वसन्ति पुरुषे शिक्षाऽस्ति **चेत्सार्थिका**" [29]**।** छात्रस्य पार्श्वे सत्भावना ,दयाभावना ,क्षमाभावना च अस्ति चेत् शिक्षा सार्थका भवति । पुनः शिक्षकस्य अपि उत्तमागुणाः भवेयुः । यथा – स्वीय अध्यापकपदे गौरवं स्यात्, सहनशीलता स्यात्, अनुशासनप्रियः स्यात्, परोपकारभावना स्यात्, सदाचारः शीलता च भवेत् । , समवायः स्यात्, आत्मसम्मानी स्याच्चेत्यादयः । एते गुणाः शिक्षके भवन्ति चेत् छात्राः तद् दृष्ट्वा प्रेरिताः भवन्ति । अपि च तदानुसारं कार्यं कृत्वा एकोत्तमराष्ट्रनिर्माणं कर्तुं शक्नुवन्ति । केवलम् एकः शिक्षकः एव उत्तमछात्राणां निमाणं करोति । येन छात्राः राष्ट्रस्य उन्नत्यै उत्तमकार्याणि कुर्वन्ति । उत्तमकार्यकरणेन राष्ट्रस्य उन्नतिः भविष्यति । अतैव उच्यते - "The road to success is always under construction"

**सन्दर्भग्रन्थाः-**


1. मानवाधिकारोपेतमूल्यशिक्षा, लक्ष्मीधर पण्डा .-Teerataranga publication , Bhubaneswar -2012 , ISBN -920554-97
2. विद्यालयप्रशासनम् – डा – माताप्रसाद शर्मा जयपुरम् ,जगदीश संकृतपुस्तकालयः ,
3. शिक्षायाः दार्शनिकधाराः – सोमनाथ साहु 2013 , जयपुर ,जगदीश संकृतपुस्तकालयः ,


******************

[28] मानवाधिकारोपेतमूल्यशिक्षा, प्रथमोऽधायः page - 45

[29] मानवाधिकारोपेतमूल्यशिक्षा,प्रथमोऽधायः, page- 13

# विज्ञानस्य उपलब्धयः तस्य दोषाश्च

सुचित्रा वेहेरा
शिक्षाशास्त्री द्वितीयवर्षम्
suchitrar49@gmail.com

**उपोद्घातः -** विज्ञानशास्त्रं द्विविधं प्रवर्तते, लाभाय लोकस्य च नाशनाय। एकत्र लाभो जनता-समृद्धिः, अन्यत्र लोकस्य विनाशनं च । वर्तमानयुगं विज्ञानस्य युगं मन्यते । विज्ञानं जीवनस्य प्रत्येकं पक्षं प्रभावयति यथा आर्थिकं, सामाजिकं, राष्ट्रीयम् अन्तराष्ट्रीयं चेत्यादयः । आविष्काराणां तादृशी प्रगतिरस्ति या सर्वथा आश्चर्यं जनयति। विज्ञानं प्रतिदिनं नवीनानां यन्त्रादीनाम् आविष्कारेण मानवस्य सुखं सौविध्यं च वर्धयति। विविधयन्त्राणां प्रयोगेण वैद्युतिक-सूक्ष्म-उपकरणानां च प्रयोगेण मानवस्य याऽपि आवश्यकता वर्तते, तस्याः पूर्तिः अनेन जायते।

**विषयवस्तु** – साम्प्रतं संगणकस्य आविष्कारो विज्ञानस्य सर्वोत्तमा उपलब्धिः । संगणकः सर्वासु क्रियासु अपेक्षते । यथा भवनानां निर्माणे रोगाणां परीक्षणे, वाणिज्य-व्यवसाये, शिक्षाशास्त्रे, चिकित्साक्षेत्रादिषु। विद्युतः आविष्कारोऽपि महत्वपूर्णोऽस्ति। चिकित्साक्षेत्रे विज्ञानेन अपूर्वा क्रान्तिः प्रवर्तिता। अधुना शल्यक्रियया अंग- प्रत्यारोपणं, कृत्रिमगंरोपणं संभाव्यते। संचारक्षेत्रेऽपि विज्ञानस्य चमत्कारो दृश्यते। दूरवाणी इत्यस्य आविष्कारेण नूतना क्रान्तिः संजाता।

**विज्ञानस्य दोषाः -** नात्र कश्चन सन्देहो यद् विज्ञानेन सहस्रशः सुविधाः प्रदत्ताः परं विज्ञानस्य दुरुपयोगेण विज्ञानम् अभिशापरुपेणापि अधुना परिणमते।

**विज्ञानस्य प्रमुखाः दोषाः सन्ति -**

1. विकासकार्यार्थं यानि महायन्त्राणि निर्मितानि तानि प्रदूषणकारणानि।
2. विनाशकारिविस्फोटकानां द्वारा समस्तजीवजगतः जीवनम् आपत्सु पतिततम्।
3. जीवनशैली परिवर्तिता। ऋतुपरिवनर्तने अपि महत्परिवर्तनं सञ्जातम्।

**4. निष्कर्षः** – विज्ञानस्य लोकहितकरणं वर्तमानयुगो विज्ञानस्य युगो मन्यते । विज्ञानं जीवनस्य प्रत्येकं पक्षं प्रभावयति। तदैव विज्ञानं वरदानं भविष्यति।

*****************

# अधिगमे मातृभाषायाः प्रभावः

मनोरमा अगस्ति
शिक्षाशास्त्रिद्वितीयवर्षम्
manoramaagasti1232@gmail.com

**उपोदघातः** – अस्मिन् प्रपञ्चे मानवः श्रेष्ठः जीवः भवति । शिशुः जन्मसमये निःसहायः भवति । स्वावश्यकतानां पूर्त्तये सर्वदा मातरमाश्रयते । गच्छता कालेन ज्ञानेन्दियेषु चेतना शक्तिः प्रबला भूत्वा विविधाः प्रतिक्रियाः करोति येन वातावरणे सामञ्जस्यं संपाद्यते ।

**आधिगमः -** व्यक्तौ अनुभवेनाभ्यासेन प्रशिक्षणेन च जयमानानि सापेक्षितानि परिवर्तनानि एवाधिगमः । एषः अधिगमः मनुष्यस्य जन्मादारभ्य मृत्युपर्यन्तं निरन्तरं प्रचलति । उदाहरणार्थम् - एकः लघुबालः दीपं दृष्ट्वा हस्तेन तं गहीतुं प्रयतते । तस्य हस्तः ज्वलति तथा सः पीडामनुभवति । अनेनानुभवेन तेन ज्ञायते यद्यहं दीपं गृह्णामि तर्हि हस्ते ज्वलनं भविष्यत्येव । अतः सः कदापि भविष्ये दीपं न स्पृशति । एषः भवत्यधिगमः।

**अधिगमस्य परिभाषा-**

1- व्यवहारे उत्तरोत्तरसामञ्जस्य प्रक्रिया एवाधिगमः **(स्किनरमहोदयः)**
2- उच्चाराणां ज्ञानस्याभिवृत्तिनाञ्च प्राप्तिरेवाधिगमः **(क्रो महोदयः)**

**भाषा -** भाष्यते अनया इति भाषा । भाषा शब्दः **भाष् व्यक्तयां वाचि** इति **धातोः गुरोश्च हल** इति सूत्रेण **अ**प्रत्यये, **अजाद्यनष्टाप**सूत्रेण **□ाप्**प्रत्ययेन भाषा इति सिद्ध्यति । अतः उच्यते भावप्रधानस्य साधनः भवति भाषा इति । अस्मिन् प्रपञ्चे बहुविधाः भाषाः दृश्यन्ते । यथा - राष्ट्रभाषा, सम्पर्कभाषा, प्रादेशिकभाषा, अन्तराष्ट्रियभाषा, मातृभाषा चेत्यादयः । एतासु भाषासु **मातृभाषा** अन्यतमा वर्त्तते ।

**मातृभाषा -** स्वैछिकेन ध्वनिसङ्केतेन मनसः भावान् मुखरीकर्तुं साधनं भवति मातृभाषा । मातुः द्वारा या भाषा प्रयुज्यते सा भवति मातृभाषा । यस्मिन् गृहे या भाषा प्रयुज्यते सा भवति गृहभाषा । जन्मान्तरं

बालकस्य प्रथमरुपेण मातृभाषाव्यवहारो दृश्यते। शिशुः यदा प्रथमवारं किमपि वदति सा भाषा भवति मातृभाषा। ततः परं अन्यभाषाः ज्ञायन्ते। मनुष्याणां विकासमपि तेषां मातृभाषायाः उपरि निर्भरं करोति। ज्ञानप्राप्तये मातृभाषा सरलः माध्यमः वर्त्तते। मातृभाषायाः विषये अस्माकं पूर्वतन राष्ट्रपतिः डॉ अब्दुलकलाममहोदयेन स्वस्यानुभवाधारेणोक्तम् - **अद्य अहम् एकः उत्तमः वैज्ञानिकः कारणं भवति मम मातृभाषा**। अहं मम गणितमेवं विज्ञानं मातृभाषया प्राप्तं कृतवान्। मनुष्याणां मातृभाषया भावाभिव्यक्तेः विचारणग्रहणस्य या योग्यता भवति तादृशी योग्यतान्यभाषायां न भवति।

**अधिगमे मातृभाषायाः प्रभावः -**

1. यदि कक्षायाम् अधिगमे मातृभाषा भवति तर्हि छात्राः स्वल्पे समये एव अधिगच्छन्ति।
2. मातृभाषा भवति चेत् छात्राः सरलगद्यांशम् शुद्धरुपेण पठितुं शक्नुवन्ति।
3. मातृभाषया स्वभावं सारल्येन प्रकाशयितुं शक्नुमः।
4. मातृभाषया वयं सम्भाषणम् अपि कर्तुम् शक्नुमः।
5. आङ्गलभाषया एवं सस्कृतभाषया अवगमनार्थं मातृभाषा।
6. कस्यामपि भाषायां सरलश्लोकानुवादस्य व्याख्यानस्य च क्षमता।
7. मातृभाषया वयं यत् किमपि पठामः सर्वदा दृढरूपणे वक्तुं शक्नुमः।
8. मातृभाषया छात्राणां स्मरणशक्तेः, तार्किकशक्तेः, चिन्तनशक्तेः, सृजनात्मकशक्तेः च विकासः भवति।
9. यदि मातृभाषया अधिगमः भवति चेत् विषये सम्पूर्णतया प्रौढता भवति।
10. मातृभाषायाः माध्यमेन मानवाः स्वस्य भावस्य प्रकटनम् शक्यते।

**निष्कर्षः -** समग्रेऽस्मिन् विश्वे बहव्यः भाषाः दृश्यन्ते। एतासु सर्वासु भाषासु यदि कक्षायां मातृभाषा भवति चेत् छात्राणं सम्यकाधिगमः भवत्येव। मातृभाषया अधीतः पाठः सर्वदा मनसि एव तिष्ठति। एवं प्रकारेण सस्कृतभाषा भवतु वा आङगलभाषा भवतु, भाषाधिगमे मातृभाषायाः प्रभावः दृश्यते एव।

**सन्दर्भग्रन्थाः –**

1- शिक्षायाः मनोवैज्ञानिकधाराः, डॉ बि.पद्मश्री श्री निवासः, संस्करणम् – 2012, लेजर टाईप सैटिंग-सरस्वती कम्प्युटर्स,जयपुर।

******************

# हे नववर्ष !

अर्पिता अनुपमा
शिक्षा शास्त्री द्वितीयवर्षम्
aanupama171195@gmail.com

हे नववर्ष !
त्वम् आनय सर्वेषां कृते..........

नूतना आशा, नूतनः उत्साहः, नूतना सम्भावना।

त्वम् आनय

नूतनः स्वप्नः, नूतनः जागरणः, नूतना उन्मादना।

विस्मरमणं भवतु..........

विगतस्य दिनस्य तिक्तानुभूतीनाम्।

यावत् भयानाम् अविश्वासानां यातनानाम् ..........

हे नववर्ष !

त्वम् आनय देशजातीनां कृते.......
नूतनः गौरवः, नूतनः स्वाभिमानः, नूतना परिकल्पना।
त्वम् आनय
नूतनः दृष्टिकोणः, नूतनः आलोकः, नूतना मैत्रीभावना।
विस्मरणं भवतु........
विगतस्य दिनस्य तिक्तस्मृतीनाम्।
यावत् हिंसा, द्वेषः, असूयादिभावना.........
हे नववर्ष !
त्वम् आनय नारीणां कृते .........
यथोचितसम्मानं तथा सद्भावना।
यवनिका पततु........
नारीणां कृते अन्यायाः अत्याचाराः।
न भवन्तु........
बलात्कारस्य धर्षणस्य च घटनाः।
एतावत् हि अस्य नववर्षस्य कामना

श्री जगन्नाथस्य कृते मम प्रार्थना ।।

# प्रान्तीयविद्यालयच्छात्रेषु संस्कृतभाषादक्षताभिवर्धनम्

राजेन्द्र कुमार साहुः
शिक्षाशास्त्रिद्वितीयवर्षम्
rajuscsvmv@gmail.com

**उपोद्घातः** - परिवर्तनशीले अस्मिन् संसारे जन्मप्राप्तिः एवं जन्मप्राप्तेः अनन्तरं विद्याध्ययनं विद्याध्यनादनन्तरम् अध्यापकवृत्त्याचरणम् अत्यन्तं दुर्लभं भवति। एतादृशाः अवसराः प्रायः सर्वेभ्यो न लभन्ते। परन्तु केचन अध्यापकवृत्तिम् अत्यन्तं सरला एवं धनोपार्जनाय परमसाधनमिति आमनन्ति। परन्तु यदि वयं प्राचीनकालिकशिक्षाव्यवस्थातः अद्यावधिपर्यन्तशिक्षाव्यवस्थां पश्यामश्चेत् ज्ञातुं शक्नुमः यत् पाठनं नैव सुकरमिति। एतस्य कारणं भवति प्रगतिशीलसमाजे परिवर्तनम् एवं परिवर्तनेन सह विविधानां समस्यानाम् आविर्भावः । एतादृश्यः समस्याः न केवलं साहित्य-गणित-भूगोल-विज्ञानादीनां पाठने अपि तु संस्कृतभाषाध्ययने अपि राराजन्ते। अतः ताः समस्याः अभिगणयन् कथं रूपेण संस्कृताध्यापकः विद्यालये छात्रेषु संस्कृतभाषादक्षतोत्पादनं कर्तुं कथं शक्नोति तदत्र संक्षेपेण प्रस्तूयते।

**विद्यालयेषु संस्कृतस्य स्थितिस्समस्या च -** प्रान्तीयविद्यलयेषु कुत्रचित् संस्कृतम् अनिवार्यरूपेण पाठ्यते कुत्रचित् ऐच्छिकरूपेण तदपि अनुवादपद्धत्या। अतः तत्र संस्कृतस्य स्थितिरनुन्नता भवतीति वक्तुं शक्यते।

**विद्यालयेषु छात्राणां स्थितिः समस्याश्च -** प्रान्तियविद्यलयेषु प्रायः सर्वेषां विषयाणां पठनपाठनं मातृभाषया एव प्रचलति। अतः छात्राणाम् अधिगमः झटित्यैव जायते। परन्तु संस्कृते तथा न भवति। संस्कृतभाषा छात्राणां मातृभाषा न भवति । अतः संस्कृताध्यापकः अनुवादपद्धत्या पाठयति चेदपि छात्राः एनां भाषाम् अधिगन्तुं काठिन्यताम् अनुभवन्ति।

**संस्कृतभाषाकौशलसम्पादनाय अध्यापकस्य भूमिका –**

- **संस्कृतभाषावाङ्मयविषयकज्ञानम्-** बहुत्र विद्यालयेषु एतादृशाः अध्यापकाः सन्ति ये स्वयं संस्कृतभाषावाङ्मयविषये किमपि न जानन्ति । अतः एतादृशैः अध्यापकैः संस्कृतभाषायाः विकासः नैव सम्भवति। अतः संस्कृताध्यपकः आदौ स्वयं संस्कृतभाषावाङ्मयञ्च जानीयात्।
- **छात्रेषु संस्कृतभाषां प्रत्यभिरूच्युत्पादनम् -** छात्राः स्वीयाधिकसमयं विद्यालये यापयन्ति। अतः छात्राणां कृते भाषाध्यनाय एषः कश्चन अपूर्वावसरः भवति । यदि संस्कृतभाषाध्ययने छात्राणां रुचिः न भवति चेत् भाषाज्ञानं कदापि न सम्भवति । अतः संस्कृताध्यापकेन विविधकौशलानां प्रयोगं कृत्वा छात्रेषु संस्कृतभाषाध्ययनाय अभिरुचिः उत्पादनीया।

- **संस्कृतवातावरणनिर्माणम् -** भाषाधिगमसन्दर्भे वातावरणस्य प्रभावः अधिगन्तृषु बहुः भवति इत्यतः संस्कृताध्यापकः भाषाध्यापनाय तदनुकुलवातावरणस्य निर्माणं कुर्यात्, येन छात्राः अनायासेन संस्कृतभाषां शिक्षेरन्।
- **मातृभाषातः संस्कृतपदानां चयनं विश्लेषणञ्च -** सर्वांषां भारतीयभाषाणां जननी भवति संस्कृतभाषा। अर्थात् विश्वे प्रायशः सर्वाः भाषाः संस्कृतभाषातः समागताः। अतः प्रत्येकं भाषासु बहूनि संस्कृतपदानि भवन्ति। अतः संस्कृताध्यापकःपाठनसन्दर्भे तेषां पदानां चयनं कृत्वा विश्लेषणं कुर्वन् संस्कृतपदेन सह तेषां सम्बन्धं स्थापयेत् चेत् छात्राणां चिन्तनसृजनात्मकशक्तिश्च एधत्स्व।
- **संस्कृतपाठने आधुनिकोपकरणानां प्रयोगः -** संस्कृतभाषाध्ययनसन्दर्भे शिक्षणोपकरणान्यत्यन्तोपकाराय भवन्ति। तानि त्रिविधानि यथा **दृश्योकरणानि** प्रक्षेपकयन्त्रं, प्रतिकृतिः श्यामपट्चित्रं चादयः। श्रव्योपकरणानि आकाशवाणी, ग्रामोफोन्, टेप् रिकार्डर। दृश्यश्रव्योपकरणानि यथा दूरदर्शनं, सङ्गणकमादयः। अतः पाठनं रुचिकरं प्रभावी च कर्तुम् संस्कृताध्यापकः आवश्यकतानुसारम् एतेषां प्रयोगं जानीयात्।
- **पाठ्यसहगामिक्रियाणाम् आयोजनम् -** छात्राणां सर्वाङ्गीणविकासे पाठ्यसहगामिक्रियाः अत्यन्तोपकारकाः भवन्ति। अतः भतृहरिणा नीतीशतके उक्तमस्ति-

  **साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पृच्छविषाणहीनः।**
  **तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्[30] ॥**

- **उपसंहारः-** जगत्यस्मिन् यावन्तः अलङ्काराः सन्ति तेषु वाणी सर्वोत्कृष्टालङ्कारः भवति। अतः बहुसमस्याभिः पीडितः चेदपि कश्चन दक्षः संस्कृताध्यापकः स्वीयकौशलं प्रदर्शयन् छात्रेषु संस्कृतभाषादक्षताभिवर्द्धनाय सततोद्यमं कुर्यात्। तदानीमेव छात्राः संस्कृतभाषाम् अवगच्छन्तः तया भाषया वक्तुं समर्थाः भवेयुः।

**सहायकग्रन्थसूची-**


1.संस्कृतशिक्षणम्- डा. उदयशङ्कर झा,चौखम्बा सुरभारती प्राकाशन, वाराणसी-2011

2.संस्कृतशिक्षणम्- प्रो.डा सन्तोषमित्तल, नबचेतना पबलिकेशन्स जयपुरम्-2006

3.संस्कृतशिक्षणम् नवीनप्रविधिश्च- डा.च.ल.ना.शर्मा, डा- फतेसिंहः आदित्यप्रकाशनम्, जयपुरम्-1996

4.कौशलवोधिनी-डा. विश्वासः, संस्कृतभारती, नवदेहल्ली- 2005


30 भ.नितीशतकम्-12

# प्लाष्टिकमाध्यमेन प्रकृतेः विनाशः एवं तन्निवारणमुपायाः

अनुपमा महान्ति

शिक्षाशास्त्रीद्वितीयवर्षम्

anupamapradyot@gmail.com

सृष्टेः स्रष्टा भवति ईश्वरः। सः तस्य अकथनीय-अवर्णनीय-अतुलनीय-चिन्तनशक्ति-माध्यमेन भूमण्डले प्रकृतिरुपिमातुः वासस्थानं निर्मितवान्। प्रकृतिः षड्-ऋतुचक्रेण तस्याः प्रयत्नेन सन्तुलनं रक्षां च अकुर्वत्। परन्तु अस्मिन् संसारे मानवाः अन्याः जीवाः चापि वासं कुर्वन्ति। मानवाः तेषां बुध्दिः, विवेकेन उच्चशिक्षां प्राप्य वैज्ञानिककौशलेन नूतनाविष्कारान् अकुर्वन्। तेषां मनसि सर्वदा नूतनचिन्तनम् आगच्छत्। बहुः उत्पादनं प्रकृतेः विनाशस्य कारणम् अभवत्। तस्य प्लाष्टिक एकं कारणम्। वेदे वर्णितमस्ति परोपकाराय फलन्ति वृक्षाः। परोपकाराय वहन्ति नद्यः। परोपकाराय दुहन्ति गावः । परोपकारायमिदं शरीरम् इति। अर्थात् अस्मिन् संसारे वृक्षाः नद्यः गावः सर्वे परोपकारार्थं स्वजीवनम् उत्सर्गीकृतवन्तः। परन्तु मानवाः सृष्टेः नाशनिमित्तं सर्वदा प्रयत्नं कुर्वन्ति। यदि एते सर्वे प्रकृतेः संरचनार्थं , विकासार्थं, सन्तुलनार्थं स्वीयजीवनं समर्पयन्ति तर्हि मानवाः अवश्यं दृढसंकल्पं कुर्युः प्रकृतेः रक्षणाय। भारते अथवा समग्रविश्वे प्राकृतिकरुपेण अनेकाः समस्याः आपतन्ति। यथा भूकम्पः, जलसमस्या, सुनामी, अरण्यदहनं, वज्रपातादयः। परन्तु मनुष्यकृतसमस्याः यदि प्रकृतेः सन्तुलने बाधां सृजन्ति चेत् इमा समस्याः न समीचीनाः। इदानीन्तन समाजे प्लाष्टिक् इत्यस्य प्रयोगः बहुलपरिमाणन् अभवत्। भारते प्रायतः 60 दशकमध्ये प्लाष्टकनामकपदार्थस्य प्रवेशः अभवत्। एतावत् भारते एतस्य प्रयोगः सर्वत्र प्रचलति। थशअय़ किञ्च विवरणं पश्यामः यथा Automobile क्षेत्रे प्लाष्टिक् व्यवहारः अत्यन्तः दृश्यते। 1991 मध्ये भारते प्रायतः 9 लक्ष टन् उत्पादनम् अभवत्। आर्थिक औदार्यकरणेन एतस्य अधिकया मात्रया प्रयोगं प्रचलतं भारते। 2014 वर्षे एकं प्रतिवेदनम् आगतं यत् समुद्रे प्लाष्टिक् द्रव्याणि 5000 अरब खण्डप्लाष्टिकदर्शने आगच्छन्। सर्वकारमतानुसारेण अत्यन्तं क्षुद्रप्लाष्टिक्खण्डाः समुद्रस्य निम्नभागे गत्वा मत्स्याणां उदरे स्थानं स्वीकुर्वन्ति। भविष्यचिन्तनं कृत्वा यदि वयम् अनुमानं कुर्मः तर्हि भविष्ये मत्स्याः न मिलिष्यन्ति। केवलं प्लाष्टिक् खण्डाः समुद्रात् मिलिष्यन्ति। पूर्ववर्षे अफ्रीकीदेशस्य केन्या प्लाष्टिक् उपरी प्रतिबन्धम् अकरोत्। प्लाष्टिक् दहनेन अत्यन्तं विषाक्तवाष्पं सृष्टं भवति। येन कारणेन वायुमण्डलस्य क्षतिः भवति। वैज्ञानिकाः वदन्ति प्लाष्टिक् नष्टं भवितुं प्रायतः 500 – 1000 वर्षाणि लगन्ति। अतः भूमौ गत्वा भूमेः

उर्वरकक्षमतां नष्टी करोति । सस्योत्पादने व्याघातः भवति । वृक्षाणां पार्श्वे अत्यन्तमहत्वपूर्णं वैशिष्ट्यमस्ति । वैदिककाले मुनयः स्वाश्रमे वृक्षरोपणं कृत्वा वृक्षाणां पुत्रवत् लालनम् अकुर्वन् । कालिदासेन रचितं महाकाव्यं " अभिज्ञानशाकुन्तलम् '' इति ग्रन्थेऽपि वर्णनमस्ति देवी शकुन्तला वृक्षाणां लालने सर्वदा समयम् अतिवाहितम् अकुर्वत् । एकं सुभाषितं मम मनसि आगच्छति अस्मिन् सन्दर्भे –**छायामन्यस्य कुर्वन्ति स्वयं तिष्ठन्ति चातपे । फलान्यपि परार्थाय वृक्षाः सत् पुरुषा इव ।** अर्थात् अस्माकं दायित्वं वर्त्तते यत् भूमेः रक्षणं करणीयम् । भूमेः उर्वरक्षमताविषये ध्यानं दातव्यम् । प्लाष्टिक कारणेन भूमेः नाशः न करणीयः । विश्वे बहवो राष्ट्राः प्लाष्टिक् उपरी प्रतिबन्धं कुर्वन्ति स्म । यदि जनाः पुनः प्लाष्टिक् व्यवहारं कुर्वन्ति तर्हि कठोरदण्डं भुक्तं प्रस्तुता भवन्तु ।

**निराकरणस्य उपायाः –**

* प्लाष्टिक् स्यूतं परिवर्त्य कर्गदं / वस्त्रनिर्मितं स्यूतस्य उपयोगः आवश्यकः ।

* मृत्तिकया निर्मितानि उपकरणानि व्यवहर्तव्यानि ।

* प्लाष्टिक् स्थाने अन्यान्यपदार्थस्य प्रयोगं करणीयम् ।

* प्लाष्टिक् स्यूतस्य स्थाने पोलिएस्ट्रीन फोम व्यवहारे आनयन्तु , किमर्थम् इत्युक्ते एतेषां पुनः चक्रणं भविष्यति ।

*प्रयासं कुर्वन्तु प्लाष्टिक् पदार्थस्य व्यवहारः बहुः न्यूनः भवतु । वयं भारतीयाः अतः सौहार्दपूर्णं वातावरणं निर्मातव्यम् । सर्वेषां हितार्थं चिन्तनम् आवश्यकम् । वेदे वर्णनम् अस्ति **सर्वे भवन्तु सुखिनः । सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु । मा कश्चित् दुःख भाग् भवेत् ।।**

**सन्दर्भः - www. Hindujagruti .org**

# छात्राणां कर्तव्यानि

मिता पधान
शिक्षाशास्त्रीद्वितीयवर्षम्
mitapadhan34@gmail.com

मानवजीवने छात्रावस्था अतीवमहत्वपूर्णा वर्त्तते। अस्याम् अवस्थायां स्वस्य जीवनं निर्माति छात्राः। ये विद्यानाम् अर्थिनः सन्ति ते एव विद्यार्थिनः कथ्यन्ते। मानवजीवने चतुर्विधाश्रमाः भवन्ति। ब्रह्मचर्यः, गृहस्थः, वानप्रस्थः, सन्यासश्च । चतुर्षु आश्रमेषु ब्रह्मचर्याश्रमः प्रमुखो भवति । पञ्चविंशतिवर्षाणि यावत् ब्रह्मचर्याश्रमकाले विद्याध्ययनं छात्रजीवनस्य निर्माणकालः मन्यते।

**छात्रजीवनम् -** छात्राणां कृते स्वाध्यायस्य अतिरिक्तं न किमपि कर्त्तुं विहितम् । विद्यायाः अध्ययनकालः वस्तुतः तपसः कालोऽस्ति । " छात्राणामध्ययनं तपः" इति । छात्रजीवने समयस्य महत्वपूर्णं स्थानं वर्त्तते। ये बालकाः स्वछात्रजीवने कठोरं परिश्रमं कुर्वन्ति, ते स्वसम्पूर्णे जीवने सुखम् अनुभवन्ति। अतः उच्यते

**सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतो सुखम्।**
**सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्येजत् सुखम्॥**

**छात्राणां कर्तव्यम्** – आदर्शविद्यार्थनः परमानुशासिताः, दृढप्रतिज्ञानिष्ठाः, पठनेऽनुरक्ताः, श्रेष्ठान् प्रति श्रद्धालवः, समाजसेवाकर्मेषु परमोत्साहितः, समाजे सर्वेषु प्रियभाजनानि च भवन्ति। छात्राः पठित्वा देशमुपकरिष्यन्तीति सर्वे अश्वसनं लभन्ते । छात्राः भविष्यति काले राष्ट्रनायक-वैज्ञानिक-विद्वान्-शासकादयाः भविष्यन्ति । अतः छात्रैः सदा अनुशासितं रपं शर्शयितव्यम् । इमे राष्ट्रस्य समाजस्य सर्वेषां वृद्धजनानां सेवां कुर्युः। छात्राः एव राष्ट्रस्य उन्नत्यै महान्तः साधकाः भविष्यन्तीति आशास्महे । छात्राणां जीवने कानिचन अवश्यकतत्वानि सन्ति। यदि तानि सर्वाणि तेषु सन्ति तर्हि सा छात्रावस्था परमोत्कृष्टा जायते। ते तत्वानि भवन्ति यथा – काकचेष्टा वकोध्यानं श्वाननिद्रा तथैवच। अल्पाहारी गृहत्यागी विद्यार्थिपञ्चलक्षणम्। पुनः सरलेन सौजन्ययुक्तेन व्यवहारेण गुरवः, पितरः अन्ये वन्दनीयाः जनाश्च प्रसन्नाः भूत्वा सन्विद्यां प्रयछन्ति। इमान् छात्रानेव संबध्य उक्तं यत् – अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम्।

**साम्प्रतिकस्थितिः -** इदानीं छात्राः प्रायः अध्ययनात् विरक्ताः सन्ति । ते सम्प्रति राजनीतौ किं वा अनेकेषु कार्येषु रुचिं गृह्णन्ति । सदैव ते पाश्चात्य परम्परयाः नेत्राणि निमील्य अनुकरणं कुर्वन्ति । एतत् न समीचीनम् ।

**निष्कर्षः-** छात्राणां कृते इदमेव कर्तव्यमस्ति यत् स्वमातृपितृणां गुरुजनानां च आज्ञां पालयेयुः । तेषां सर्वेषां सदैव आदरः कर्तव्यः । वस्तुतः छात्राणां जीवनं यदि शुद्धं सुनियोजितं सफलं च भवेत् तर्हि राष्ट्रस्योन्नतिः निश्चितैव । यतः ते एव भाविनः देशकर्णधाराः भवन्ति । अतः सत्यमेव छात्रजीवनं देशस्य आधारभित्तिरस्ति इति ।

******************

## गुरुकुलशिक्षाद्यतनशिक्षणयोः मध्ये प्रभेदः

आशालता दास
शिक्षाशास्त्रीद्वितीयवर्षम्
ashalataofficiallyid @gmail.com

**उपक्रमः-** देशस्य विकासः उन्नत्तिः च तदा भवितुं शक्नोति यदा शिक्षाव्यवस्था सम्यक्तया भविष्यति । जीवने किमपि सफलतां प्राप्तुं पुनः नूतनं किमपि कर्त्तुं शिक्षा एकं महत्त्वपूर्णसाधनं भवति । प्राचीनकाले अस्माकं देशे शिक्षाव्यवस्था एका महत्त्वपूर्णव्यवस्था आसीत् । अस्माकं भारते गुरुकुलपरम्परा एका पुरातनव्यवस्था भवति । वैदिकयुगात् एव गुरुकुलस्य अस्तित्वं वर्त्तते । प्राचीनकाले गुरुकुलशिक्षापद्धत्या शिक्षाप्रदानम् अभवत् । परन्तु इदानीम् एतस्याः परम्परायाः अस्तित्वं समाप्तं जायमानम् अस्ति । अद्यतन समाजे आधुनिकव्यवस्था एवं गुरुकुलशिक्षाव्यवस्था मध्ये कः प्रभेदः ? इति विषये ज्ञानम् आवश्यकम् ।

**गुरुकुलपरम्परा -** गुरुकुलः शब्दस्य अर्थः भवति यत्र गुरुः तथा गुरोः परिवारः निवासं करोति । प्राचीनेकाले गुरुः आचार्यरुपेण मन्वते स्म शिष्याः अन्तेवासिनः च । एते गुरुगृहे निवासं कुर्वन्ति स्म । तत्र केषाञ्चित्नियमानां पालनं करणीयमासीत् छात्रैः । यथा गुरोः प्राक् जागर्त्ति । प्रत्येकस्मिन् दिवसे ब्रह्ममुहूर्त्ते उद्बुद्धो भवति स्म । ततः गुरोः समीपे गत्वा तस्य चरणस्पर्शं करोति स्म विद्यार्थी । विद्यार्थी स्वगुरुराज्ञायाः पालनं शुद्धतायाः पालनं च करोति स्म । केशान् बद्ध्वा शिखाधारी भवति स्म । प्रतिदिनं सः वनादीन्धनं गुरुगृहे आनयति स्म । प्रातः काले सायंकाले च जलस्य व्यवस्थामपि करोति

स्म । गुरुकुले छात्राः एकत्रीभूत्वा गुरुभ्यः वेदाध्ययनं कुर्वन्ति स्म । तत्र दरिद्रधनिकयोः मध्ये को अपि प्रभेदः नासीत् । शिक्षा यदा सम्पूर्णा भवति स्म तदा गुरुः छात्राणां परीक्षां करोति स्म । एवं शिष्याः सामर्थ्यानुगुणं गुरुन् दक्षिणां ददति स्म ।

**छात्राणां विभाजनम् -** तस्मिन समये छात्राः त्रिधाः आसन् । वासु = 24 वर्षपर्यन्तं शिक्षाग्रहणं कुर्वन्ति । रुद्रः = 36 वर्षपर्यन्तं शिक्षाग्रहणं कुर्वन्ति । आदित्यः = 48 वर्षपर्यन्तं शिक्षाग्रहणं कुर्वन्ति ।

**गुणाः** – तद्यथा -

(1) छात्राः गुरुणां सम्मानम् अकुर्वन् । गुरुः छात्रान् अनुशासनपालनमिति शिक्षाम् अददात् ।

(2) शिष्याः मनसा , वाचा , कर्मणा च सदैव गुरोः हितचिन्तनं कृतवन्तः ।

**दोषाः** – तद्यथा -

(1) गुरुकुले छात्राः सीमिताः आसन् ।

(2) ते केवलं एकगुरोः सम्मुखे एव अध्ययनं कृतवन्तः ।

(3) अध्यापने समयः निश्चितः नासीत् ।

**आधुनिक शिक्षाप्रणाली** – समाजः परिवर्त्तनशीलः अस्ति यथा खानपानेषु , वस्त्रपरिधानेषु , भूषणेषु परिवर्त्तनं जातम् , तथा वर्तमाने शिक्षारीत्यामपि परिवर्त्तनं जातम् । वर्तमानसमये शिक्षानीत्यां महत् परिवर्त्तनम् अभवत् । अधुना कोऽपि बालकः गुरुकुलं न गच्छति । गुरुशिष्यपरम्परा विलुप्ता इव । अधुना अभिभावकाः बालकम् आयुषः तृतीयवर्षैव पाठशालां प्रेषयन्ति । पाठनस्य माध्यममपि द्विविधम् अस्ति । केचन छात्राः आङ्लभाषायां पठन्ति , केचन च क्षेत्रीयभाषायाम् । आङ्लभाषायाः अध्ययनं प्राथमिकशालासु अनिर्वायम् दृश्यते । अधुना प्राथमिकशालासु अपि विद्याध्ययनेन सह अन्याः कलाः पाठ्यन्ते ।

**उपसंहारः** – प्राचीनकालिक्याः गुरुकुलशिक्षायाः कदापि विस्मरणं न भविष्यति । तत्र संस्कारः,

सस्कृतिः, शिष्टाचारः, सभ्यता च दृश्यते या अधुना विलुप्तताप्रायं गता ।

**सन्दर्भिकग्रन्थः** – पुरातनी शिक्षा – डॉ लोकमान्य मिश्रः, मृगाक्षी प्रकाशनम् , लखनऊ

# शाब्दबोधप्रकारः

देवश्री स्वाई
शिक्षाशास्त्रीद्वीतीयवर्षम्

शाब्दबोधो नाम शब्दजन्यो बोधः । नैयायिकमतेन शाब्दबोधे प्रथमान्तर्थो मुख्यविशष्यः । प्रथमान्तपदसमभिव्याहारभावे साक्षादर्थेकृतिमुख्यविशष्या । "श्री जगन्नाथाय नमः" इत्यत्र निपातार्थे मुख्यविशेष्यः । धात्वर्थः क्रिया । आख्यातार्थाः कृतिः , कालः, संख्या च । किन्तु संखाबोधकत्वे वावादः । क्रियायाः कृतौ कृतेश्च प्रथमान्तार्थे अन्वयो यथाक्रममनुकुलत्वसम्बन्धेन आश्रयता सम्बन्धेन । " चैत्रो ग्रामं गच्छति " इत्यत्र प्रथमार्थः – एकत्वसंख्या । ग्राममित्यर्थः – आधेयत्वम् । गम् धात्वर्थः संयोगावच्छन्नव्यापारः । तथा च ग्रामपदार्थस्य निरुपितसम्बन्धेन द्वितीयार्थाधेयत्वे , ग्रामनिरुपिताधेयत्वस्य स्वरुपसम्बन्धेन धात्वर्थेकदेशे संयोगे ग्रामनिरुपिताधेयत्वविशिष्टसंयोगावच्छिन्नाव्यापारस्य अनुकुलत्वसम्बन्धेन आक्षातार्थकृतौ तत्रैवाख्यातार्थान्तरस्य कालस्य चान्वयः । अतो ग्रामनिरुपिताधेयत्वविशिष्ट-संयोगावच्छिन्नाक्रियानुकूलवर्तमानकृत्याश्रय एकत्वविशिष्टश्चैत्र इति बोधः । मीमांसकमतेन अख्यातार्थभावना मुख्यविशेष्या । "चैत्रो ग्रामं गच्छति" इत्यत्र एकत्व पुंसत्वविशिष्टग्रामनिष्टकर्मताविशिष्ट, चैत्रनिष्ठकतृताविशिष्टा गमनविशिष्टा भावनेतिशाब्दबोधः । अत्र प्रथमायाः कर्तृत्वमर्थः । एकत्वादिवैशिष्ट्यं समानाधिकरण्यसम्बन्धेन कर्मतायां, कर्मतावैशिष्ट्यं चैत्रनिष्ठकर्तृतावैशिष्ठयञ्च स्वनिरुपकगमनानुकुलत्वसमन्बेन भावनायाम् । गमनवैशिष्टञ्चानुकुलत्वसम्बन्धेन ।

वैयाकरणमतेन 'चैत्रो ग्रामं गच्छति' इत्यत्र चैत्रकर्त्तृकग्रामकर्मकमनमिति शाव्दबोधः । ग्राममित्यत्र द्वितियार्थः कर्म । ग्रामपदार्थस्य द्वितीयार्थ कर्मणि अभेदान्वय्रः । प्रथमार्थश्चैत्रः । प्रातिपादिकन्तु तात्पर्यं ग्राहकम् । आख्यातार्थ कर्तरि चैत्रस्याभेदसम्बन्धेनान्वयः ।वस्तुतः नैयायिकमतेन प्रथमान्तार्थमुख्यविशेष्यकबोधोऽसति बाधके सति धात्वार्थादिमुख्यविशेष्यकोऽपि । वैयाकरणमतेनापि प्रथमान्तार्थस्य मुख्यत्वमुपपद्यते । " व्याकरणमधीते य" इति वैयाकरणपदविवरणवाक्ये । आनुभविकं सकलकर्मादिकारकप्रेरकस्य क्रियाकर्त्तुः सर्वापेक्षया प्राधान्यमिति नैयायिकचिन्तनमिति ।

1.सान्दर्भिक ग्रन्थसूची - न्यायनयम् (प्र-कमलेशमिश्र ) न्यायमञ्जरी (जयन्त भट्ट )

# संस्कृताध्यापकस्य संस्कारज्ञानम्

शाश्वती शुभदर्शिनी परिडा
शिक्षाशास्त्रीद्वितीयवर्षम्
Saswatiparida1996@gmail.com

संस्कृतभाषा अस्माकं अमृतवाणी देववाणी वा वर्त्तते। संस्कृतं न केवलं भारतस्यापितु विश्वस्य प्रचीनतमा भाषा वर्त्तते। विश्वस्यास्यान्यदेशेषु जनाः यदा साङ्केतिकभाषाणां प्रयोगं कुर्वन्तः आसन् तदा अस्माकं भारते संस्कृतभाषया ब्रह्मज्ञानं पाठयन्तः आचार्याः दृश्यन्ते स्म। **यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्। रावणं मन्यमाना मां सीता भीता भविष्यति**[31] ॥ संस्कृतभाषा सर्वासां भाषाणां जननी भवति। संस्कृतं संस्कृतेः मूलमस्ति। ज्ञानविज्ञानस्य वारिधिः अस्ति तथा वेदतत्वं प्रतिपादयति। एतस्य लोकस्य कृते कल्याणप्रदा अस्ति।

**भारतीयसंस्कृतेः गुरुत्वम् -** भारतीयसंस्कृतौ गुरोः स्थानं विशिष्टं वर्त्तते। गुरुशब्दस्य व्याख्या इत्थं प्रसिद्धम् अस्ति गिरति अज्ञानान्धकारम् इति गुरुः। सः आचार्यः, उपाध्याय-अध्यापकादिभिः नामाभिरपि सम्बोध्यते। गुरोः गरिम्नि विषये उपनिषदि एकः शोभनश्लोकः वर्त्तते यत् -

**यस्य देवे पराभक्तिः यथा देवे तथा गुरौ।**
**तस्मै ते कथिताहार्याः प्रकाशन्ते महात्मनः॥**

अस्य चायं भावः आध्यात्मिकं सत्यं केवलं तस्य जनस्य पुरतः प्रकटीभवति यस्य मनसि ईश्वरं प्रति अनन्यभक्तिः भवति। समाजे शिक्षकाः बहवः सन्ति परं तेषामपेक्षया संस्कृतशिक्षाकाणां कृते दैवीगुणाः अत्यावश्यकाः वर्त्तन्ते। अवश्यमेव एते गुणाः संस्कृतशिक्षकैः आत्मसात्करणीयाः।

**अहिंसा सत्यमक्रोधस्यागशशान्तिरपैशुनम्।**
**दयाभूतेष्वलोलुप्तवं मार्दवं ह्रीरचापलम्**[32]॥

**संस्कारस्य अर्थः -** अस्माकं शरीरे एवं मनसि च यदि पूर्वजन्मस्य पापकर्मस्य प्रभावः भवति तस्य निवारणं कृत्वा उत्तमगुणस्य वर्धनम् एव संस्कारः। संस्कारमाध्यमेन साधारणमनुष्यः श्रेष्ठपुरूषत्वेन परिगणितः भवति। शिक्षा मनुष्यजीवनस्य अमूल्यरत्नः भवति। संस्कारजीवनस्य सारः भवति। शिक्षा

[31] रामायणम् सुन्दराकाण्डम्
[32] श्रीमद्भागवद्गीता (16-2)

एवं संस्कारस्य विना सर्वं धन-सम्पदः, सम्मानं, प्रतिष्ठा मूल्यहीना भवति । भारतीयसंस्कृतिः संस्कारप्रधाना वर्त्तते । अतः सर्वेषां कृते संस्कारज्ञानस्य महत्त्वविषये अवगमनं भवेत् । सनातनधर्मे षोडशसंस्काराः भवन्ति । पूर्वकाले छात्रः षोडशसंस्कारस्य माध्यमेन स्वस्य बाल्यशिक्षायाः आरम्भः अन्तिमयात्रापर्यन्तं सर्वं कार्यं नियमानुसारेण करोति स्म । अद्यतने तु संस्कारस्य प्रभावः सर्वेषाम् उपरि नास्ति । अतः संस्कृताध्यापकः यदि संस्कारीभूत्वा कार्यं करोति तर्हि सर्वे संस्कारिता भविष्यन्ति ।

**अनुकरणप्रियः शिशुः** – आधुनिकसमाजे कोऽपि बालकः पितरौ वचनं न श्रुणोति । पिता स्वस्य पुत्राय धनं दत्वा संस्कारितं कर्त्तुं न शक्नोति । अद्यतनसमाजे संस्कृताध्यापकः तत्वज्ञानी-हितोपदेशी, नीतिवाणी, सुभाषितं ,महापुरुषाणाम् उदाहरणानि ददाति चेत् अपि कोऽपि छात्रः सम्यक् रुपेण संस्कारितः भवितुं न अर्हति । अध्यापकः यत् वदति प्रायतः सर्वे छात्राः तत् न कुर्वन्ति । परन्तु अध्यापकः यं व्यवहारम् आचरयति सर्वे छात्राः तत् अनुकुर्वन्ति । संस्कृतशिक्षके ते सर्वेऽपि शिक्षकसामान्यगुणास्तु भवेयुः एव यान् समाजः अपेक्षते यथा आकर्षकव्यक्तित्वं, शिक्षकोचिता वेशभूषा, उत्तमस्वास्थ्यं, मधुरभाषिता, कुशाग्रबुद्धिः, संवेगात्मकसंतुलनं, सामाजिकव्यवहारः, मित्रता, सहानुभूतिपूर्वकव्यवहारश्चेति एते गुणाः संस्कृताध्यापकस्य पार्श्वे भवन्ति चेत् छात्राः सम्यक् रुपेण अनुकरणं कुर्वन्तः उत्तमनागरिकाः भविष्यन्ति । अतः संस्कृताध्यापकस्य पार्श्वे संस्कारज्ञानं भवेत् एव

## धार्मिकशिक्षायाः मूल्यानि

तापस मिश्रः
शिक्षाशास्त्री द्वितीयवर्षम्
tapastapun@gmail.com

**उपक्रमः -** मानवः बह्माण्डस्य सर्वोत्तमुत्कृष्ट रचनासु अग्रगण्यः भवति । यतोहि श्रूयते खलु अनेके प्राणभूताः चेतनात्मकाः च जीवाः सन्ति । परं तेषु मानवस्य विशिष्टत्वेन विवेकस्मृतिः च भवति । सूर्यचन्द्रौ वर्त्तेते । तयोः सूर्यचन्द्ररुपिस्मृतिविवेकयोः कारणेन अयं मानवः मानवत्वं प्राप्नोति । तदा सः मानवः सर्वेषां प्राणिनां मूल्यस्थानं च निर्धारयति । तेन सः मानवः सर्वोत्कृष्टः इति सर्वेः सर्वत्र आमन्ति ।

**धर्मः -** धीयते लोके अनेन इति धर्मः । पुनः मनुस्मृतौ धर्मविषये वर्णितमस्ति यत् -

**धृतिः क्षमा दमोऽस्तेयःशौचम् इन्द्रयनिग्रह ।**
**धीर्विद्या सत्यमक्रधः दशकं धर्मलक्षणम् ॥**[33]

धर्मात् ये जायन्ते ते धार्मिकाः । धार्मिकशिक्षा नाम नैतिकशिक्षा यथा छात्राणां सामाजिकः, आर्थिकः, भौतिकः, शारीरिकश्च शिक्षा अपेक्षते तथैव नैतिकशिक्षा । अर्थात् वैदिककाले या

[33] मनुस्मृतिः

शिक्षाव्यवस्था प्रचलिता आसीत् सा भवति धामिकशिक्षा । धार्मिकशिक्षा अस्माकं कृते अर्थात् संस्कृतच्छात्राणां कृते अत्यन्तम् आवश्यकम् । तत् कथम् इति चेत् संस्कारस्य रक्षणाय संस्कृतम् अत्यन्तम् आवश्यकम् । संस्कृतम् एव संस्कृतिः एकस्याः मुद्रायाः पार्श्वद्वयं सदृशम् । अतः उच्यते भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृति तथा । धार्मिकशिक्षातः संस्कृतम् आगतम् । धार्मिकशिक्षायाः माध्यमभाषा आसीत् संस्कृतम् । वैदिककाले शिक्षाव्यवथा गुरोः अधीने आसीत् । गुरुः सर्वदा छात्राणां विकासनिमित्तं प्रयासं कृतवान् । परन्तु साम्प्रतिककसमाजे अध्यापकः छात्राणां विकासाय प्रयासं करोति । परन्तु वेतनस्य उपरि अधिकं ध्यानं ददाति । तैत्तरीयउपनिषदि वर्णितमस्ति **सत्यं वद धर्मं चर ।** स्वाधायान्माप्रमदः सन्यान्तप्रमदितव्यं धर्मान्तप्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । पितृ देवो भव । मात्रृ देवो भव । आचायो देवो भव । अतिथिः देवो भव । श्रध्दया देयम् । मनुनाऽपि उक्तम् –

**अभिवादनशीलस्य नित्यं वृध्दोपसेविनः ।**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥**

इमानि नैतिकमूल्यानि मानवव्यवहारस्य मार्गदर्शकानि भवन्ति । नैतिकमूल्यं विना मानवीयव्यवहारः अमानुषः क्रूरश्च भवति । नीतिवधनं विधेयता प्रदर्शनम्, उत्तरदायित्वग्रहणं, दाक्षिण्यम्, करुणा, त्यागः, सहिष्णुता सत्यवाक् परिपालनम् – न्याय मार्गाचारणम् इत्यादीनि कानिचित् नैतिकमूल्यस्य उदाहरणानि । बहुकालादारभ्य इदानीं यावत् विद्यालये एतेषां नैतिकमूल्यानां प्रधानस्थानं दत्तं विद्यते । इदानीन्तन काले उपनिषदवाक्यं न प्रचलति । सर्वे एकैकं परिवारम् इच्छन्ति । रामायणे धार्मिकशिक्षाविषये पश्यामः चेत् एकदा रामः लक्ष्मणं प्रति उक्तवान् – भो भ्रातः पत्न्याः आभरणानां विषये गणयित्वा मां वदतु । तस्मिन् समये लक्ष्मणः रामं प्रति उक्तवान् – अहं तस्याः आभरणानां विषये न जानामि । केवलं तस्याः पदं पश्यामि । एवं –

**नाहं जानामि केयूरे नाहं जानामि कुण्डले ।**
**नूपरे तु अभिजानामि नित्यं पादाभिवन्दनात् ॥**

**उपसंहारः -** एवं प्रकारेण वैदिककाले पारिवारिकसम्बन्धः आसीत् । परन्तु इदानीं तत् न दृश्यते । अतः सर्वदा धार्मिकशिक्षा अनुसरणीया । धार्मिकशिक्षायाः माध्यमेन मूल्यस्य विकासः अत्यन्तं रुपेण भवति ।

**सन्दर्भग्रन्थाः -**


1. मनुस्मृतिः – श्री. पं. हरगोविन्दशास्त्री, चौखम्भा संस्कृत संस्थान, वारणसी – 221001 (भारत)
2. श्रीमद्वाल्मीकीय रामायण- स्व चन्द्रशेखर शास्त्री, आस्था प्रकाशन, लोहिया नगर , पटना- 800020

# संस्कृतछात्राध्यापकानां वाचनदोषाः तन्निवारणोपायाश्च

सुस्मिता पह्लार
शिक्षाशास्त्री द्वितीयवर्षम्
palharsusmita@gmail.com

**उपोद्घातः** – भारतदेशः अतिप्राचीनदेशः । तदनुसारेण तस्य संस्कृतिरपि अतिप्राचीना । भारतीयसंस्कृतिः संपूर्णसंसारस्य संस्कृतेः भूषणं वर्त्तते । द्वयं संस्कृतिः संस्कृताधारिता वर्त्तते । संस्कृतभाषा भारतवर्षस्य शास्त्रीया भाषा विद्यते । इयं संस्कृतभाषा देववाणी, गीर्वाणवाणी तथा सुरभारती आदिभिः नाम्ना अपि वर्त्तते । उच्यते –

**संस्कृतं नामदैवी वाक् अन्वाख्याता महर्षिभिः ।**
**भाषासु मधुरा रम्या दिव्या गीर्वाणभारती [34] ।।**

छात्राः भारतीयसंस्कृतिं संस्कृतमाध्यमेन ज्ञातुं प्रभवन्ति । संसारेऽस्मिन् सर्वं कार्यं संस्कृतमाध्यमेन सिध्यते । तस्मात् कारणात् सर्वेषां कृते संस्कृताध्ययनम् अनिवार्यम् आवश्यकं च । कारणं भाविराष्ट्रनिर्मातृणां संस्कृच्तछात्राणां निर्माणं संस्कृताध्यापकाः उत्तमोत्तमाः श्लिष्टक्रियायुक्ताः संक्रान्तियुक्ताः भवेयुरिति धिया संस्कृतच्क्षेत्रे शिक्षाशास्त्रम् आरब्धम् । शिक्षाशास्त्रि-द्वितीयवर्षे छात्राध्यापिकाः, छात्राध्यापकाः चतुर्मासपर्यन्तं शिक्षणाभ्यासनिमित्तं भिन्नभिन्नविद्यालयं प्रति गच्छन्ति । तत्र छात्राणां कृते संस्कृतं पाठयन्ति ।

**उद्येश्यम्** – कक्षायाम् अध्यापकस्य प्रमुखं साधनं भवति शिक्षणोपकरणानि एवं तस्य मुखमेव । यदि तस्मिन् साधने दोषाः दृश्यन्ते तर्हि सम्पूर्णं शिक्षणमेव दोषपूर्णं वर्त्तते । मुख्यसाधनं मुखम् अर्थात् वाचनकौशलम् । यदि वाचने /वाचनकौशले दोषाः आगच्छन्ति तर्हि सम्पूर्णं शिक्षणम् एव व्यर्थं भवति

**वाचनकौशलस्य स्वरुपम्** – वाचनं/वाचनकौशलं नाम लिपिबद्धानां शब्दानां सुष्ठूच्चारणम् । वाचनप्रक्रियायाः चत्वारघटकाः भवन्ति इति William महाशयानाम् अभिप्रायः । यथा –

(1) पदप्रत्यक्षम्
(2) पदसूचितभावनामवबोधः ।
(3) अवबद्धभावनानां विषये प्रतिक्रियाः ।
(4) पूर्वानुभवसदर्भे भावनात्कात्मत्मासाक्षात्करणम् ।

[34] काव्यादर्शः, दण्डी

यदि कस्याः अपि भाषायाः वाचनकौशलम् अपक्षते चेत् तस्याः भाषायाः लिपेः ज्ञानम् अनिर्वायम् । वाचनस्य विकासनिमित्तं लिपिज्ञानम् नितान्तम् आवश्यकम् । छात्राः वाचनसमये कदाचित् अनवधानवशात् विद्यमानवर्णं त्यजन्ति । कदाचित् अविद्यमानवर्णं पठन्ति । कदाचित् विद्यमानं सम्पूर्णपदं त्यजन्ति । कदाचित् अविद्यमानं यत् पदं भवति तस्य वाचनं कुर्वन्ति ।

**उच्चारणगतदोषाः** – एकस्य गद्यांशस्य वा पद्यांशस्य वाचनसमये छात्राध्यापकाः ह्रस्वस्य दीर्घोच्चारणं, दीर्घस्य ह्रस्वोच्चारणम्, अल्पप्राणस्य महाप्राणत्वेन, महाप्राणस्य अल्पप्राणत्वेन एवं वकारस्थाने बकारयोः, जकार- यकारयोः, सकार- शकार-षकारेषु, रकार- लकारयोः, संयुक्ताक्षराणां, तकार- जकारयोः इत्यादीन् अनेकान् उच्चारणगतदोषान् कुर्वन्ति ।

**वाचनप्रवाहः** – विद्यालये तु सर्वे छात्राः समानाः न, सर्वे सम्यक् पठन्ति, सम्यक् अवगच्छन्ति एतदपि वक्तुं न पारयामः । कारणं केचन छात्राः मन्दगतिना, केचन तु तीव्रगतिना पठनं कुर्वन्ति एवम् अवगच्छन्ति अपि च । तत्र बहुः समस्यापि भवितुमर्हति । अतः कक्षायां यथा छात्राध्यापकाः पाठयन्ति तद्वत् छात्राः अपि पठन्ति । यथा – विसर्गानुत्यक्त्वा, अनुस्वारं त्यक्त्वा, हलन्त्यं त्यक्त्वादयः ।

**निवारणोपायाः-** संस्कृतभाषा मातृभाषावत् नास्ति । संस्कृतभाषायाः लिपिः अपि मातृलिपिका नास्ति, तस्मात् कारणात् पठने बहुन् दोषान् आचरन्ति छात्राः । संस्कृतभाषायाः व्याकरणगतज्ञानं प्रथमे आवश्यकम्, तदनन्तरं यत् किमपि पठति अथवा पाठयति तस्मिन् विषये बहुः अभ्यासः करणीयः । यथा – स- श- ष स्थाने, ञ,व,ब,ज,य,ज्ञ आदि उच्चारणस्थाने बहुः अभ्यासः करणीयः । उच्चारणस्थानविषये एवं ह्रस्व-दीर्घादि विषये सम्यक् ज्ञानमर्जयित्वा पाठनं करणीयम् ।

नियमानुसारेण सम्पूर्णं ज्ञानं स्थापयित्वा पाठयामः चेत् उच्चारणे दोषाः न आगच्छति ।

******************

## साप्रतिकसमाजानुगणं बाल्यशिक्षाः

सुनिल कुमार बेहेरा
शिक्षाशास्त्री द्वितीयवर्षम्
Beherasunil792@gmail.com

**उपोद्धातः** - अद्यतन छात्रः स्वस्तन नागरिकः । देशस्य प्रगतिः विकासश्च तस्य उपरि पर्यवेष्टितः । अतः नागरिकनिर्माणे बाल्यशिक्षां प्रति प्राधान्य दातव्यम् । मानवस्य मूल्याधारः भवति बाल्यशिक्षा । बालः बीजवत् भवति । अग्रे महाद्रुमः संभवति ।

**बाल्यावस्था** – एलिजिबेत् ,हुर्लाकमहोदययोः मतानुसारं विकासावस्थाः वर्त्तन्ते यथा 1 .नवजातशिशुः (Infancy) जन्मतः 14 दिनपर्यन्तम् । 2 .शैशवावस्था(Boyhood)15 दिनेभ्यः 2 वर्षपर्यन्तम् । 3 . बाल्यावस्था (Childhood) 3 तः 10 वर्षपर्यन्तम् । तत्र बाल्यावस्था द्विविधा (क) पूर्वबाल्यावस्था (Early childhood) 3 तः 5 वर्षपर्यन्तम् । (ख)उत्तरबाल्यावस्था(Late childhood) 6 तः 10 वर्षपर्यन्तं च । 4 . यौवनारम्भावस्था (Puberty) 11 तः 12 वर्षपर्यन्तम् । 5 . कौमारवस्था (Adolscence) 13 तः 20 वर्षपर्यन्तम् । यथा (क) पूर्वाकौमार्यावस्था (Early Adolscence) 13 तः 17 वर्षपर्यन्तम् । (ख)उत्तरवाल्यावस्था (Late Adolscence) 18 तः 20वर्षपर्यन्तम् । 6 . वयोजनः (Adulthood) 21 तः 40 वर्षपर्यन्तम् । 7 .मध्यवयस्कः(Middle age) 40 तः 60 वर्षपर्यन्तम् । 8 .वार्धक्यम् (Old age) 61 वर्षाणामनन्तरं च ।

**बाल्यावस्थायां लक्ष्यणानि** – पूर्वबाल्यावस्थायाः लक्षणानि यथा – शारीरिक वृद्धिः भवति । उन्नति भारश्च वर्धते । मुखाकृतौ परिवर्तनं भवति । क्षीरदन्ताः निगत्य शाशतदन्ताः आगच्छन्ति । बालकाः स्वकीयकार्यं कर्तुम् उत्साहं सम्पादयन्ति । बालकाः गतिशीला भवन्ति । बालकेषु मम पिता मम माता वस्तूनि इति भावना आगच्छति । **तथैव उत्तरबाल्यावस्थायाः** लक्षणानि यथा – अस्मिन्नपि वयसि शारीरिकपरिवर्तनानि भवन्ति । बालेषु अनुकरणशक्तिः अधिका भवति । बालकाः मातृभाषया वक्तुं समर्थाः भवन्ति । बालकाः विद्यालयं प्रविश्य सम्बन्धं स्थापयन्ति । विद्यालये विविधसामूहिककार्याणि प्रति आग्रहं वर्धयन्ति । बालकाः स्नानं ,वस्त्रधारणं ,भोजनं इत्यादीनि कार्याणि स्वयं कुर्वन्ति । ग्रहं स्वच्छं कुर्वन्ति, पितृभ्यां साहाय्यं कुर्वन्ति । पठनं, लेखनं, प्राथमिकगणितं विविधक्रीडाः इत्यादिकौशलानि प्राप्नुवन्ति । बालानां भाषाविकासे महत्परिवर्तनं दृश्यते ।

**बाल्यशिक्षायाः माध्यमानि** – तद्यथा –

**मातृभाषया शिक्षा** – अस्माकं देशस्य पूर्वतन शिक्षामन्त्री अबुल कलाम आजादमहोदयानुसारं प्राथमिकस्तरे छात्रेभ्यः स्वमातृभाषया शिक्षा दातव्या ।

**अक्षरज्ञानम्** - छात्राः कथं सरलतया अक्षराणि वदिष्यन्ति, अवगन्तुं शक्नुवन्ति च इत्यत्र शिक्षकः ध्यानं दद्यात् । अल्पप्राण-महाप्राणदीनां च साधु उच्चारणं कारयेत् ।

**पाठ्यपुस्तकम्** - पाठ्यपुस्तकं छात्राणां स्तरानुगुणं भवेत् । पुस्तकं चित्रयुक्तं भवेत् । अधिकं भारयुक्तं न भवेत् । पाठ्यपुस्तकं सरलया भाषया भवेत् । स्पष्टलेखनं भवेत् ।

**क्रीडाः** –छात्रेभ्यः क्रीडामाध्यमेन शिक्षा दातव्या । कारणं छात्राः क्रीडासु महती रुचिःवर्त्तते । क्रीडामाध्यमेन छात्राणां शारीरिक –मानसिक – आध्यात्मिकशक्तीनां च विकासः भवति ।

**प्रत्यक्षजनितं शिक्षा** – छात्राणां प्रत्यक्षज्ञानमत्यन्तम् आवश्यकं भवति । कारणं छात्राः प्रत्यक्षज्ञानमाध्यमेन शीघ्रम् अवगच्छन्ति । प्रतिकृतिः, चित्रं प्रर्दश्य पाठनीयम् ।

**भाषाक्रीडा** – अनन्त्यकथारचनम्, अपूर्णकथापूरणम् इत्यादिक्रीडाभिः भाषणाभ्यासः कारयितुं शक्यते ।

**शैक्षिकचलचित्रम्** – शैक्षिकचलचित्रेण शिक्षा दातुं शक्यते । यतोहि प्रत्यक्षज्ञानेन श्रवणशक्तेः विकासः सञ्जायते । छात्राणां उत्साहवार्धक्यं भवति ।

**उपसंहार** – आधुनिकसमाजे बालाः भाराक्रान्ताः भवन्ति । यतोहि तेषां भारः यावान् वर्त्तते ततोऽधिकः भारः पुस्ताकानां भवति । अतः तस्याः पीडायाः कारणात् तेषां पाठनमेकं क्लिष्टकार्यमिति ते पठनविरक्ताः भवन्ति । यदि बाल्यावस्थायां छात्राणां स्तरं विलोक्य मनोवैज्ञानिकरीत्या नव नव ज्ञानकौशलानां प्रायोगिकत्वेन पाठ्यते चेत् अवश्यं ते ताश्च उपकृताः भविष्यन्ति । तदा ते भाविनी काले इदं ज्ञानं प्राप्त्वा ज्ञानवान् भूत्वा समाजनिर्मातारः भविष्यन्ति इति शम् ।

**सन्दर्भग्रन्थाः**

1. शिक्षायाः मनोवैज्ञानिकाधाराः, डॉ बी.पद्ममिश्रश्रीनिवासः, सहचार्यः शिक्षाशास्त्रविभागः, राष्ट्रिय-संकृत-संस्थानम्, श्रीसदाशिवपरिसरः , पुरी, ओडिशा ।
2. शिक्षायाः दार्शनिकाधाराः, डॉ सोमनाथसाहुः , जगदीशसंकृतपुस्तकालयः, जयपुरम् ।
3. कौशलबोधिनी, डॉ एच् .आर् .विश्वासः ,संस्कृतभारती , नवदेहली ।

******************

# विज्ञानस्य विपक्षे

श्वेता महान्ति
शिक्षाशास्त्रीद्वितीयवर्षम्
swetajsp2@gmail.com

अद्यतनसमाजः आधुनिकसमाजरूपेण ख्यातमस्ति । पूर्वतन समाजस्यापेक्षया बहूनि सौविध्यानि उपलभ्यन्ते इति कारणेन पूर्वतनग्रामाः इदानीम् आधुनिकग्रामाः प्रसिद्धाः भवन्ति । यथा 'जलं विना जीवनं नास्ति' इति वाक्यम् परिवर्त्य 'विज्ञानविना जीवनं नास्ति' इति वक्तुं शक्यते ।

इदानीन्तन मानवाः सम्वेदनशीलाः तु भवन्ति परन्तु तत्र भावना एव नास्ति । कारणं सर्वे मानवाः समयस्य दासाः एव । समयानुसारं कार्याणि चलन्ति । परन्तु मानवाः विज्ञानस्य पुरतः पङ्गु इव

तिष्ठन्ति । शारीरिकश्रमः, सम्पर्कः आदीनां शब्दानां मूल्यमेव नास्ति इदानीम् । पूर्वे तु बालकाः क्रीडयित्वा, भ्रमित्वा वा मनोरंजनं कुर्वन्तः आसन् परन्तु इदानीं गृहे एव उपविश्य बालकाः संगणकस् दूरवाण्याः अथवा माध्यमेन क्रीडन्ति । यतोहि तेषां शारीरिक-विकासः सुष्ठुः न भवति । केवलं क्रीड़ाक्षेत्रे न अपितु महानसे, कार्यालये, विद्यालये चिकित्साक्षेत्रे चादिषु मानवाः यन्त्राणाम् उपरि निर्भरशीलाः भवन्ति । परन्तु ते विस्मरन्ति यत् यन्त्रमाध्यमेन लाभाः भवन्ति चेत् अधिका क्षतिः अपि भवति । यन्त्राणां मध्ये मुख्यतः संगणकं, चलदूरवाणी, दूरदर्शनम् इत्यादयः प्रधानाः सन्ति ।

**दूरवाणी** – दूरस्थजनैः सह सम्पर्कस्थापनाय इयम् अत्यन्तमुपकारकं यन्त्रं भवति । कालानुकालं दूरवाण्याः आकारे परिवर्तनं भूत्वा बृहत् दूरवाणीरागता अस्ति यत्र सर्वविध सौविध्यानि उपलभ्यन्ते । परन्तु अनया मानवानां सर्जनात्मकशक्तेः विकासः न भवन्ति । केवलं तथा नास्ति दूरस्थानां सम्पर्कं कर्तुं शक्यते । परन्तु पार्श्वस्थात् दूरे भवामः । अधिकाधिकेन दूरवाण्याः उपयोगेन एकाग्रता, कर्णदोषाः, चक्षुदोषाः आदि रोगाः आगच्छन्ति । केवलमेतत् नास्ति अन्तर्जालस्य अत्यधिकोपयोगेन अस्माकं देशस्य गुप्तवार्ताः शत्रुदेशाः सहजतया प्राप्नुवन्ति । केवलं दूरवाणी नास्ति अन्ययन्त्राणामुपयोगेन अपि बहव्यः समस्याः आगच्छन्ति यथा विद्युतः उपरि वयं बहुनिर्भरशीलाः भवामः परन्तु तदपि सीमितमस्ति । पुनः उद्योगस्थानानां बहुलवर्धनेन परिवेषः अपि दूषितः भवति । परिवेषः दूषितः भवति चेत् तत्र मानवाः पशुपक्षिणः आदयः अपि प्रभाविताः भवन्ति । महानसे यन्त्राणामुपयोगं महिलानां श्रमं न्यूनी करोति यतोहि ताषां बहवः शारीरिकसमस्याः आगच्छन्ति । क्षुद्र क्षुद्र यन्त्रात् अथवा पुरातन यन्त्राणां बहुलव्यवहारेण (Radio active rays) द्वारा प्रभाविताः भवन्ति । वायुमण्डलस्य ओजनस्तरे अपि इदानीमेकः गर्तः सृष्टः अभवत् तदर्थं पृथिव्यामुत्तापस्य वर्धनं भवति । विज्ञानमस्माकं कृते वरदानस्वरूपमस्ति । परन्तु तस्य अन्यथा उपयोगेन वयमेव प्रभावितो भवामः ।

सन्दर्भः –


1 – https://www.1hindi.com

2 – https://hindividya.com

3 – www.mehtvta.com

4 – https://shabdbeej.com

# गायत्रीमन्त्रस्य वैशिष्ट्यम्

बिनोदिनी नायकः
शिक्षाशास्त्री द्वितीयवर्षम्
binibinodini@gmail.com

**ओउम् भूर्भूवः स्वः, तत्स्यवितुर्वरेण्यम्भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात्।**

**अर्थः -** अस्यार्थः अस्ति यत् तं प्राणस्वरूपं, दुखनाशकं. सुखस्वरूपं, श्रेष्ठं, तेजस्वी, पापनाशकं, देवस्वरूपं, परमात्मनं वयम् अन्ते धारणं कुर्मः। सः परमात्मा अस्माकं बुद्धिं सन्मार्गे नयतु इति। अत्र भगवतः सूर्यस्य स्तुतिः वर्त्तते।

**परिचयः**– सनातनधर्मे गायत्रीमन्त्रस्य विशेषमान्यता अस्ति। ऋग्वेदस्य तृतीयमण्डलस्य 62 तमे सूक्ते वर्तमानः दशमः श्लोकः । अस्य रचना त्रेतायायुगे ऋषिणा विश्वामित्रेण कृता । विभिन्नाभिः शोधसंस्थाभिः प्रमाणितमस्ति यत् अस्य मन्त्रस्य पठनेन मानसिकशान्तिः, मुखेसौन्दर्यं, सुखप्राप्तिः, क्रोधस्य ह्रासः, बुद्धेः विकाशः च भवति । AIIMS संस्थया स्वस्य अनुसन्धाने MRI माध्यमेन सक्रियतायाः परीक्षां कृत्वा निश्चितं कृतं यत् गायत्रीमन्त्रपठनेन मस्तिष्कस्य शक्तिः वर्धते।

**गायत्रिमन्त्रैः स्वास्थ्यंसंरक्षणम् -** अद्यतन व्यस्तबहुलसमाजे सर्वे तन्यतायां भवन्ति । तन्यताम् अपाकर्तुं गायत्रीमन्त्रस्य जपः करणीयः। अस्य मन्त्रस्य प्रारम्भे ओं-कारस्य उच्चारणे औष्ठौ जिह्वायां मस्तिष्के च यत् कम्पनं भवति ततः मस्तिष्कस्य स्थिरता वर्धते। पुनः अस्य मन्त्रस्य प्रयोगेण एकाग्रता शक्तिः ध्यानशक्तिः च वर्धते । गायत्रीमन्त्रस्य उच्चारणे जिह्वा-ओष्ठौ च प्रभावितौ भवतः । यद्वारा एतस्य कम्पनं मस्तिष्कपर्यन्तं गच्छति । एवं मस्तिष्कः HYPOTHALAMUS ग्लैडस STIMULES करोति । अस्य प्रभावेण शारीरिककार्याणि आयतानि भवन्ति । पुनः रोगप्रतिरोधकशक्तिमुत्तमां करोति । ' इंटरनेशनाल जर्नल आफ योगा ' संस्थायाः शोधानुसारेण गायत्रीमन्त्रस्य उच्चारणेन यत् कम्पनं भवति तस्य कारणतः मुखे मस्तिष्के च स्थितत्रीणि चक्राणि क्रमशः थर्ड-आई, थ्रोट एवं क्राउन चक्रं च सर्वप्रथमे सक्रियानि भवन्ति । यानि त्रीणि चक्राणि मनुष्यस्य ध्यानशक्तिं वर्धयितुं साहायतां कुर्वन्ति। अस्य कारणं भवति इदं चक्रं मस्तिकं पेनियलग्लैड, चक्षु, साइनस्, लीवरहेड्, पिट्युटरी ग्लैड् ,थायराइरड ग्लैड इत्यादयः एताभिः ग्रन्थिभिः सह सम्बन्धिताः भवन्ति। अतः ध्यानशक्तेः स्मरणशक्तेः च विकाशः भवति।

**निष्कर्षः -** उपरोक्त तथ्यानुसारं ज्ञायते यत् गायत्रीमन्त्रः सम्पूर्णं शरीरं प्रभावयति। अस्माकं स्वास्थस्य विकाशे गायत्रीमन्त्रः प्रमुखः वर्त्तते । इदानींतने समाजे प्रदूषितपर्यावरणे स्थातुं कष्टकरं वर्त्तते । स्वास्थ्यस्य संरक्षणाय जनाः विषयुक्तखाद्यं विषयुक्तओषधं (एलोपाथिक्) स्वीकुर्वन्ति । परन्तु गायत्रीमन्त्रे स्वस्थाय स्वास्थ्याय रहस्यं वर्त्तते।

सन्दर्भग्रन्थः – https://www.herzindagi.com

*****************

## उत्कलकवयः

गयत्री महान्ति
शिक्षाशास्त्रीद्वितीयवर्षम्

**“अपारे काव्यसंसारे कविरेव प्रजापतिः”**

☞**उपोद्घातः -** काव्यं कवीनां नायिका वर्त्तते। कविः तस्य स्वकीयचिन्तनानुगुणं विशिष्टशैल्या च काव्यं रचयति। काव्यं सरसं सुन्दरं रुचिकरं च कर्त्तुं शब्दसंयोजना अलङ्काराः छन्दांसि च प्रयुज्यन्ते। काव्येषु एकं सत्यं तथा काल्पनिकचित्रं च वर्त्तते। कदाचित् सत्यमिश्रितसामाजिकचित्रमपि दृश्यते। उत्कलीयकवीनां क्षेत्रे प्रकृतिदृश्यं , पुनः सामाजिकचित्रं व्याङ्गिकस्वभावः आदि वर्णितमस्ति ।

**अविद्या जीवनं शून्यं दिग्शून्यंहीनवान्धवः**
**पुत्रशून्यं गृहशून्यं सर्वशून्यं दरिद्रता[35] ॥**

उत्कलम् अस्माकं पूण्यभूमिः अस्ति। अत्र अनेके धर्मावलम्बिनः सन्ति। अत्र भाषाविभेदः प्रतिक्षेत्रेषु दृश्यते । तथापि भारतस्य गौरवाय सर्वेषां राज्यानाम् अतिगौरवं वर्त्तते । पुनः भारते विद्यमानेषु राज्येषु ओडिशाराज्यम् अन्यतमम्। कलिङ्गः, उत्कलः इति बहुषु नामसु सुविदितमस्ति। अत्रत्य भौगोलिकस्थितिं पारिपार्श्विकस्थितिं सामाजिकचरित्रं च दृष्ट्वा नैके कवयः नैकानि कृत्यानि रचितवन्तः। तेषु ओडिआसाहित्यस्य सुप्रसिद्धः औपन्यासिकः भवन्ति व्यासकविः फकीरमोहनः। तेन नैके उपन्यासाः विरचिताः। सः तस्य उपन्यासे एकस्य अशिक्षितजनस्य शोषणविषये एवं

[35] चाणक्यनीतिः

सम्भ्रान्तजनानाम् अत्याचारविषये वर्णितयति। तत्रत्यः ग्रामप्रमुखः वर्त्तते सः बुद्धिना सर्वं लुण्ठति। अन्ततोगत्वा तस्य विनाशः जायते।

उत्कलसाहित्यकविषु कविसूर्यवलदेवरथः अपि अन्यतमः । सःतस्य काव्ये अलङ्कारस्य प्रयोगं एवं बहूनां संस्कृतपदानां संयोजनम् अकरोत्। कुत्रचित् सः व्यङ्ग्यरुपेण उपहासयति उद्बोधयति च।

प्रकृतिकविः वर्त्तते राधानाथ रायः। सः प्रकृतिं दृष्ट्वा उत्कलस्य महत्त्वं वर्णयति। सः एकः शिक्षकः आसीत् । बाल्यात् बहुना दुःखेन स्थित्वा अपि तस्य विकासः जातः । ओडिशायाः प्राकृतिकसौन्दर्यं दृष्ट्वा विश्वप्रसिद्धः कोणार्कसूर्यमन्दिरं दृष्ट्वा तस्य कारुकार्यं संस्कृतिपरम्परां च दृष्ट्वा चन्द्रभागायां सूर्योदयं दृष्ट्वा तेन नैकाः कविताः रचिताः।

**उपसंहारः -** सर्वासां भाषाणां जननी भवति संस्कृतम्। उत्कलसाहित्येषु अपि तस्य महान् प्रभावः दृश्यते। उत्कलभाषायाः व्याकरणे, साहित्ये च संस्कृतस्य महान् प्रभावः दृश्यते। बहवः कवयः तेषां काव्येषु संस्कृतालङ्काराणां, रसाणां, शब्दानां च बहुलव्यवहारं कुर्वन्ति। एतत् सर्वं दृष्ट्वा उत्कले संस्कृतस्य महत्त्वं काव्येषु उत्कलस्य चरितं गौरवं च ज्ञायते । अन्ततोगत्वा वदामि यत् वन्दे उत्कलजननी।

सन्दर्भग्रन्थः –

1 - चिलिका (राधानाथ राय),छ माण आठगुण्ठ (फकिरमोहन सेनापति),जगते केवल (वलदेव रथ)।

वि.द्र – एतेषां ग्रन्थानां संक्षिप्त-संस्कृतानुवादः।

******************

## श्रीमद्भगवद्गीता मनोवैज्ञानिकता च

यंगचन्द ओझा
शिक्षाशास्त्रीद्वितीयवर्षम्

पुस्तके पठितः पाठः जीवने नैव साधितः। किं भवेत् तेन पाठेन जीवने यो न सार्थकः । शिक्षा एका जीवनव्यापी प्रक्रिया "Learning is a life long process। केवलं विद्यालये पुस्तकं पठित्वा पूर्णज्ञानं न भवति। सर्वदा सर्वत्र अनुभवेन अभ्यासेन प्रशिक्षणेनैव च व्यवहारः परिवर्त्तते। यदा

व्यवहारे शाश्वतपरिवर्तनं भवति तदाधिगमः जायते। अनुभवः एव उपयुक्तजीवनशिक्षकः। अभ्यासः एव प्रकृष्टप्रशिक्षकः अतः उच्यते practice make man perfect . श्रीमद्भगवद्गीता सनातनधर्मस्येकमहाग्रन्थः अस्ति। यत्र जीवनस्य सम्पूर्णं महत्वमुद्देश्यं लक्ष्यं च वर्त्तते। यत्र स्वयं श्रीकृष्णः अर्जुनायोपदिशति। अत्र उत्तमरीत्या पश्यामश्चेत् मनोविज्ञानं किमिति ज्ञातुं प्रभवामः। उद्विग्नमनाशंकासमस्यायां पतितार्जुनस्य व्यवहारपरिवर्तनाय कथं व्यक्तित्वस्याध्ययनं कृत्वा जायमानप्रश्नस्य निदानात्मकोत्तरं दत्वा अर्जुनस्य प्रगतिशीलविकासं कारयति श्रीकृष्णः। एवं च प्रचोदयति तदेव अस्माभिर्ज्ञातव्यम्। उच्यते च गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते।

**जीवनं मनोविज्ञानं च** – मनुष्यस्य व्यवहारस्य अध्ययनं कृत्वा सापेक्षपरिवर्त्तनमानयनमेव मनोविज्ञानम्। जीवने सर्वत्र सर्वादौ अस्यावश्यकदा वर्त्तते। प्रेरणादानम्, उद्दीपकमाध्यमेन प्रतिक्रियाद्यस्य कार्यं भवति। सद्गुणानां विकासाय अन्तर्निहितशक्तीनां बहिरानयनाय मनोविज्ञानम् अतिगुरुत्वपूर्णं भवति।

**अर्जुनस्य मनोविज्ञानस्थितेः अध्ययनम् –**

**'सीदन्ति मम गात्राणि मुखं च परिशुष्यति।**
**वेपथुश्च शरीरे मे रोमहर्षश्च जायते**॥ 1/29।

श्रीकृष्णः शिक्षकः, अर्जुनः छात्रः, युद्धक्षेत्रं भवति शिक्षालयः। युद्धक्षेत्रे सर्वान् दृष्ट्वा भयेन अर्जुनस्य परिवर्त्तनं दृश्यते। **'गाण्डीवं संस्रते हस्तात् त्वक्चैव परिदह्यते। न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः** ॥1/30। विशालसेनादर्शने शंका जायते तदनु भयः भयेन मानसिकदुर्बलता च। तस्मात् शारीरिकाक्षमता कर्त्तव्यहीनभावना च उदयति। अतः मनः अस्थिरं भवति। **निमित्तानि च पश्यामि विपरीतानि केशवः। न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे** ॥ युद्धक्षेत्रे बान्धवान् दृष्ट्वा अर्जुनः किं कर्त्तव्यमिति चिन्तयति। तस्य मनः आन्दोलयते। बुद्धिः भ्रष्टति। कार्यं नश्यति। सम्पूर्णस्य परिवेशस्य प्रभावः भवति। कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्।1/38।

महामनोवैज्ञानिकः श्रीकृष्णः - श्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णः अपि कुशलमनोवैज्ञानिकरूपेण स्वकीयकर्त्तव्यं संपादितवान्। भ्रमितार्जुनाय श्रीकृष्णः अभिप्रेरयित्वा तस्य बुद्धिविकासं कारयति। **कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा ते सङ्गोस्त्वकर्मणि ।।2/47।** अर्जुनः यदा कर्मविमुखः भवति तदा श्रीकृष्णः तस्य मनस्थितिम् अवगम्य प्रचोदयति। **दुखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते** ॥ सुखे अत्यधिकानन्दः जायते। दुःखे बहुः विषादः भवति। किन्तु जीवने स्थितप्रज्ञेण भाव्यम्। अनेन बुद्धिः भ्रष्टः न भवति। पञ्चभूतेषु एकादशेन्द्रियेषु च मानवः जीवति। अतः इन्द्रियनियन्त्रणमत्यावश्यकम्।

उच्यते –**क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः । स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ।।2 63**

**व्यक्तित्वपरीक्षणम्** – मनोविज्ञाने व्यक्तित्वपरीक्षणाय नैकाः परीक्षाः सन्ति । किन्तु गीतायां एवं स्पष्टं भवति यत् – **तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवन्ति सम्पदं दैवीमभिजातस्य भारतः** ।।16 3 मनोविज्ञाने बहिर्मुखी अन्तर्मुखी रूपेण च भेदः दृश्यते । अत्र दैवी – आसुरीसम्पदरूपेण दृश्यते । **दम्भोदर्पोऽभिमानश्च क्रोधः पारुष्यमेव च । अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्** ।।

**उपसंहारः** – जीवनस्य सम्पूर्णं चित्रं, चरित्रं, व्यक्तित्वं, लक्ष्यं, उद्देश्यं, कर्त्तव्यं च सर्वं गीतायां दृश्यते । यः ह्य्यकोपि गीतां तत्त्वपुरस्सरं पठित्वा सम्पूर्णमनुभूय कार्ये सम्पादयति तर्हि सैकः महादार्शनिकः मनोवैज्ञनिकः च भविष्यति । भारते मनोविज्ञानशास्त्रस्य एकं प्रमुखमुदाहरणं भवति श्रीमद्भगवद्गीता न तु केवलं धर्मग्रन्थरूपेण पूजार्चनायै शास्त्रमिदम् । **यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते** ।। 3 21 । श्रेष्ठः सर्वैराश्रीयते ।

******************

## संरक्षणीया जैवसंस्कृतिः

ज्योती ए के
शिक्षाशास्त्री द्वितीयवर्षम्
1986jyothyak@gmail.com

अस्माकं भारतं जैवसंस्कृत्या सम्पन्नं वर्त्तते । जैवसंस्कृत्यां लोकस्य पुरतः निर्देशनं करोति भारतम् । अस्य उष्णमेखलातः मितोष्णमेखलां प्रति व्याप्ता भूप्रकृतिः, हिमालयादारभ्य समुद्रतटपर्यन्तं व्यप्तः भूप्रदेशः च जैवसंस्कृतेः कारणभूताः भवन्ति । सर्वासां संस्कृतीनाम् आरम्भः वर्धनं च नदीतटेषु अभवत् । एतादृशाः नदीतटादयः, भूप्रकृतिः, कालावस्थाः च सर्वजीवजालानां जीवनाय अविभाज्यघटकाः भवन्ति । तेषां रक्षणेनैव जैवसंस्कृतेः संरक्षणमपि भवितुमर्हति । जैवसंस्कृतेः रक्षणेनैव देशस्यापि सुस्थितिः भविष्यति । जैवसंस्कृतिः का इति ज्ञातव्या चेत् जैववैविध्यविषये ज्ञानम् अवश्यं भवितव्यम् ।

**जैववैविध्यम् -** अस्मान् परितः ज्ञातानि अज्ञातानि च बहुविधानि सस्यानि जन्तवःच भवन्ति। वनेषु, समुद्रेषु ,उष्णमेखलारण्येषु, सैकतप्रदेशेषु हिमद्रवप्रदेशेषु च जीवसानिध्यमस्ति। एवं जीवनवैविध्यस्य प्रपञ्चे जीवानामाहत्य मूल्यं भवति जैववैविध्यम्। 1992 तमे वर्षे ब्रासील् राष्ट्रे रियोडीजनीरो प्रदेशे प्रथमभौमविष्टपे जैववैविध्यमित्यस्य निर्वचनमेवं कृतम्। भूम्यां सागरे अन्यजलावासव्यवस्थायां वसतां विभिन्नजीवजालानां तेषां विभिन्नवासव्यवस्थानां च संयोगःभवति जैववैविध्यम्।

**जैवसंस्कृतेः आवश्यकता** – जीवजन्तवः न सन्ति चेत् मानवानां सुस्थितिरपि न भविष्यति। अतिसङ्कीर्णभक्ष्यव्यवस्थायाः एका कणिका एव भवति मानवः। यदि अन्यकणिकेभ्यो एका नश्यति चेत् शृङ्खला एव नाशं याति। यावत् वैविध्यपूर्णा भवति आवासव्यवस्था तावत् उत्पादनक्षमता जीवनसाध्यता च भवितुमर्हति। अस्यां जीवनसाध्यतामेव मानवः स्वस्य स्वार्थलाभाय नाशयति। सर्वेषां कृते मानवः स्वयमेव मरणगर्तं निर्माति। अस्माकम् आवासव्यवस्थायाः मूल्याङ्कनं कर्तुं वयमशक्ताः।

**जैवसंस्कृतिं कथं रक्षयामः** – प्रकृतेः दुरुपयोगस्य न्यूनीकरणमेव जैवसंस्कृतेः संरक्षणस्य प्रधानोपायः। स्वाभाविकावासव्यवस्थायाः संरक्षणम्, नूतनवन्यजीविसङ्केताः, देशीयोद्यानं, बयोस्फियर् रिसेर्व् इत्यादीनां रूपवत्करणं तथा स्थितानां संरक्षणम्, अपूर्वसस्यानां जन्तूनां च संरक्षणम्, अनधिकृतसमाहरणस्य निवारणम्, समाजेभ्यः छात्रेभ्यः च जैवसंस्कृतेः संरक्षणविषये अवबोधप्रधानं च अन्योपायाः वर्तन्ते। जैवसंस्कृतेः रक्षणाय अस्माकं देशे विभिन्नरीतयः अवलम्ब्यते। अस्माकं शासनघटनायाम् आर्टिक्किल् 48 ए ,51ए (जि) च परिस्थितिसंरक्षणसूचकानि भवन्ति।

**जैवसंस्कृतिसम्बन्धिनःनियमाः** – मत्स्यबन्धननियमः - (1897) वन्यजीविसंरक्षणनियमः - (1972) वननियमः - (1927) वन्यजीविसंरक्षणसंशोधननियमः - (1991) इत्यादयःअनेके नियमाः जैवसंस्कृतेः संरक्षणाय सर्वकारेण आविष्कृताः वर्तन्ते। एते केवलनियमाः।नियमानां पालनम् अस्माभिरेव करणीयम्। माता भूमिः पुत्रोहं पृथिव्याः इति अथर्ववेदस्थां सूक्तिं सर्वदा स्मरामः। सर्वचराचराः भूमेः अधिकारिणः, केवलं मानवाःएव न इति सर्वदा चिन्तयामः। जैवसंस्कृतेः सुस्थित्यर्थं भूमेःसंरक्षणं दायित्वरूपेण स्वीकुर्मः।

लोकाः समस्ताः सुखिनो भवन्तु

**सन्दर्भग्रन्थः** –


1. Biodiversity-Asian books
2. Nammude paristithi

# परिवेशसुरक्षायै अद्यतनसमाजस्य कर्तव्यम्

**लुपामुद्रा महान्ति**
**शिक्षाशास्त्री द्वितीयवर्षम्**
lupamudra.mohanty43@gmail.com

**ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमदुच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेव अवशिष्यते॥**

**उपक्रमः** – परंब्रह्मः पूर्णं भवति । कार्यब्रह्मः अपि पूर्णं भवति । कारणं पूर्णवस्तुनः पूर्णवस्तु एव उत्पत्तिः जायते । अयं परम्ब्रह्म अलौकिकवस्तुनां समष्टिरुपं भवति । तथैव अस्माकं प्रकृतिः अपि परम्ब्रह्मणः तुल्या भवति । कारण प्रकृतिः अलौकिक्योः एव लौकिक्कयोः च उभयोः गुणयोः समष्टिरूपा भवति । यथा परम्ब्रह्मणः आकारः आकृतिः नास्ति, तथैव प्रकृत्याः निर्दिष्टाकारः नास्ति । प्रकृतेः यानि यानि वस्तूनि वयं प्राप्नुमः तानि सर्वाणि वस्तुनि पूर्णानि भवन्ति । यथा सलिलः, ज्योतिः, मरुतः अम्बरादि लौकिकेन वा अलौकिकरूपेण पश्यामः वा अनुभवामः कदापि अपूर्णरूपेण न सर्वदा पूर्णरूपेण प्राप्नुमः । परन्तु वयम् अज्ञमानवाः प्रकृतेः शाश्वतान् अपरिवर्तनगुणान् न ज्ञात्वा मूर्खरूपेण जीवामः ।

**प्रकृतेः संरक्षणाय अद्यतन समाजस्य दृष्टिकोणः** – आधुनिकाः मनोवैज्ञानिकाः सामाजिकैः च मानवाः सर्वश्रेष्ठाः जीवाः इति कथ्यते । कारणं भवति तेषां पार्श्वे विचारशक्तिः, चिन्तनशक्तिः, मननशक्तिः इति कारणात् ते श्रेष्ठाः भवन्ति । तत् तु केवलं वाचा एव सत्यम् । परन्तु मानवाः कर्मणि तत् न प्रदर्शयन्ति । अधुनातनसमाजे जनाः स्वस्य स्वार्थपूर्त्तये सर्वदा प्रकृतिं नष्टं कुर्वन्ति । अर्थात् वयं यस्यां शाखायाम् उपविशामः तामेव एव शाखां कर्तयामः । प्रकृतिः कस्यापि व्यक्तिगतः सम्पतिः नास्ति इति कारणात् तस्याः रक्षणे संरक्षणे च कोऽपि तत्परतां न प्रदर्शयति । एतस्य दृष्टिकोणस्य परिवर्तनम् अधुनातनसमाजस्य कृते नितान्तः आवश्यकः । अधुनातन सर्वकारेण प्रकृतेः संरक्षणाय कतिचन नियमाः उद्घोषिता । नवम्बरमासस्य 26 तमे दिनाङ्के विश्वपर्यावरणसुरक्षादिवसः पर्यावरणस्य सुरक्षासंरक्षणनिमन्तं कार्याणि बोधयति । न केवलं तस्मिन् दिवसे अपितु प्रकृतेः सुरक्षायै वयं दशनिमेषकार्याणि कुर्मः । तेन अस्माकं प्राणभूतां, जीवन्तरूपीं चिरसखां सस्यश्यामलां प्रकृतिं पुनः प्राप्नुमः ।

**संस्कृतसाहित्ये प्रकृतेः स्वरूपवर्णनम् –**

**भवन्ति नम्रस्तस्वः कलागमैः**
**नवाम्बुभिर्दुशविलम्बिनो घनाः।**
**अनुदूताः सत्पुरुषाः समृद्धिभिः**
**स्वभाव एवैष परोपकारिणाम्।।**

अस्मिन् श्लोके महाकविकालिदासः प्रकृतेः जीवन्तरूपं प्रदर्शयति । प्रकृत्या साकं मानवस्य तुलनां करोति । यथा फलागमैः तरवः नम्राः भवन्ति अपितु नूतनअम्बुभिः घनाः अनुदूताः भवन्ति, तथैव परोपकारिणां स्वाभावः एवं भवति ।

**गीतायाः प्रकृतेः वर्णनम् -**

**प्रकृतिं स्वमवष्टभ्य विसृजामि पुनः पुनः।**
**भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशत्।।**

**उपसंहार** – प्रकृतिः परम्ब्रह्मणमनिर्वचनीयमलौकिकी शक्तिः । प्रकृतिः सृष्टिलयस्य कारणं भवति । अतः प्रकृतेः सुरक्षा अस्माकं कर्त्तव्यम् अपि च दायित्वं वर्त्तते । संसारेऽस्मिन् शान्त-सौन्दर्यमय-मनमुग्धक-आह्लाददायिस्थानं भवति केवलं प्रकृतिः । तर्हि प्रकृतेः सुरक्षा संरक्षणं च अस्माकं दायित्वं कर्त्तव्यं च भवेत् ।

******************

# मातृभाषात्वेन संस्कृतेऽगते सति ...?

रम्या.आर् के
शिक्षाशास्त्री द्वितीयवर्षम्
remyaprasad2018@gmail.com

संस्कृतभाषा देवभाषा इति कथ्यते । भारतस्य अतिप्राचीना भाषा भवति संस्कृतभाषा । सा भारतीयभाषाणां जननी अस्ति । इदानीं भारते याः भाषाः दृश्यन्ते ताः सर्वाः क्रिस्तात् अनन्तरम् उत्पन्नाः । ततः पूर्वं तु एषा संस्कृतभाषा एव प्रायः व्याप्ता आसीत् समग्रे भारते । एतया भाषया सर्वे व्यवहाराः प्रचलन्ति स्म । वेदोपनिषदः , इतिहासपुराणानि, धर्मशास्त्र- गणित- आयुर्वेद- सङ्गीत-

अर्थ- शास्त्रादीनि सर्वाणि शास्त्राणि संस्कृतभाषायाम् एव सन्ति। संस्कृतभाषायाः काव्यसम्पत्तिः अपि अपूर्वा अमूल्या च। संस्कृतं विज्ञानभाण्डागारम् अस्ति।

अद्य वयं शास्त्रयुगम् अधिवसामः । आविश्वे अस्मिन् युगे जनानां मित्रता अस्माभिः द्रष्टुं न शक्यते । सर्वत्र संस्कारशून्यता एव दृश्यते । संस्कृतभाषा यदा मातृभाषात्वेन आगच्छति तदा लोके संस्कारः अपि आगच्छति । अस्माकं परिस्थितौ विद्यालये रचनात्मकविषयाः किमपि न पाठयति । अद्यतन छात्राः स्वयं अवयवानां चालनमपि कर्तुं न शक्नुवन्ति । विद्यालये आङ्गलभाषायाः स्वाधीनम् अत्यधिकरूपेण वर्त्तते। आधुनिककाले पाश्चात्यसंस्कारः एव सर्वत्र दृश्यते।

परन्तु संस्कृतभाषा मातृभाषात्वेन आगच्छति चेत् अद्यतन वातावरणस्य उत्तमपरिवर्तनं भवितुमर्हति । संस्कृतभाषापाठनेन जनाः पौराणिकग्रन्थेषु विद्यमानकार्याणि सर्वाणि अपि अवगन्तुं शक्नुवन्ति । वेदाः, पुराणानि, इतिहासाः च क्रमशः पठन्ति चेत् अस्माकं संस्कृतेः उन्नमनं कर्तुं शक्नुवन्ति। यदा वयं काञ्चिद् भाषां स्मरामः तदा तद्भाषाभाषिजनयुक्तं कञ्चित् प्रदेशमपि स्मरामः। किन्तु संस्कृतं यदा स्मरामः तदा अखण्डं भारतम् एव स्मरामः, न तु भारतस्य किञ्चन खण्डमात्रम्। एवं संस्कृतं भारतस्य अखण्डतां स्मारयति । अतः एव राष्ट्रीयैक्यतासम्पादनार्थं संस्कृतभाषा मातृभाषावत् पठनीया।

भारतीया संस्कृतिः संस्कृतम् अवलम्ब्य तिष्ठति। अथवा संस्कृतसंस्कृत्योः परस्परपूरकत्वम् अस्ति । अतः एव उच्यते संस्कृतिः संस्कृताश्रिता । अद्यतनकाले लोके कलहस्य अशान्तेः च वातावरणम् अस्ति। मानवाः परस्परं न विश्वसन्ति। संसारे सर्वत्र विद्वेषस्य, शत्रुतायाः, हिंसायाः च भावना दृश्यते। एतत् किमर्थमागच्छति ? मानवानां संस्कारस्य, न्यूनता एव एतादृशभावनायाः कारणम् । तत् दूरीकर्तुं संस्कृतभाषापठनेन शक्यते । तदर्थं संस्कृतभाषां जनाः अवश्यं पठेयुः । संस्कृतभाषा व्यवहारभाषारूपेण आगच्छति चेत् लोके संस्कारः अपि जायते।

संस्कृतस्य महत्वविषये एवं कथितमस्ति – "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा"। संस्कृतभाषा वैज्ञानिकी भाषा अस्ति । अतः संस्कृतभाषापाठनेन संस्कृतिरपि पठितुं शक्नोति । सर्वचराचरेषु आत्मावत् व्यवहारं कर्तुं संस्कृतभाषा सम्यक् रीत्या शिक्षयति । एतदर्थं सर्वे संस्कृतप्रेमिणः संस्कृतभाषाम् आनेतुं परिश्रमं कुर्युः । अनेन मनुष्यस्य समाजस्य च परिष्कारः भवितुमर्हति । संस्कृतभाषया भाषणेन संस्कृतग्रामस्य निर्माणमपि भविष्यति । संस्कृतभाषया सम्भाषणेन वयं सर्वे देवत्वं प्राप्तुं शक्नुमः। देवत्वे प्राप्ते सति आलोके देवाः अपि द्रष्टुं शक्यन्ते। अतः भूमौ अपि स्वर्गलोकस्य निर्माणं कर्तुं शक्नोति।

संस्कृतपठनेन नूतनपदानां रचनां कर्तुं शक्यते। अत एव संस्कृतपदरचनाय नूतनग्रन्थाणां रचना अपि साध्या भवति। संस्कृतभाषापठनेन व्यक्तेः मस्तिकस्य प्रवर्तनम् अत्याधिकरूपेण भवति। श्रीमता विवेकानन्देन एवम् उक्तम् – "संस्कृतशब्दानां नादः एव अस्मभ्यम् अन्तः, ओजः, तेजः च प्रददाति"। एवं प्रकारेण संस्कृतभाषा व्यक्तेः सर्वाङ्गीणविकासमपि आनेतुम् उपकारकरूपेण कार्यं करोति।

मातृभाषायाः प्राधान्यम् अत्यधिकमस्ति । अस्माकं मनसि मातृभाषा यथा अस्ति तथैव मातृभाषया सह संस्कृतभाषा अपि आगामिकाले इति वक्तुं शक्यते। कारणमिदानीं संस्कृतभाषायाः प्राधान्यं जनानां मनसि अस्ति। संस्कृतशिक्षायां सर्वाङ्गीणविकासार्थं व्यवस्थां कुर्वन्ति चेत् सर्वेऽपि संस्कृतं प्रति आग्रहं प्रदर्शयेयुः।

******************

# पञ्चकर्मचिकित्सा

लिस्ना सि.जेमस्.
शिक्षाशास्त्री द्वितीयवर्षम्

"स्वस्थे शरीरे स्वस्थं मनः" वाक्यमिदम् अतिप्रसिद्धं वर्त्तते। सर्वे मानवाः स्वस्थाः सुखिनः च भवितुं सदा इच्छन्ति । तत्राऽपि स्वस्थशरीरस्य बहुविधानि कार्याणि स्वतः कुर्वन्ति च । शरीरस्य संरक्षणेन स्वस्थेन च मनः अपि संरक्षितं स्वस्थं च भवति। यदि शरीरस्य अनारोग्यं जायते तर्हि मनः अपि अनारोग्ययुक्तं भवति। मनसः आरोगस्य शरीरमपि सुसज्जं भवेत्।

अधुना लोके विविधचिकित्साविधयः सन्ति । यथा – अलोप्पति (Allopathy) होमियो (Homeo) आयुर्वेदः (Ayurveda) इत्यादयः । एतेषां चिकित्साविधीनाम् उपयोगः अपि आरोग्यक्षेत्रेषु जायमानः वर्त्तते । तत्र आयुर्वेदः अतिमहत्वं भजते । पुरातनकालादारभ्य भारते आयुर्वेदविधिना चिकित्साः प्रचलन्त्यः आसन्। अस्य आयुर्वेदस्योद्भवः अथर्ववेदात् अभवत् इति कथ्यते । सर्वेषु राज्येषु इयं चिकित्सा वर्त्तते चेदपि केरले अस्याः आयुर्वेदचिकित्सायाः वैशिष्ट्यम् अन्यतममस्ति।

**आयुर्वेदे पञ्चकर्मचिकित्सा –**

आयुर्वेदे विविधप्रकारकचिकित्साः सन्ति । तासु पञ्चकर्मचिकित्सायाः केरले अतीवप्रचुरप्रचारमभवत् । लोके यत्र कुत्रापि आयुर्वेदः वर्त्तते तत्र सर्वत्रापि पञ्चकर्मचिकित्सा वर्त्तते । पञ्चप्रकारकचिकित्साविधयः अत्र अन्तर्भवति । तद्यथा –

- वमनम् ।
- वास्ति ।
- विरेचनम् ।
- नस्यम् ।
- रक्तमोक्षम् ।

**वमनम् -** पञ्चकर्मचिकित्सायां प्रथमं वर्त्तते वमनम् । कफादीन् दूरीकर्तुं वमनचिकित्सा शक्यते । अनया चिकित्सया शरीरस्य कफादयः वमनरूपेण निर्गच्छति । कफाधिक्येन जायमानानां वातपित्तादीनां शमनाय इयं चिकित्सा उपकरेति । तथापि हृदरोगिणः, लघुबालाः, वृद्धाः, अतिस्थूलाः कृशाः च इमां वमनचिकित्सां कर्तुं नार्हन्ति ।

**वास्ति** – वाताधिक्येन जायमानेभ्यः रोगेभ्यः वास्ति चिकित्सा करणीया इति वाग्भटेन एवं वात-पित्त-कफरक्तादिषु वास्ति अत्यन्तं हितकरमस्ति इति सुश्रुतेन च उक्तं वर्त्तते । स्नेहवास्ति, काषायवास्ति, उत्तरवास्ति इति त्रिधा वर्त्तते ।

**विरेचनम्** – शरीरस्य रोगादीन् विशेषेण रोचनं क्रियते, अतः एव अस्याः चिकित्सायाः विरेचनम् इति नाम आगतम् । वमनचिकित्सानन्तरं षोडशादिनेभ्यः परं विरेचनचिकित्सां कर्तुमर्हति ।

**नास्यम् -** नासिकामार्गेण औषधस्य प्रयोगः भवति इत्यनेन नास्यमित्युच्यते । शिरोभ्रमणं, पक्षाघातः, शिरोवेदना, अक्षिरोगाः इत्यादिभ्यः रोगेभ्यः इयं चिकित्सा उपकरोति ।

**रक्तमोक्षम्** – रक्तशुद्धये फलप्रदायिनी अस्ति इयं रक्तमोक्षचिकित्सा । द्वित्रप्रकारैः रक्तशुद्धिः कर्तुं शक्यते चेदपि सिरोवेधः इति चिकित्सारितिः उत्तमा भवति । शरीरे कस्मिश्चित् स्थाने रक्ताशुद्धिः अभवत् तर्हि तस्मात् स्थानात् रक्तपेन (Leech) रक्तम् अपनयति । एवं बहुविधप्रकारैः रक्तमोशचिकित्सा विद्यते । बालाः (Belowl 6 years) वृद्धाः (Above 10 years) च रक्तमोक्षचिकित्सां कर्तुं नार्हन्ति ।

**केरलस्य पञ्चकर्मचिकित्सा -** आविश्वे पञ्चकर्मचिकित्सायाः प्रभावः दृश्यते । यत्र कुत्रापि आयुर्वेदस्य प्रचारः अभवत् तत्र सर्वत्र पञ्चकर्मचिकित्सायाः अपि अङ्गीकारः जातः । केरले अस्याः

अतीवमहत्वं विद्यते । विदेशीयाः अपि केरलमागत्य इमां चिकित्सां स्वीकुर्वन्तः सन्ति । केरले किमर्थम् इयं चिकित्सा प्रसिद्धा इत्युक्ते केरलस्य वातावरणमस्यै चिकित्सायै अनुयोज्यमस्ति । एवं च विविधद्रव्याणाम् उपलब्धिः केरले अधिकतया वर्त्तते । यदि केषाञ्चन द्रव्याणां प्राप्तिः न भवति चेदपि आचार्यैः वैद्यैः तत्समानफलप्रदायकम् औषधं निर्मीयते । अतः एव केरले अस्याः चिकित्सायाः प्राधान्यं विद्यते । न तु केवलं शरीरस्य स्वास्थाम् अपि तु मनसः स्वास्थ्यमपि आयुर्वेदेन सम्भवति ।

**सन्दर्भग्रन्थः –**


1. विश्वविज्ञानकोशः –No1.7 Wikipedia


******************

# समकालिकशिक्षाप्रणाल्यां संस्कृतस्य प्रभावः


प्रसन्ना . ई. के
शिक्षाशास्त्री द्वितीयवर्षम्


शिक्षा नाम निर्मितप्रक्रिया भवति । निर्मितप्रक्रियायां हेतुत्रयमपेक्षते उपादनं, निमित्तं, सहकारि चेति । उत्तममानवनिर्मितिरेव शिक्षायाः मुख्योद्देश्यम् । कार्येऽस्मिन् अध्येतारः भवन्त्युपादानम्, अध्यापकः निमित्तं, शिक्षापद्धतयः सहकारीसामग्रयः च भवन्ति । त्रयाणामपि एतेषां सुष्टु विकासे जाते सत्येव शिक्षायाः उद्देश्यः साफल्यं प्राप्नोति । उपादानरूपः शिष्याणां नैपुण्योत्सर्गः शिक्षाकाले एव सम्भवति । निर्मित्तानां शिक्षकाणां नैपुणी शिक्षापूर्वपरिशीलनैः स्वयं शिक्षणैश्च सम्पादितव्यां अतोत्र अधिकविचारः सहकारिविषये करणीयः एव । पाठ्यविषयः पद्धतिश्च विभागे॥स्मिन् अन्तर्भवति । वस्तुतस्तु किं पठनीयं कथं पठनीयं किमर्थं पठनीयमिति विचार एव सफलशिक्षायाः पूर्वसोपानम् ।

मानवसभ्यतायाः संस्कृतेश्च विकासे भाषायाः स्नानं महत्वपूर्णं भवति । न केवलं विचाराणां विनिमयः, विचारप्रवृत्तरपि भाषां विना न भवत्येव । इयं चिन्तनशीलता एव इतरजीवजातिभ्यः मानवानां वैशिष्ट्यम् । विशेषसभ्यतायाः उत्पत्तिहेतुत्वमपि चिन्तायां निहितमस्ति । एवं मत्याणां दैनन्दिनजीवने व्यावहारिककुशलता, अपेक्षितज्ञानं, भावनात्मकानुभूतिः, रसास्वादनं, रचनात्मकसामर्थ्यञ्च भाषायाः निदानमेव । अतः शिक्षायां भाषाध्ययनस्य अध्यापनस्य च विशेषमहत्वमस्ति । शिक्षा जीवनार्थसन्नाहः चेत् तल्लक्ष्यप्राप्तये प्रबलं साथनं भवति भाषा ।

मातृभाषा, राष्ट्रभाषा, सांस्कृतिकभाषा, अन्तराष्ट्रियभाषा इति भाषा बहुविधा वर्तन्ते। तेषु मातृभाषा भवति सर्वाधिकप्रभावशालिनी इत्यस्मिन् न सन्देहः। यतः मातृस्तन्येन सह स्वयं शिक्षितां भाषा खलु मातृभाषा। विशेषदेशस्य सामाजिकसमस्ततायै, राजनैतिककार्याणां सुसंघाटनायै, देशीयाखण्डतासंरक्षणाय च राष्ट्रभाषा उपकरोति। प्राचीनकालादारभ्य देशविशेषस्य परम्परार्जितज्ञानविज्ञान निधीनां जीवनमूल्यानां च वाहिनी भाषा संस्कृतभाषा प्रतिदेशम् आत्मवैभवः अनयैव भाषया सुष्टु प्रकाश्यते। विभिन्नदेशेषु सञ्चालनीयानां क्रयविक्रयाणां, विज्ञानविनिमयानां च आधारो भवति अन्ताराष्ट्रभाषा।

विशिष्टदेशस्य सांस्कृतिकसम्पत्तिं सुस्पष्टमवगन्तुं सांस्कृतिकभाषाध्ययनम् अवश्यमेव। अस्माकं देशस्य भारतस्य सांस्कृतिकभाषा भवति संस्कृतं विना संस्कृतभाषापरिचयं भारतपरिचयो दुस्साध्य एव।

शिक्षाक्षेत्रे प्राथमिकस्तरादारभ्य संस्कृताध्ययनस्य प्रसक्तिरस्ति। एवं किं पठनीयमिति पूर्वोक्तस्य प्रथमप्रश्नस्य समाधानं भवत्येतत्, संस्कृतं पठनीयमिति। विषयेऽस्मिन् प्रत्येकभाषावादिनां विरोधस्यावकाशः नास्त्येव। विशेषभाषासु विशेषदक्षताः सन्ति। भाषा तु न स्थिरशीला वर्तते, सा सर्वथा आदानप्रदानाभ्यां विकासोन्मुखगतिशीला भवति। विशेषतः अस्माकं मातृभाषायां (कैरलीभाषायाम्) प्रतिशतं पञ्चसप्ततिसंख्यका पदसम्पदः संस्कृतभाषायाः योगदानमेव। अतः मातृभाषाध्ययनेन साकं संस्कृताध्ययनमपि क्रियते चेत् कैरल्याः संरक्षणमपि कर्तुं शक्यते। संस्कृतभाषया कैरलीभाषा पदसम्पदा

इवानुगृहीतया वाक्यघटनया सुसंबद्धा च भवति। संस्कृतग्रन्थानां व्याख्यानरूपेण अनुवादरूपेण च रचनाबाहुल्यं कैरल्यां संस्कृतस्य प्रभावं स्पष्टीकरोति। बुद्धावर्तग्रहणं मातृभाषया च भवति। अतः संस्कृताधिष्टतमातृभाषाशिक्षणं मनसः, बुद्धेः, संस्कृतेश्च यथोचितं बुद्धिकारकं भवति।

कथमध्ययनमध्यापनं च कर्तव्यमिति द्वितीयः प्रश्नः अध्यापकशिक्षणयोजना भवति। तत्र सहजतासिद्धान्तः, अभ्याससिद्धन्तः, रूचेः सिध्दान्तः, सक्रियतायाः सिद्धान्तः इत्येवम् अध्यापने बहुविधाः सिद्धान्ताः सन्ति। संश्लिष्टता, संक्षिप्तता च संस्क-तस्य विशेषता अस्ति। अतः संस्कृताध्ययने अध्यापने च अज्ञानात् ज्ञानं प्रति, सरलात् कठिनं प्रति, स्थूलात् सूक्ष्मं प्रति बोधविकासः करणीयः। वर्तमानशिक्षाक्षेत्रे प्रभाविनी शिक्षा इति तत्वस्य महत्स्थानम् अस्ति। यदा अध्येतारः स्वीयाऽयोजने शिक्षणे समर्थाः भवन्ति तदा अध्यापकाः केवलं मार्गदर्शकत्वेन तिष्ठन्ति। अयं स्वेनायोजितशिक्षणमेव प्रभावीशिक्षणस्य मापकः। अतः कोशग्रन्थानां, व्याख्याग्रन्थानां, अनुवादग्रन्थानां च साहाय्येन संस्कृतभाषावबोधनाय, स्वाध्याय सामर्थ्यवर्धनाय च श्रद्धा देया।

भाषायाः सहजाकबोधः अनुकरणेन अभ्यासेन च सम्भवति । भाषाशिक्षणे विशेषतः मातृभाषातिरिक्तभाषाशिक्षणे अभ्यासोऽत्यन्तापेक्षितो भवति। संस्कृतं नित्यजीवनव्यवहारस्य भाषा न भवतीत्यतः तस्य अध्ययनं विद्यालये एव संभवति। अतः संस्कृतस्य श्रवणाय, भाषणाय, पठनाय, लेखनाय च समुचिता शिक्षणपद्धतिः विद्यालयेषु अवश्यं प्रयोक्तव्या।

किमर्थं संस्कृतमिति विचारस्याधिका साधुताऽस्ति । प्राचीनकाले जीवनकाले जीवनस्य समस्तमण्डलेषु महत्वपूर्णः ज्ञानविज्ञानानामाविष्कारः संस्कृतभाषायाम् अन्तर्भवन्ति । भाषादिशा सन्तुष्टा समग्रा च भवदीयं भाषा। संस्कृतेनाविष्कृतं जीवमूल्यं तु सार्वलौकिकं सार्वकालिकश्च भवति। परस्परविद्वेषस्य स्थाने भावपारस्पर्यस्य समभावनायाः च सन्देशो अत्र दृश्यते।

**सहायकग्रन्थसूची –**


1. संस्कृतशिक्षणम्
2. शिक्षायाः सामाजिकधाराः


*****************

# ज्ञानसंस्कारयोः महत्वम्


रङ्कनिधि खण्डपाणि<br>
शिक्षाशास्त्री द्वितीयवर्षम्<br>
rankanidhikhandapani@gmail.com


**ज्ञानस्य अर्थः**

सामान्यतः ज्ञानं , किमपि वस्तु अथवा वषयस्य यथार्थः अधिगमः भवति । ज्ञानं शब्दस्य प्रयोगः भवति , किमपि वस्तु अथवा विषयस्य वर्णनम् । ज्ञानस्य प्रयोगः भौतकाध्यामिकजगतयोः सम्बन्धयोः भवति । ज्ञानशब्दस्य व्यापकं परिभाषां दातुं कठिनं भवति । कारणं दर्शनेन विभन्नं विचारधाराः व्याख्याः च स्व स्व मतानुसारेण कृतवन्तः । तथापि विदुत्भिः वदन्ति – सत्यमेव ज्ञानस्य नाणकस्य पार्श्वद्वयम् । अर्थात् सत्यस्य वास्तविकार्थः ज्ञानम् । ज्ञानं सः अनुभवः अस्ति यः इन्द्रियानुभूति तथा इन्द्रियातितः द्वे स्तः ।

(1) ज्ञानं जिज्ञासायाः सत्यतामेव ।

(2) ज्ञानं जिज्ञासायाः सत्यतायाः निमित्तं प्रमाणमेव ।

(3) ज्ञानं जिज्ञासायाः सत्यतायाः विश्वासः एव ।

**ज्ञानस्य परिभाषाः -**

1. सुकरातस्यानुसारेण – ज्ञानमेकम् एताएतादृशीशक्तिः अस्ति यस्य सहायतया किमपि कार्यं कृतं, अवबोधसम्भवः अस्ति ।
2. जाँन लाँक – ज्ञानं जनानां बुद्धियोग्यतायां विद्यमान, ज्ञातनिषयः,उपस्थितयोः मेलनमेव ज्ञानमस्ति।
3. जाँन ड़ी वी – ज्ञानमनुभवस्य सतत् पुनरचना इति वक्तुं शक्यते ।

**ज्ञानस्य प्रकृतिः -**

1. ज्ञानं सत्यस्य पार्शे गमनस्य (प्राप्तम्) समाधानमस्ति ।
2. चिन्तने ज्ञानं निमित्तं सर्वश्रेष्ठः वस्तुरूपेण कार्यं करोति ।
3. भाषया ज्ञानस्य प्राप्ति संचारः भवति ।
4. शब्दस्य अर्थः, विचारः, ज्ञानस्य शिलायाः आधारः भवति ।
5. ज्ञानं सुनिश्चितमस्ति ।
6. ज्ञानस्य पृष्टिं तर्तुं शक्यते ।

**ज्ञानस्य प्रकाराः -**

- प्राग्नुभाविक ज्ञानम् ।
- प्रायोगिकज्ञानम् ।

**प्राग्नुभाविकज्ञानम् ---**

प्राग्नुभाविकज्ञानं बुद्धिं विना सहायताप्राप्तं करोति तत् भवति प्राग्नुभाविकज्ञानम् । यथा – 2 + 2 = 4 भवति । इमं प्रमाणितं कर्तुं किमपि अनुभवस्य आवश्यकता न भवति ।

**प्रायोगिकज्ञानम् –**

प्रायोगिकज्ञानं यः भवति, इन्द्रियगतज्ञानम्, तथाच जगतमवलोकनेन, नीरीक्षणेन, स्वस्य अनुभवेन प्राप्ति ज्ञानम् ।

**संस्कारम्-**

संस्कारं मुख्यरूपेण षोड़शप्रकाराः सन्ति । एतानि संस्काराणि सनातनधर्मस्य अन्तर्गताः सन्ति । सर्वान् मनुष्यान् एतानि संस्काराणि माध्येमेन अग्रे गमनाय आज्ञा निर्धारिताः सन्ति । तानि संस्कराणि यथा –

- गर्भधानसंस्कारम् ।
- पुंसवनं संस्कारम् ।
- सीमन्तोन्नयन संस्कारम्, (सीमन्त संस्कारम् ) ।
- जातकर्म संस्कारम् ।
- नामकरणं संस्कारम् ।
- निष्क्रमणं संस्कारम् ।
- अन्नप्राशनं संस्कारम् ।
- मुण्डनं संस्कारम् ।
- विद्यारम्भ संस्कारम् ।
- कर्णवेधः संस्कारम् ।
- उपनयन अथवा यज्ञोपवितः संस्कारम् ।
- वेदारम्भ संस्कारम् ।
- केशांत संस्कारम् ।
- समावर्तन संस्कारम् ।
- विवाह संस्कारम् ।
- अंत्येष्टि संस्कारम् ।

**1. गर्भाधानं संस्कारम् –**

इदं संस्कारप्रथमं संस्कारमस्ति । गृहस्थजीवने प्रवेशपरान्त प्रथमं कर्तव्यरूपेण इदं संस्कारं पाल्यन्ते । गर्भाधानस्य पूर्वे स्वस्य तनमनसः पवित्रानिमितं यं संस्कारं करणीयम् ।

**2. पुंसवनं संस्कारम् –**

गर्भस्थशिशोः मानसिकविकासस्य दृष्ट्वा यं संस्कारमुपयोगी बवति । द्वितीय अथवा तृतीयमासे इदं संस्कारं करणीयम् ।

**3. सिमन्तोन्नयनसस्कारम् –**

इदं संस्कारस्य अभिप्रायः शिशुसैभाग्यसंपन्नः भवेत् इति । गर्भपारक्षणेन साकं गर्भस्थशिशोः एवं तस्य मातुः रक्षणं च इदं संस्कारस्य उद्देश्यमस्ति । इदं संस्कारं गर्भधारणस्य षड अथवा अष्टमी मासे भवति ।

**4. जातकर्म संस्कारम् –**

नवजातशिशोः नालछेदनस्य पूर्वे इदं संस्कारं कुर्वन्ति । बालकस्य मेधा,बलमेवं दीर्घायु निमितं स्वर्णखण्डेन मधुघृतं च वैदिकमन्त्रोच्चारणेन च खादयन्ति ।

5. **नामकरणं संस्कारम् –**

जन्मस्य एकादशदिवसे अथवा एकविंशतिदिवसे इदं संस्कारं भवति । नामकरणसंस्कारस्य सनातन धर्मे अधिकं महत्वं वर्तत

6. **कर्णवेधः संस्कारम् –**

इदं संस्कारं षड़मास अनन्तरं षोड़शमास पर्यन्तमथवा 3.5 वर्षे अथवा कुलस्य परम्परा अनुसारेण कुर्वन्ति । बालकस्य शारीरिक कष्टात् रक्षणमेव मूलोद्देश्यम्

7. **निष्कामणं संस्कारम् ---**

निष्क्रामण अर्थः भवति बर्हिः गमनम् । अस्मिन् संस्कारे शिशुं सूर्यचन्द्रस्य प्रकाशस्य दर्शनम् ।

8. **अन्नप्राशन संस्कारम् –**

अन्नप्राशननिमितं जन्मतः षड़ मासे उपयुक्तः भवति । क्षीरमेवं मिष्ठानेन शिशोः अन्नग्रहणं शुभं भवति ।

9. **मुण्डनं संस्कारम् –**

चुड़ाकर्मसंस्कारं मुण्डनस्स्कारमपि वदन्ति । आचार्याः बालकस्य , प्रथम, तृतीय, अथवा पञ्चमवर्षे इदं संस्कारस्य पालनस्य नियमं वर्तते ।

10. **विद्यारम्भसंस्कारम् –**

अन्नप्राग्नसंस्कारस्य अनन्तरमेव विद्यारम्भ संस्कारोपयुक्त भवति । उपनयन संस्कारस्य उद्देश्यं भवति बालकः शिक्षायाः प्रारन्भिकस्तरं जानियात् अथवा परिचित भवेत् ।

11. **मुण्डन संस्कारम् –**

इदं संस्कारम् उपनयनसंस्कारं परं भवति । इदं संस्कारे शिशोः शुधता निमित्तं मुण्डनं कुर्वन्ति ।

12. **विद्यारम्भ संस्कारम् –**

ज्ञानर्जनेन सम्बधितमस्ति इदं संस्कारम् । वेदस्य अर्थः भवति ज्ञानम् । वेदारम्भस्य माध्यमेन ज्ञानस्य समष्टिकरणमेव इदं संस्कारस्योद्देश्यम् ।

13. **केशान्तः संस्कारम्**

गुरुकुले वेदाध्ययनपूर्ण परं गुरोः आदेशेन इदं संस्कारं भवति । वस्तुतः इदं संस्कारं गुरुकुलतः विदायसमये गृहस्थाश्रमे प्रवेशकरणस्य उपक्रमः ।

14. **समावर्तनं संस्कारम् –**

गुरुकुलतः परायणप्राकशिष्यं समावर्तनसंस्कारं भवति स्म । इदं संस्कारे सुगन्धित पदार्थः एवं औषधादियुक्त जलेन उतरभागे अष्टौघटाः जलेन स्नानं कारयन्ति स्म ।

15. **विवाहः संस्कारम् –**

प्राचिनकालतः स्त्रीपुरूषाय इदं संस्कारं सर्वाधिक महत्वपूर्ण न संस्कारमिति । वेदाध्ययनं परं यदा युवकः सामाजिक परम्परा निर्वाहि करणाय इदं संस्कारं पाल्यते स्म ।

16. **अन्तयेष्टिः संस्कारम् –**

अन्त्यष्टिः संस्कारं संस्कारेषु अन्तिमं भवति । अग्निपरिग्रह संस्कारमपि ग्राह्यते । आत्मना साकं अग्नेः निवन्धमेव अग्नि परिग्रहः ।

******************

# मूल्यशीक्षा-भौतिकाध्यात्मिका च

श्रीधरन्. एडमना
शिक्षाशास्त्री द्वितीयवर्षम्

अस्मिन् आधुनिके काले मूल्यस्य अत्यधिकं प्राधान्यं वर्तते । मूल्यं नाम सद्गुणानां समूहः भवति । तत्र मानवस्य धारणा, विचारः, विश्वासः, मनोवृत्तिः तथा स्थितिः च समन्विताः भवन्ति । भारतीयधर्मग्रन्थेषु 'मूल्यम्' इति शब्दः शीलशब्देन व्यवह्रियते। अयं मूल्यशब्दः आङ्ग्लभाषायाः ' Value' इति पदात् निष्पन्नः। 'Value' इति शब्दः लैटिनभाषायाः 'Valere' इति शब्दात् उद्भूतः च।

**मूल्यस्य स्रोतांसि –**

मूल्यशिक्षायाः अत्र प्रतिपाद्यते । भौतिकस्रोतांसि, आध्यात्मिकस्रोतांसि च भौतिकपरिवारः, विद्यालयः, समाजः इत्यादयः अन्तर्भवन्ति । आध्यात्मिके वेदाः, उपनिषदः, पुराणोतिहासाः, खुरान्, बैबिल् इत्यादयः च अन्तर्भवन्ति।

**भौतिकस्रोतांसि –**

- **परिवारः** –मूल्यस्य प्राथमिक स्रोतरूपेण परिवारः कल्पितः भवति । परिवारे माता एव मूल्यस्य प्राथमगुरुः । मूल्यस्य बालपाठान् सा पूत्रं पाठयति । अतः एव उच्यते –'मातृदेवो भव' । एवं परिवारे विद्यमानाः अनेयो जनाः अपि आचरणैः मूल्यस्य गुरवः इव विराजन्ते ।
- **विद्यालयः --** बालः) न तु परिवारात् मूल्यम् आर्जयति । विद्यालयः मूल्यप्रदाने अविभाज्यघटकत्वेन स्थीयते । विद्या ददाति विनयमिति वाक्यमुच्यते । विद्यया एव सर्वं

सिद्ध्यति च । विनयः अपि मूल्येषु अन्तर्भवति । अनया विद्यया एव मूल्यप्राप्तिः बालके सम्भवति । विद्यालये प्रचाल्यमानाः सर्वाः क्रियाः अपि मूल्याधिष्ठिताः भवन्ति । पाठेषु विद्यमानाः आप्तवाक्यानि,सुक्तयः, सुभाषितानि, नैतिकमूल्ययुक्तकथाः च बालके विदय्मानमूल्यानि वर्धयति । अतः एव मूल्यवर्धनायविद्यालयाः अत्यन्तं सहकुर्वन्ति ।

- **समाजः** – एवमुच्यते यत् मानवः सामाजिकप्राणी वर्तते इति । परिवारः अपि लघुसमाजः भवति । बालकः परिवारात् विद्यालयं गच्छति । विस्तृतसमाजः तं परितः विद्यते चेदपि सः सम्पूर्णसमाजं नावगच्छति । कालानन्तरं समाजे प्रविश्य त्वत्थानं त्थापयति च । समाजे मूल्यस्य संरक्षणं न तु एकस्य कर्तव्यम् अपि च प्रत्येकं मानवः स्वीयाचरणैः मूल्यसंरक्षणं कुर्यादेव । व्यक्तिः मूल्यानि समाजात् अर्जयति वर्धयति च ।

**आध्यात्मिकस्रोतांसि ---**

भारते एका आध्यात्मिकसंस्कृतिः विद्यते । वेदेषु उपनिषत्सु पुराणोतिहासेषु च इयं संस्कृतिः वर्तते । एतेषां पठनेन स्स्कृतिं ज्ञातुं शक्यते । पुराणेषु मूल्यस्य प्राधान्यं ज्ञातुमेवं शक्यते ---

**“अष्टादशपुराणेषु व्यासस्य वचनद्वयं ।**
**परोपकाराय पुण्याय पापाय परपीड़नम् ।।”**

परोपकारस्य विषये अस्मिन् उच्यते । एतादृशश्लोकानां पठनेन मूल्यस्य महत्वं छात्रैः अभिज्ञायते । भविष्यपुराणेऽपि उक्तमस्ति –

**“छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।**
**फलान्यपि परार्थाय वृक्षाः सत्पुरुषाः इव ।।”**

प्रकृतौ वृक्षाः अपि परार्थाय जीवन्ति । तर्हि उत्कृष्टोत्कृष्टेन मानवेन आजीवनं मूल्ययुक्तकार्येभ्यः देयमस्ति । विनयः, दानशीलः, त्यागः, परोपकारमनोभावः च इत्यादि मूल्यानि एतादृशपुराणानां पठनेन सिद्ध्यति ।

मूल्यं मानवस्य जीवने कीयत् स्थानमावहति इति निर्णेतुं न शक्यते । व्यक्तेः व्यपहारेण एव तस्य मूल्यत्वं ज्ञायते । एकस्य आचारेण वा व्यवहारेण मूल्ययुक्तवान् वान इति ज्ञातुं शक्यते । महाभारते उक्तं वर्तते यत् –

**“शीलेन हि त्रयो लोकाः शक्त्या जेतुं न संशयः ।**
**न हि किञ्चिदसाध्यं वे लोके शीलवतां भवेत् ।।”**

अतः भतृहरिणोक्तम् –

**'सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्' ।**

एवं प्रकारेण मूल्यानि जीवने आचारेण अनुष्ठाने च जीवनं सार्थकतां प्राप्नोति । अनेन एव श्रेष्ठभारतनिर्माणमपि सम्भवति ।

***************

# भारतीयसंस्कृतिः

अनन्दभट्टः
शिक्षाशास्त्रीप्रथमवर्षम्

कस्यापि राष्ट्रस्य जनानां यः साधारणतया परिष्कृतो विशुद्ध उत्तम आचारो व्यवहारश्च भवति स एव तस्य राष्ट्रस्य संस्कृतिः इत्युच्यते । भारतीयसंस्कृतेरिदं वैशिष्ट्यं यत् प्राचीनकालादेव या संस्कृतिरत्र पल्लविता सैवाधुनापि अक्षुण्णाऽत्र दृश्यते । अस्यां संस्कृतौ किञ्चिदेवंविधं यद् उत्कृष्टतमं यच्च न कदापि क्षतं भवति । अस्याः संस्कृतेः उदात्तत्वदर्शनं न केवलं संस्कृतसाहित्ये एव भवति । अहिंसासत्यास्तेयादिधर्मास्तादृशा एव सन्ति । समन्वयो हि भारतीयसंस्कृतेर्मूलतत्त्वम् । अस्मादेव कारणादत्र बह्व्यो वैदेशिक्यः संस्कृतयः समायाताः परन्तु ताः सर्वा एव भारतस्य संस्कृतौ विलीनाः । भारतीयधार्मिककृत्यानां भारतीयपूजाविधीनां च तादृशमस्ति स्वरूपं यत्तत्र प्राचीनार्वाचीनयोः पौरस्त्यपाश्चात्ययोश्च ससुखं सम्मेलनं सम्भाव्यते । भारतस्य विविधेषु प्रदेशेषु विविधा जनाः विविधवेषधारिणो विविधभाषाभाषिणोऽपि विविधदेवान् पूजयन्तोऽपि हृदयेन समानाः एव भवन्ति । सर्वे एव एकमेव परमेश्वरं मन्यन्ते । सर्वत्र विवाहादिसंस्कारेषु तत्र एवं वैदिकमन्त्रम् उच्चार्यन्ते । अमृतमनादिमनन्तं परमम् आत्मानं सर्वे एव जना विश्वस्य आधारभूतं मन्यन्ते । मद्यव्यभिचरणानि सकलाः भारते निन्द्यन्ते । कर्मफलानुसारेण एव पुनर्जन्मनि सर्वत्रापि विश्वासो दृश्यते ॥

इयं समन्वयभावनैव सर्वत्र साहित्येऽपि दृग्गोचरः भवति । वेदेषु गीतायां च वयं ज्ञानकर्मोपासनासमुच्चयं पश्यामः । अस्या भावनाया आधारे एव अस्माकं महर्षिभिराचार्यैश्च पुरा समाजः चतुषु वर्णेषु कर्मानुसारं विभक्तः यतो हि समाजोत्थानाय सर्वेषां वर्णानां समन्वितः प्रयासोऽपेक्ष्यते । तथैव च पूर्णजीवनसाफल्याय मनुष्यजीवनं चतुषु ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासाख्येषु आश्रमेषु विभक्तम् । एते चत्वारोऽपि आश्रमाः समन्वितरूपेणैव जीवनस्य पूर्णतां सम्पादयन्ति, न त्वेकैकशः । अयं समन्वय एवं भारतीयसंस्कृतेः प्राणाः अनेनैव च सम्मिल्यास्माभिः स्वातन्त्र्यमधिगतम् । सर्वत्रैव भारते धामकोत्सवेषु कृष्या सह सम्बन्धोऽन्यद् वैशिष्ट्यम् अस्याः संस्कृतेः भवन्ति । कृषिप्रधाना हीयं संस्कृतिः ग्रामप्रधाना च । अत एव वयं सरलजीवनम् अनुसरन्तोऽपि रामकृष्णबुद्धादिमहापुरुषाणां उत्कृष्टानादर्शान् धारयामः। अस्माकं भारतीय संस्कृतेः वैशिष्ट्यं भगवद्गीतायामपि उक्तं वर्तते

श्रीमद्भगवद्गीता समस्तसंसारे विख्याता। संसारस्य अधिकासु भाषासु अस्या अनुवादाः सम्पन्नाः। सप्तशतश्लोकात्मके अस्मिन् लघुग्रन्थे सकलमानवतायै शान्तिसन्देशाः प्रदत्ताः । वस्तुतः गीतायां कृष्णार्जुनसंवादमाध्यमेन वेदानाम् उपनिषदां च ज्ञानस्य सारः संगृहीतः ।

महाभारते यदा युद्धभूमौ अर्जुनः सम्मुखमेव रणाय समुद्यतानां धृतराष्ट्रपुत्राणां दुर्योधनादीनां सेनां पश्यति तदा तैः भ्रातृभिः अन्यैः सम्बन्धिभिश्च सह असौ योद्धुं नेच्छति । तस्य मनसि मोहः जायते । तदा तस्य रथस्य सारथिरूपेण स्थितः महान् नीतिज्ञः योगीश्वरः श्रीकृष्णः तम् उद्बोधयति युद्धाय च प्रेरयति स्म । सः कथयति यत् मनुष्येण फलस्य चिन्तां न कृत्वा कार्यं कर्तव्यम् । सर्वे जनाः एकस्मिन् दिवसे निश्चितम् आयुः यापयित्वा अवश्यमेव मरिष्यन्ति । परन्तु तदा केवलं तेषां शरीरं नश्यति, आत्मा तु अजरः, अमरः अस्ति, स न नश्यति । अतः एतेषां बन्धूनां नाशविषये भयं न कर्तव्यम् । यैः शरीरैरेते अन्यान् उत्पीडयन्ति कपटाचरणं च कुर्वन्ति तेषां नाशः आवश्यक अस्ति । अतः अस्मिन् युद्धे युद्धं कर्तव्यमेव । अनेन भगवतः कृष्णस्योपदेशेन अर्जुनः ज्ञानं प्राप्य मोहं त्यक्त्वा युद्धाय कृतनिश्चयः अभवत् ।

श्रीमद्भगवद्गीता निष्कामकर्मणः उपदेशं ददाति, निर्भीकतां च शिक्षयति । आत्मनः अजरत्वम्, अमरत्वम्, व्याप्ति, सर्वभूतान्तर्यामित्वं च उपदिश्य मनुष्यं त्यागमार्गं दर्शयति । गीतायां संन्यासस्य, कर्मणः, ज्ञानस्य भक्तेश्चापूर्वः समन्वयः लक्ष्यते । अयं समन्वयः एव भारतीयसंस्कृतेः दर्शनस्य विचारधारायाश्च प्रतीकं वक्तुं शक्यते । गीतायाः सन्देशः विश्वबन्धुत्वस्य, विश्वशान्तेः सन्देशः, आदर्शमानवस्य च सन्देशः ॥ गीतायाः ज्ञानेन किंकर्तव्यविमूढो जनो मार्गं लभते मानसिकशान्तिः चाधिगच्छति । अत एव सर्वशास्त्राणां सारभूता गीता अमूल्यम् अप्रतिमग्रन्थरत्नमिति कथ्यते ।

******************

# संस्कृतभाषा

गिरीशभट्ट्
शिक्षाशास्त्रीप्रथमवर्षम्

जगतः एकतमा अतिप्राचीना समृद्धा शास्त्रीया च भाषा वर्तते। संस्कृतं भारतस्य जगत: वा भाषास्वेकतमा प्राचीनतमा। भारती, सुरभारती, अमरभारती, अमरवाणी, सुरवाणी, गीर्वाणवाणी, गीर्वाणी, देववाणी, देवभाषा, संस्कृता, वाक्, दैवीवाक् इत्यादिभिः नामभिः एतद्भाषा प्रसिद्धा । भारतीयभाषासु बाहुल्येन संस्कृतशब्दाः उपयुक्ताः। संस्कृतात् एव अधिका भारतीयभाषा उद्भूताः। तावदेव भारत-युरोपीय-भाषावर्गीयाः अनेकाः भाषाः संस्कृतप्रभावं संस्कृतशब्दप्राचुर्यं च प्रदर्शयन्ति।

व्याकरणेन सुसंस्कृता भाषा जनानां संस्कारप्रदायिनी भवति। पाणिनीयाष्टाध्यायी इति नाम्नि महर्षिपाणिनेः रचना जगतः सर्वासां भाषाणाम् व्याकरणग्रन्थेषु अन्यतमा वैयाकरणानां भाषाविदां भाषाविज्ञानिनां च प्रेरणास्थानं इवास्ति ।संस्कृतवाङ्मयं विश्ववाङ्मये अद्वितीयं स्थानम् अलङ्करोति । संस्कृतस्य प्राचीनतमग्रन्थाः वेदाः सन्ति । वेद-शास्त्र-पुराण-इतिहास-काव्य-नाटक-दर्शनादिभिः अनन्तवाङ्मयरूपेण विलसन्ती अस्ति एषा देववाक् । न केवलं धर्म-अर्थ-काम-मोक्षात्मकाः चतुर्विधपुरुषार्थहेतुभूताः विषयाः अस्याः साहित्यस्य शोभां वर्धयन्ति अपितु धार्मिक-नैतिक-आध्यात्मिक-लौकिक-वैज्ञानिक-पारलौकिकविषयै अपि सुसम्पन्ना इयं देववाणी।

**इतिहासः**

इयं भाषा न केवलं भारतस्य अपि तु विश्वस्य प्राचीनतमा भाषा इति मन्यते। इयं भाषा तावती समृद्धा अस्ति यत् प्राय: सर्वासु भारतीयभाषासु न्यूनाधिकरूपेण अस्या:: शब्दा: प्रयुज्यन्ते अत: भाषाविदां मतेन इयं सर्वासां भाषाणां जननी मन्यते। पुरा संस्कृतं लोकभाषा आसीत्। जना: संस्कृतेन वदन्ति स्म । विश्वस्य आदिम: ग्रन्थ: ऋग्वेद:

संस्कृतभाषायामेवास्ति। अन्ये च वेदा: यथा यजुर्वेद:, सामवेद:, अथर्ववेदश्च संस्कृतभाषायामेव सन्ति। आयुर्वेद-धनुर्वेद-गन्धर्ववेदार्थवेदाख्या: चत्वार: उपवेदा: अपि संस्कृते एव विरचिता:। सर्वा: उपनिषद: संस्कृते उपनिबद्धाः अन्ये वेदाङ्गा: शिक्षा-कल्प-निरुक्तम्-ज्यौतिषम्-छन्द-व्याकरणम्, दर्शनम्,इतिहास:,पुराणं, काव्यशास्त्रं चेत्यादयः ॥

**ध्येयवाक्यनि**

अल्पाक्षरैः अनन्त-गाम्भीर्य-गहनार्थयुक्तानि तादृशध्येयवाक्यानि गुरुरिव, मित्रमिव, श्रेयोभिलाषीव अस्मान् निरन्तरं प्रेरयन्ति,जीवनयाने सत्प्रदर्शनं कुर्वन्ति । सूत्र-मन्त्र-तन्त्र-सूक्ति-सुभाषितरूपेण असंख्याकानि प्रेरणावाक्यानि सन्ति तानि पठ्यमानाः जनाः नूतनोत्साहं, चैतन्यं, स्फूर्तिं च प्राप्नुवन्ति ।उदाहरणरूपेण कानिचन ध्येयवाक्यानि पश्यामः ।

- भारतमहाराज्येन **सत्यमेव जयते** इति मुण्डकोपनिषदः वाक्यं ध्येयवाक्यरूपेण स्वीकृतम् । भारतप्रशासनस्य राजमुद्रिकायाम् अङ्कितमिदं सर्वान् प्रेरयति ।जनाः सर्वदा सत्यमार्गे जीवनं यापयेयुः इति भावेन एतद्वाक्यं स्वीकृतम्।
- नेपालप्रशासनेन **जननी जन्मभूमिश्च स्वर्गादपि गरीयसी** इति मुण्डकोपनिषदः वाक्यं ध्येयवाक्यरूपेण स्वीकृतम्।
- भारतस्य सर्वोन्नतन्यायालयस्य ध्येयवाक्यं यतो **धर्मः ततो जयः** इति महाभारतात् स्वीकृतम्। यत्र धर्मः वर्तते तत्र हि विजयः निश्चयः इत्यर्थः।
- भारतस्य लोकसभायाम् अध्यक्षस्थानस्य उपरि लिखितम् अस्ति **धर्मचक्रप्रवर्तनाय** इति । तेन धर्मबुद्ध्या सभा चालयितव्या इति प्रेरणा लभतामिति चिन्तयित्वा तद्वाक्यं स्थापितम्।
- भारतस्य डाक्-तार् विभागस्य ध्येयवाक्यम् **सेवा अस्माकं धर्मः** तदनुगुणतया उद्योगिनः अहर्निशं सेवारताः भवन्ति।
- भारतीय रैल् विभागस्य वाक्यम् **श्रम एव जयते**। श्रमजीविनः, कर्मकराः जनानां सुखयात्रार्थं कार्यं कुर्वन्ति। रैल् विभागाः विजयमार्गे चालयन्ति च।
- भारतस्य जीवनबीमानिगमः इति संस्था श्रीमद्भगवद्गीतायाः **योगक्षेमं वहाम्यहम्** इति वाक्यं ध्येयवाक्यरूपेण स्वीकृत्य जनानां योग-क्षेमनिर्वहणार्थं व्यवस्थां करोति।
- **नभः स्पृशं दीप्तम्** इति ध्येयवाक्यं भारतीयवायुसेनाया अस्ति। एतद् भगवद्गीतायाः एकादशाध्यायात् स्वीकृतम्। वायुसेनायाः शक्तिः दीप्तिश्च आकाशपर्यन्तं व्याप्ता इत्यर्थं सूचयति एतद्वाक्यम्।
- भारतीय नौसेना **शं नो वरुणः** इति उपनिषद् मन्त्रं स्वीकृत्य प्रेरणां प्राप्नोति । जलाधिदेवस्य वरुणस्य अनुग्रहेण देशरक्षणकार्ये सर्वदा निमग्ना भवति।
- आकाशवाणी **बहुजनहिताय बहुजनसुखाय** इति वाक्यानुगुणं जनानां हितार्थं सुखार्थं संगीतसाहित्यसांस्कृतिकादि- कार्यक्रमैः जनान् रञ्जयति।
- दूरदर्शन् **सत्यं शिवं सुन्दरम्** इति सुन्दरसंस्कृतवाक्यं ध्येयवाक्यरूपेण स्वीकृत्य श्रव्य-दृश्यमाध्यमेन जनमनोरञ्जनकार्यक्रमान् योजयति।

एवं बहुविधसंस्कृतसूक्तयः अस्मान् निरन्तरं प्रेरयन्ति, एषा संस्कृतभाषायाः महिमा अस्ति।

**सन्दर्भग्रन्थसूची**


- Wikipedia

# शिक्षा क्षेत्रे मनोविज्ञानास्य आवश्यकता

दीप्ति . के

शिक्षाशास्त्रीप्रथमवर्षम्

मनोविज्ञानम् इत्यस्य आंगलभाषायां Psychology इति समानशब्दः । पदमेतत् Psyche तथा Logos इति ग्रीक् पदाभ्यां निष्पन्नमस्ति । तत्र Psyche इत्यस्य आत्मा इति Logos इत्यस्य विज्ञानम् इति च अर्थः विद्यते । अतः Psychology इत्यस्य आत्मनः विज्ञानम् इति शाब्दिकार्थः निष्पन्नः । भारते वैदिककालादारभ्य आत्मनः विषये अध्ययनं प्रचलति स्म। भारतीयदर्शनेषु एवं पुराणेतिहासेषु च आत्मनः विषये बहवो विचाराः भवन्ति । परन्तु आधुनिकयुगे मनोविज्ञानं दर्शनात् पृथग्भूय स्वतन्त्रशास्त्रत्वेन प्रसिद्धिमवाप । अस्य विज्ञानस्य प्रथमप्रयोगः F.A.Lange महोदयः 1866 तमे वर्षे History of Materialism इति ग्रन्थे कृतवान् । महोदयस्य मते मनोविज्ञानम् आत्मनः विज्ञानत्वेन अपेक्षितः वर्तते ।सम्प्रति अस्मिन् विज्ञाने मानसिकतथ्यानां वर्णनं विद्यते । परन्तु कालान्तरे आत्मनः स्वभावविषये दार्शनिकानां मतभेताः आसन् । आत्मा मूर्तिपदार्थः नास्ति इत्यतः आत्मा इन्द्रियगोचरः नास्ति । अतः तस्य स्वरूपस्वभावविषये इदमित्थं वक्तुं न शक्यते । अतः आत्मनः विज्ञानं मनोविज्ञानम् इति परिभाषा तिरस्कृता । तिरस्कृत्यनन्तरं केचन विद्वांसः मनसः विज्ञानं मनोविज्ञानमिति उक्तवन्तः । किन्तु तत्रापि समस्या जाता । आत्मवत् मनः अपि दृष्टिगोचरः नास्ति । अतः मनसः अपि वैज्ञानिकाध्ययनं न सम्भवति । एवमुक्त्वा इयमपि परिभाषा तिरस्कृता । अनन्तरं चैतन्यस्य विज्ञानं मनोविज्ञानम् इति परिभाषा आगता । किन्तु तत्रापि मतभेदाः आगताः ।अतः सा परिभाषा अपि तिरस्कृता ।अन्तिमे विंशतितमशताब्द्धेः प्रथमचरणे J.B Watson महोदयः मनोविज्ञानस्य व्यवहारवादसिद्धान्तं प्रतिपादितवान् । तस्य मते मनोविज्ञानं व्यवहारस्य विज्ञानम् ( It is possible to right a psychology to define it as the science of behavior ) इति । अर्थात् " व्यवहारः नाम ताः प्रक्रियाः , याः केनचितुद्दीपकेन सम्बन्धाः भतन्ति । तथा वस्तुनिष्ठतया तासां निरीक्षणं कर्तुं शक्यते " इति । अतः मनोविज्ञानं सामाजिकविज्ञानवत् समाजस्य सांस्कृतिक - सामाजिकसमस्यानाम् अध्ययनं विदधाति । अतः मनोविज्ञानं व्यवहारविज्ञानम् इति कथ्यते ।

शिक्षाक्षेत्रे मनोविज्ञानस्य आवश्यकता अत्यधिका भवति । यदा छात्राध्यापकः शिक्षाशास्त्रम् अधीत्य अध्यापकरूपेण विद्यालयं गमिष्यति तस्मिन्नवसरे पाण्डित्येन साकं बहूनि कौशलानि शिक्षकाय आवश्यकानि । छात्रेषु ज्ञानप्राप्तिः कथं भवति इति शिक्षकः जानीयात् । एवं छात्राणां शारीरिक - मानसिक विकासाः कथं भवन्ति ? , छात्राणाम् अधिगमनाय अनुकूलवातावरणं कथं निर्मातव्यम् ? इत्यादिकार्याणि शिक्षकेण ज्ञातव्यानि । एवं रूपेण छात्राणां मानसिकसामर्थ्यानि , इच्छाः , अभिरुचयः , मूर्तिमत्वम् इत्यादीनि कार्याणि छात्रेषु भिन्नरूपेण भवन्ति । अतः एतत् सर्वं प्रथमं अध्यापकः अवगच्छति चेदेव छात्राणाम् अभिरुच्यनुसारं पाठयितुं शक्ष्यति । अत अत्र मनोविज्ञानस्य आवश्यकता आगच्छति । एतान् वैय्यक्तिकभेदान् अविगणय्य कक्ष्यायां बोधयति चेत् अपेक्षितफलानि न प्राप्यन्ते । अनेन कारणेन मनोविज्ञानं शिक्षाक्षेत्रे अनिवार्यमेव । अस्य पठनेन छात्राणां व्यवहारम् अध्यापकः अवगन्तुं शक्नोति । एवं च तेषां शारीरिकमानसिकसामर्थ्यानि कियन्ती सन्ति , तेषाम् इच्छा कस्मिन् विषये वर्तते , अभिरुचिः कुत्र भवति इत्यादीनि कार्याणि अध्यापकः ज्ञातुं शक्नोति । अतः मनोविज्ञानम् अध्यापकाय अत्यन्तम् उपकारकं भवति ।

छात्राध्यापकाः मनोविज्ञानम् अवश्यं पठेयुः । एवं शिक्षाक्षेत्रे मनोविज्ञानम् अवश्यं पाठनीयम् । मनोविज्ञानविपश्चिद्भिः शिक्षामनोविज्ञानस्य आवश्यकता उक्तास्ति । यथा

- बालकस्य स्वभावं ज्ञातुम् ।
- बालकं स्ववातावरणेन सामञ्जस्यं स्थापयितुम् ।
- शिक्षायाः स्वरूपस्य , उद्देश्यानां प्रयोजनानां च ज्ञानाय ।
- शिक्षणाधिगमसिद्धान्तानां विधीनाञ्च अवगमनम् ।
- संवेगानां नियन्त्रणं शैक्षिकमहत्वस्य च अध्ययनम् ।
- चरित्रनिर्माणस्य विधीनां सिद्धान्तानां च अवगमनम् ।
- मूल्याङ्कनविधीनां प्रशिक्षणम् ।
- शिक्षामनोविज्ञानस्य तत्थ्यानां सिद्धान्तानां च ज्ञानाय प्रयुक्तानां वैज्ञानिकविधीनां ज्ञानम् ।

एवं रूपेण शिक्षाक्षेत्रे मनोविज्ञानस्य आवश्यकता विद्यते । तत्र छात्राणां व्यवहारस्य विभिन्नपक्षाणाम् अध्यापनाय शिक्षामनोविज्ञानम् अत्यन्तम् उपकरोति ।

सन्दर्भग्रन्थसूची


- शिक्षायाः मनोवैज्ञानिकधाराः,
- Vidyabhyasathinte manasasthra bhoomikai ( Malayalam Book ),
- Google


***************

# साम्प्रतिके समये नारीशिक्षायाः गुणदोषविवेचनम्


अनश्वरा बालन्

शिक्षाशास्त्रीप्रथमवर्षम्


विद्या मानवजीवने वैशिष्ट्यं सम्पाद्यते । विद्याविहीनस्य मानवस्य जीवनं निष्फलमिति विद्यते । अस्माकं समाजः न केवलं पुरुषाणां , किन्तु नारीणां तु प्राधान्यं विददाति । अतः उत्तमसमाजस्य निर्माणार्थं पुरुषाणां कृते शिक्षा आवश्यकी भवति तथा स्त्रीणामपि । प्राचीनकालेऽपि नारीशिक्षा अनिवार्या आसीत् । वैदीककाले नार्यः अधिकशिक्षिताः आसन् । तस्मिन् समये स्त्रीणां स्थानं गौरवपूर्णमासीत् **जननी जन्मभूमिश्च स्वर्गादपि गरीयसि** ' । वसिष्ठपत्नी अरुन्धती , अगस्त्यमुनेः पत्नी लोपमुद्रा , कालिदासस्य पत्नी विद्योत्तमा एताः वेदशास्त्रनिपुणाः आसन् । तत्र नारी देवी तुल्या , सहधर्मिणी , अर्धाङ्गिनी इत्येवं मन्यते।

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।

यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः" ।।

उक्तिरियं नारीणां कृते प्रधानं स्थानं सम्मानितमिति प्रतिपादयति । पौराणिककाले स्त्रीशक्तेः स्वरूपं मान्यं ,तस्याः आराधना अपि कृता। आधुनिककाले स्त्रीणां शिक्षणम् अनिवार्यं भवति । यदि माता सुशिक्षिता भवेत् तर्हि सा स्वस्य सन्तानानां पालनं शिक्षणं सुष्टुप्रकारेण कर्तुं शक्नोति । यदि सा अशिक्षिता चेत् तस्याः सन्तानमपि विद्याहीनः संस्कारशून्यः दुर्व्यवहारी च भविष्यति । शिक्षिता नारी गृहकार्यसञ्चालने , सन्तानस्य पालने , स्वस्य परिवारस्य कार्येपि सम्यक् रीत्या समर्था भवति । एकस्य परिवारस्य केन्द्रबिन्दुः नारी भवति , यदि नारी शिक्षिता भवति सम्पूर्णः परिवारः अपि शिक्षितः भवेत्। नार्यः एव सन्तुष्टपरिवारस्य श्रेष्ठनिर्मातारः । नारीशक्त्या शक्तिशालीनः समाजस्य निर्माणं भविष्यति । परिवारे शिशोः प्रथमाध्यापिका तथा गुरुश्च माता एव भवति । मातुः शिशुः सत्पाठम् आर्जयति । अद्य स्त्रीणां सान्निद्यं सर्वासु सभासु दृष्टुं शक्यते । विद्यालयेषु महाविद्यालयेषु , कार्यालयेषु सर्वत्र नार्यः कार्यरताः सन्ति । एवं विधानसभासु , लोकसभासु , समाजसेवासु , चिकित्साक्षेत्रेषु , न्यायालयेषु इत्यादिषु मण्डलेष्वपि कुशलतापूर्वकं कार्याणि कुर्वन्ति । श्रीमती इन्दिरागान्धिः राष्ट्रस्य प्रधानमन्त्री पदवीम् अलंकृतवती । प्रतिभापाट्टील् भारतस्य प्रथमा वनिता राष्ट्रपती आसीत् । समाधानस्य नोबेल् पुरस्कारं प्रथमतया प्राप्तवती मदर् तेरेसा । कल्पना चौलां बहिराकाशसञ्चारिणी एताः नार्यः अस्माकं राष्ट्रस्य उन्नमनाय कार्यरताः आसन् ।

नारीशिक्षार्थं सर्वकारपक्षतः बह्वनि कार्याणि आयोजितानि सन्ति ।' बेटी बचा ओ बेटी पढाओ योचना ,कस्तूर्बागान्धी बालिका-विद्यालययोजना ,राष्ट्रीयप्रोत्साहन-योजना इत्यादयः वर्त्तन्ते । इदानीन्तनकाले नारीशिक्षायै STEM-(Science, Technology, Engineering and Mathematics), एकं प्रधानं कार्यमस्ति । तत्र बालिकानां महिलानां च कृते विज्ञाने, प्रविधिक्षेत्रे, यान्त्रिक-तान्त्रिकक्षेत्रे तथा गणितशास्त्रविषये अपि शिक्षां ददाति। भारतस्य चान्द्रयान्-2, तस्य प्रक्षेपणाय महिला: नेतृस्थानं उपस्कारितवत्य:। आधुनिकयुगे Electronic Learning अपि महिलानां कृते बहु आवश्यकी वर्तते । गृहमधिष्ठाय अपि पठितुं शक्यते। नूतनप्रविधे: अभ्यासेन नार्य: नूतनं कौशलं सम्पादयन्ति। सा कर्मक्षेत्रे अपि अद्वितीयक्षमतां प्राप्नोति । समाजे स्त्रीणां वा पुरुषाणां स्थानं समानरूपेण अस्ति । समाजस्य रथस्य चक्रद्वयमिव भासते । यथा एकेन चक्रेण रथस्य गतिः असम्भवा, तथा जीवनस्य गतिः अपि नारीं विना असम्भवा ।

गुणदोषौ उभावपि एकस्य नाणकस्य भागद्वयमिव वर्तते । नारीशिक्षायामपि गुणदोषौ स्तः । वर्तमानकाले समाजे प्रचाल्यमानाः बहव्यः समस्याः दृष्टुं शक्यन्ते । प्रायेण विवाहमोचनं सर्वत्र प्रचलति । तत्र स्वस्य सन्तानानां भाविकालस्य चिन्तनं अपि न करोति । अत्र शिक्षायाः सदुपयोगः नास्ति । इदानींतनकाले बहवः पब् केन्द्राः सन्ति । तत्र स्त्री-पुरुषौ सर्वदा समययापनं कुर्वतः । उद्योगकार्याण्यनुसृत्य केचन शिक्षिताः जनाः विदेशं प्रति गच्छन्ति विदेशगमनसमये पितरौ वृद्धसदने त्यक्त्वा स्वस्य जीवनमेव वाञ्छन्ति ।

# आधुनिका दूरवाणी

के.अनुश्री
शिक्षाशास्त्रीप्रथमवर्षम्

छात्राः क्रीडन्तः पठन्ति नित्यम्
अम्बा कुप्यति तर्जति  तरसा ।
मधुरमनोहरपुराणं दृश्यं
समयेन मार्जितं सुन्दरं चित्रम् ।।

आगता नरपुत्री दूरवाणी
तया परिष्कृता मातृभूमिः ।
विस्मृतो मानवः मित्रभाषणं
विस्मृता भारतसंस्कृतिश्च।।

धिक् ! किं बहुविधं जातमस्ति
मनुष्यमनीषा तस्यां मग्ना ।
किं ते हस्ते ?दूरवाणी
का वा रेखा? ललाटरेखा ।।

******************

# उत्कलस्य प्राचीन नवान्नपर्वम्

आशिष्कुमार साहु
शिक्षाशास्त्रीप्रथमवर्षम्
Email ashishsahu0439@gmail.com

संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।

वेदतत्वार्थसंजुष्टं लोकालोककरं शिवम् ।।

विश्वस्मिन् भारतवर्षं प्रसिद्धमस्ति ।अस्यां भारतसंस्कृतौ संस्कृतं मूलं भवति । संस्कृतौ अस्यां भिन्नप्रकारकानि पर्वाणि दरीदृश्यन्ते । तत्र उत्कलस्य संस्कृतिं किञ्चिद् ज्ञास्यामः ।

वर्षाणां भारतः श्रेष्ठो देशानामुत्कलः स्मृतः।
उत्कलस्य समोदेशः देशोनास्ति महीतले ।।

उत्कलप्रदेशे अनेकप्रकारकाः कलाः, साहित्यम्,शिल्पकला,पर्वाणि च दृश्यन्ते। एवं च अस्मिन् प्रदेशे प्रतिवर्षं द्वादशपर्वाणि परिपाल्यन् ।तेषु पश्चिमोत्कलस्य  नवान्नपर्व अन्यतमं वर्तते उत्कलभाषयां  नूआँखाइ  इति कथ्यते ।

एतत् विशेषतः पश्चिमोत्कलस्य पारम्पारिकं पर्व भवति । भाद्रपदमासस्य शुकेलपक्षे चतुर्थीतिथौ अस्माभिः विनायकपूजा आचर्यते । तस्य अपरस्मिन् दिने पर्व इदं पाल्यते । अर्थात् शुक्लपक्षपञ्चम्यां तिथौ एव पाल्यते । अस्मिन् समये नूतनव्रीहिः उत्पाद्यते तेन आनन्दितैः जनैः असौ पर्व पाल्यते ।

**नवान्नपर्वणः विशेषता**

इदं पर्व नूआँखाइ नाम्ना परिचितं अस्ति । नूतनव्रीहेः उत्पादनेन कृषिकैः सानन्दं पर्व पाल्यते ।वर्षऋतौ समाप्ते सति शरत्काले कृषकैः श्रीलक्ष्मीदेव्यै प्राप्तनूतनधान्यानि समर्प्यन्ते उपास्यन्ते च एषा प्रक्रियैव "नवान्नभक्षणम्" इति उच्यते।

**पूजावीधिः**

परीवारस्य मुख्यजनाः कृषिक्षेत्रस्य पूजां कृत्वा तत्र किञ्चित् नूतनव्रीहिमानयति । व्रीहेः ओदनं निर्माय स्वइष्टदेवीं समर्प्य प्रसादरूपेण परिवारजनान् प्रत्यर्पयति ।

**सामाजिकैकता**

नवान्पर्व एकं गणपर्व वर्तते । प्रत्येकस्मिन् गृहे पूजाविधेः समाप्त्यानन्तरं परिवावस्य मुख्यः योऽस्ति तस्य हस्तात् नवान्प्रसादं भुक्त्वा वयस्कजनान् सम्मानेन भूयिष्ठः प्रणम्य कनिषठजनाः आशीर्वादान् स्वीकुर्वन्ति । तदनन्तरं मध्याह्ने भोजनं समाप्य ग्रामजनैः सह मिलित्वा ज्येष्ठान् नमस्कृत्य आशीर्वादान् गृह्णान्ति । तत्पश्चात् पूर्वरागः, क्रोधः,द्वेषः,कलहादिन् विस्मृत्य आनन्देन सर्वेऽपि भजनादिकं कृत्वा भगवज्जपं कुर्वन्ति ।

**आञ्चलिकैकता**

विशेषतः पश्चिमोत्कले इदं पर्व मुख्यतया परिपाल्यते । उत्कलेतरराज्येषु विदेशेषु वा ये ये उत्कलियाः निवसन्ति ते तस्मिन स्थाने यथा –गुजरात् ,छत्तीसगड्, रायपुरम् ,विशाखापाटनम् ,वाङ्गालुरु ,चेन्नाइ,दिल्ली इत्यादिषु एकत्रीभूय इदं पर्व पालनं कुर्वन्ति ।

*******************

# जगन्नाथसंस्कृतिः

विमल् शतपथि
शिक्षाशास्त्रीप्रथमवर्षम्

निलाचलनिवासाय नित्याय परमात्मने ।
बलभद्रसुभद्राभ्यां जगन्नाथाय ते नमः ।।

समग्रेऽस्मिन् विश्वे भारतवर्षं पुण्यभूमिरुपेण ख्यातमस्ति । भारतवर्षे अपि अनेकानि राज्यानि सन्ति ।भारते उत्कलप्रदेशः पुण्यतमप्रदेशः भवति कारणं तत्र नीलाद्रिनाथः सच्चितानन्दः जगतो नाथो भगवान् श्रीजगन्नाथो विराजते । यथा कपिलसंहितायाम् –

वर्षाणां भारतः श्रेष्ठो देशानामुत्कलः स्मृतः ।
उत्कलस्य समो देशः देशो नास्ति महीतले ॥

अर्थात् विश्वे भारतदेशः भवति श्रेष्ठः एवं भारतदेशे उत्कलप्रदेशः श्रेष्ठः । उत्कलसमः प्रदेशः महीतले नास्ति इति मुनिः वर्णितवान् । पुनः तत्त्वयामले इन्द्रद्युम्नं प्रति वसिष्ठवाक्यं यथा –

भारते चोत्कले देशे भूस्वर्गे पुरुषोत्तमे ।
दारुरूपी जगन्नाथः भक्तानामभयप्रदः ॥

अर्थात् भूस्वर्गे भारतवर्षे उत्कलप्रदेशे पुरुषोत्तमक्षेत्रे दारुरूपी जगन्नाथः श्रीमन्दिरे पूजनीयः अस्ति । जगन्नाथस्य संस्कृति विश्वसंस्कृतिः अस्ति । द्वादशमासेषु त्रयोदशपर्वाणाम् आयोजनेन श्रीक्षेत्रं उल्लासपूर्णं भवति ।

**वसुदैवकुटुम्वकम्**

जगन्नाथसंस्कृतौ जाति-धर्म-वर्ण-लिङ्ग-भाषादिभेदत्वं नास्ति सर्वे समानः । धनीकदरिद्रयोः विचारः नास्ति , जातिधर्मयोः विचारः नास्ति । अतः जगतः नाथः जगन्नाथः उच्यते । मानवाः एव मम परिवारः इति शिक्षा मिलति । भगवतः स्वरुपः विश्ववन्धूत्वस्य प्रतीकः भवति । जनसमुद्रे सुमेरुपर्वतः सदृशः नन्दिघोषः स्फुटति, तदानीम् सः उत्कलप्रदेशस्य नायकः न अपितु समग्र विश्वस्य नायकः भवति । एतादृशं विश्ववन्धुत्वं कुत्रापि न दृश्यते ।

**महाप्रसादः**

महाप्रभूः श्रीजगन्नाथः भोजनप्रियः अस्ति । श्रीलक्ष्मी महाप्रसादं निर्माणं कृत्वा महाप्रभुं ददाति इति विश्वासः । अतः महाप्रसादः देवदुर्लभं भवति । अतः पद्मपुराणे उक्तमस्ति –

तदन्नपाचिका लक्ष्मी स्वयं भोक्ता जनार्दनः ।
तस्मात्तदन्नं विप्रर्षे! दैवतैरपि दुर्लभम् ॥

तत्र भक्ताः मिलित्वा प्रसादसेवनं कुर्वन्ति । तत्रापि जातिभेदः, धर्माधर्मः ,धनीकदरिद्रभावः नास्ति । तत्र महाप्रसादस्य एका कणिकाम् अपि न क्षिपन्ति भक्ताः महाप्रसादं देवतातुल्यं मन्यन्ते ।महाप्रसादः शुष्कः भवति चेदपि तत् निर्माल्य रूपं नयति । निर्माल्यम् अपि भक्ताः प्रसादरूपेण स्वीकुर्वन्ति । अत्र महाप्रसादस्य महत्वं ज्ञातुं शक्नुमः ।

**श्रीजगन्नाथः**

यत्र कुत्रापि गच्छन्ति चेत् भक्ताः वदन्ति श्रीजगन्नाथस्वामी । श्री शव्दस्य अर्थः भवति लक्ष्मी । अस्याः जगन्नाथसंस्कृतेः बहव्यः शिक्षा प्राप्यन्ते । भगवान् अपि गौणरुपेण अस्मान् शिक्षा ददाति । तर्हि वयम् अपि गोणरुपेण शिक्षिताः ।

संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः ।
संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते ।।

संस्कृतं भारतीयसंस्कृतेः आत्मा भवति । संस्कृते सकलाः कलाः सकलं ज्ञानं सकलाः संस्कृतयः सन्ति ।संस्कृतिः संस्कृताश्रया भवति । यथा कपिलेन उक्तम्-

संस्कृतं संस्कृतेमूलं ज्ञान-विज्ञानवारिधिः ।
वेद् तत्वार्थसंजुष्टं लोकालोककरं शिवम् ।।

अतः सर्वे संस्कृतं पठेयुः ।अस्माकं संस्कृतसाहित्ये किम् अस्ति इति जानान्तु इति मम आशयः ।

सन्दर्भग्रन्थसूची


- मनुस्मृतिः
- कपिलसंहिता
- पद्मपुराणम्

# महिलाओं की सुरक्षा

प्रतिमा रानी आईच
शिक्षाशास्त्रीप्रथमवर्षम्

हम सभी जानते है की हमारा देश हिन्दुस्तान पुरे विश्व भारत में अपनी अलग रीती रिवाज तथा संस्कृति के लिए प्रसिद्ध है भारत मैं प्राचीन काल से हि यह परम्परा रही है की यहाँ महिलाओं कि समाज में भारत वह देश है जहाँ महिला विशिष्ट आदर एवं सम्मान दिया जाता है । महिलाओं कि सुरक्षा और इज्जत का खास् ख्याल रखा जाता है अगर भारतीय संस्कृति में महिलाओँ की देवी लक्ष्मी का दर्जा दिया गया है । हम इक्कीसवी सदी की बात करे तो महिलाए हर कार्यक्षेत्र में पुरुषों के साथ कंधे से कंधा मिलाकर काम खुद का कारोबार हो या आसमान, पुलीस,खेल,विद्यालय कर रही है चाहे वो राजनीति बैंक में उसने की अभिलाषा हो ।

महिलाओ की सुरक्षा अपने आप में ही बहुत विस्तृत विषय है पिछले कुछ साल में महिलाओं के प्रति वढते अल्याचारों को देखकर हम यह तो बिलकुल नहि कह सकते की हमारे देश में महिला पूर्णतरिके से सुरक्षित है महिलाए अपने आपको असुरक्षित महिला महसूस करते है खास तौर पर अगर उन्हें अकेले बाहर जाना है तो वाकई हमारे लिए शर्मनाक है की हमारे देश में महिलाओ की भय में जीना पङ रहा है । हर परिवार के लिए उनकी महिला सदस्य के सुरक्षा चिन्ता का मुदा बन चुका है । अगर महिला सुरक्षा में कुछ सुधार करने है तो निचे कुछ तव्य दिय है जिन्हें ध्यान में रखते हुए समाज में बड़ा बदलवो ला सकते है ।

**महिला सुरक्षा से जुडे कुछ सुझाव**

- सबसे पहले हर महिला को आत्म रक्षा करने की तकनीक सीखनी होगी तथा उनके मनोबल को भी ऊचा करने की ज़रुरत है । इससे महिलाओ को विपरीत परिस्थियों का सामना करने में किसी तरह की परेशानी महसुस नहीं होगी ।
- अक्सर ऐसा देखा गया की महिलाए स्थिति की गंभीरता को किसी भी पुरष की बजाये जल्दी भाप लेते है अगर उन्हें किसी तरह की गड़बड़ी की आशंका लगती है तो उन्हें जल्द ही कोई ठोस कदम उठा लेना चाहिए।
- महिलाओ को इस बातो का भी ध्यान रखना चाहिए की वे किसी भी अनजान पुरुषो के साथ अकेले में कही न जाये ऐसे हालत से उन्हें अपने आप को दूर रखना चाहिए।
- महिलाओ का कभी भिया आपने आप को पुरुषो से कम नहीं समझ न चाहिए फिर चाहिए वो मानसिक क्षमता की बात हो यह फिर शारीरिक बल की बात हो।

- महिलाओ को इस बात का खास ख्याल रखना चाहिए की वे इन्टरनेट या किसी भी एनी माध्यम के द्वारा किसी भी तरह के अंजन व्यक्ति से बातचित करते वक्त सावधान रहे और उन्हें अपना किसी भी तरह का निजी विवरण न दे ।
- महिलाओ को घर से बाहर जाने वक्त हमेशा अपने साथ मिर्च स्प्रे करने का यंत्र रखना चाहिए हलाकि ऐसे जरुरी भी नहीं की इसी पर पूरी तरह निर्भर रहे वे किसी और विकल्प का भी इस्तमाल कर सकती है ।
- अपने आप को विपरीत परिस्थियों में गिरना देख महिलाए अपने फ़ोन से इमरजेंसी नंबर यह किसी परिजन को व्हाइअप्प्स भी कर सकते है ।
- किसी भी अंजन शहर के होटल या एनी जगह रुकना हो तो वहां के स्टाफ के लोगो तथा वाकी चीजो की सुरक्षा को पहले की सुनिश्चित कर ले ।

**महिला सुरक्षा से जुडे कानून**

- बाल विवाह प्रतिबन्ध अधिनियम (1929)
- विशेष विवाह अधिनियम (1954)
- हिन्दू विवाह अधिनियम (1955)
- हिन्दू विधवा पुर्नविवाह अधिनियम (1856)
- दहेज निषेध अधिनियम (1961)
- मातृत्व लाभ अधिनियम (1861)
- विदेशी विवाह अधिनियम (1969)
- भारतीय तलाक अधिनियम (1969)
- समान परिश्रमिक अधिनियम (1976)
- विवाहिता महिला सम्पति अधिनियम (1874)
- राष्ट्रीय महिला आयोग (1990)
- लिंग चयन निषेध अधिनियम (1994)
- घरेलु हिंशा अधिनियम (2005) से महिलाओ का संरक्षण
- यौन अपराधो से बच्चो का संरक्षण अधिनियम (2012)
- इसके अलावा7-05-2015 को लोक सभा ने और -22 दिसम्बर 2015 को राज्य सभा ने "जुवेनाइल जस्टिस बिल " में भी बदलाव किया है साल का 18 से 16 इसके अन्तर्गत यदि कोई किशोर जघन्य अपराध में लिप्त पाया जाता है तो उसे भी कठोर सज़ा का प्रावधान है खास तौर पर निर्भया जैसे केस में किशोर अपराधियों के छुट जाने के बाद ।

**निष्कर्ष**

कड़े कानून के बनाने के बावजूद भी महिला अपराध में किसी के बजाये दिन प्रतिदिनं लगातार उछान देखने को मिल रहा है। महिलाए अपने आप को समाज में महिलाओ की सुरक्षा गिरता जा रहा है । सरकार महिलाऔ के लिए गन्दे होते महौल को बदलने की जिम्मेदारी सिर्फ असुरक्षित महसूस कर रहे है की ही नहीं अपि तु हर आम आदमी की है ताकी हर महिला गर्व से अपने जीवन को जी सके ।

**संदर्भग्रन्थसूची**


- https://W.W.W hidikiduniya.com>amp
- https://hindi.theindianwire.com


***************

# बह रही है कैसी यह बयार


**अमित सिंह**
शिक्षाशास्त्रीप्रथमवर्षम्


बह रही है कैसी यह बयार
हे सखी!
बह रही है कैसी यह बयार,
संस्कृ ति यह कैसी
जहाँ देह तुम्हारा
मात्र है गोस्त,
संस्कृति यह कैसी
बाजार यह कैसा
मानवता यह कैसी
मानवीयता यह कैसी
हो जहाँ तुम
मांस का लोथड़ा,
दौरउदारी-ए-
हो गई हो इतनी उदार,
कहीं एकांगी वासना अनुराग
कहीं दो तरफा सहजीवन
का छद्म,
बेमन से
कुचली जाती हो
मर्दित होती हो

मारी जाती हो बारबार-,
हे सखी !
घर हो या बाहर
देह तुम्हारा बन जाता है कौतुहल
देह को बताया जाता है
तुम्हारी पहचान
हे सखी!
बह रही है कैसी यह बयार।

*****************

# ।। माँ ।।

दीपककुमार थोरात
शिक्षाशास्त्रीप्रथमवर्षम्

ममता से जब गाय अपने बछड़े को चाटती है जब
इस बछड़े में भी मुझे मेरी माँ दीखती है अब।

जब मुझे बोला करते थे लोग
थी तेरे माँ की विकट परिस्थितियाँ।
जल से मिलाकर आटा खीलाती
थी वो आटे में भी मुझे मेरी मेरी माँ दीखती है अब।।

जब लकड़ियाँ लेने जंगल जाती थी वो
चप्पल के बिना इधर उधर घुमती थी वो।
डरा नहीं करते थे काटों से उसके पैर
काटों में भी मुझे मेरी माँ दीखती है अब।।

पीकर दारू पिता मेरे माँ को मारते थे जब
भय के कारण बस थरथर कांपती थी वो।-
लगता है कसाई की रस्सी में बांधी गई थी वो
रस्सी में भी मुझे मेरी माँ दीखती है अब।।

रात दिन पिता मेरे माँ से लड़ाई करते थे जब
बस करो पढाई से इसके वह करेगा अब काम।
क्या पढ़कर यह बनेगा शिक्षक महान
शिक्षक में भी मुझे मेरी माँ दीखती है अब।।

सर्वदा आनन्द से सम्मान करता रहूँ तेरा अब
पुनर्जन्म में तेरा ही पुत्र बनना चाहुंगा अब।
तेरे चरणों में शीश रखकर तेरे पैरों पड़ेगा अब
पैरों में भी मुझे मेरी माँ दीखती है अब।।

*****************

# भारतीयवास्तुशास्त्रस्य उपयोगिता

देवश्रीपरिधा
शिक्षाशास्त्रीप्रथमवर्षम्

भारतस्य इतिहासे वास्तुशास्त्रस्य महत्वपूर्णा भूमिका अस्ति । भारते प्रचीनकाले वास्तुशास्त्रस्य उपयोग आसीत्। ऋग्वेदस्य मतानुयसारं 1000 वर्षेभ्यःपूर्वं वास्तुशास्त्रस्य अनुसन्धानम् अभवत् । निरुक्तकारेण यास्कमुनिना प्रोक्तम् **वसुर्वसतेनिवासकर्मणः** अर्थात् निवासप्रधानमिदं भारतीयवास्तुशास्त्रं जीवनोपयोगिविशिष्टशास्त्रमित्युच्यते । वास्तुशब्दोऽयं निवासार्थकस्य वस् धातोः तुण् प्रत्ययेन निष्पद्यते । शास्त्रमिदम् अथर्ववेदस्य उपवेदस्थापत्यवेदरूपेण सुप्रसिद्धमस्ति । अपि च षड्वेदाङ्गेषु ज्योतिषशास्त्रस्य अन्तर्गतमस्तीति । ज्योतिषशास्त्रं सिद्धान्त-संहिता-होराभेदैः त्रिविधं भवति । एतेषु त्रिषु स्कन्धेषु वास्तुशास्त्रं संहितास्कन्धान्तर्गतमस्तीति । अस्य स्थापत्यवेदस्याधिष्ठातृदेवः वास्तुदेव अस्ति । यस्योपरि लोकपालसंहिता सर्वे देवाः प्रतिष्ठिताः सन्ति । वासतुदेवोयं समेषां प्राणिनां स्वात्मरक्षां करोति । सुखं शान्ति च विदधाति । वासभवनस्य निर्माणकाले वास्तुशास्त्रानुसारं निर्द्धारितदिक्षुः कक्षाणां व्यवस्था करणीयम् ।

**पूजागृहम्**

पूजागृहम् ईशानकोणे भवेत् । कारणं भगवान् शिवः ईशानकोणस्य स्वामी । स च ज्ञानस्य अधिष्ठाता । प्रातः कालीनाः पवित्रसूर्यकिरणः ईशानकोणे आपतति । अतः स्थानमिदं शुद्धं , स्वास्थ्यपदं च भवति । पूजागृहे देवानां मूर्ती पूर्वस्य दिशि स्थापनीयानि । कस्यापि देवस्य मुखम् उत्तरदिशां प्रति न भवेत् ।

**स्नानगृहम्**

भवनस्य पूर्वस्यां दिशि स्नानगृहं भवेत् । कारणम् अस्याः दिशः स्वामी इन्द्रः । अयं देवः अस्माकं शरीरात् आलस्यादीनां तामसीप्रवृत्तीनां दूरीकरोति ।

**शयनकक्षा**

वासभवनस्य शयनकक्षा परिवारसदस्यानुगुणः भवेत् । गृहस्वामिनः शयनकक्षा दक्षिणे , नवदम्पत्योः वायव्ये ,नैऋते सन्तानानां , कुमारिकन्यानां उत्तरे , सामूहिकः शयनकक्षा दक्षिणे निर्धारितः । कारणं अस्य दिशः स्वामी यमः शान्तिदायकः विश्रामदायकश्च भवति। ऐशान्ये आग्नेये वा शयनकक्षा कदापि न करणीयम् । कारणम् ऐशान्ये धनहानिः कार्यहानिः कन्याविवाहे विलम्बश्च । आग्नेये दाम्पत्यकलहः अनिद्राः चिन्तनं च जायन्ते । नवदम्पतयोः शयनकक्षा वायव्ये अथवा उत्तरस्य मध्यभागे समुचितः । कारणं शुक्रः अस्य स्थानस्य स्वामी , यः प्रेमदायकः रतिप्रतिनिधिः ग्रहः कथ्यते ।

# शिक्षकेभ्यः शिक्षामनविज्ञानस्यावश्यकता

जगज्जीवन सिंहः
शिक्षाशास्त्रीप्रथमवर्षम्
jagajjibans357@gmail.com

व्यवहारस्य विज्ञानं मनोविज्ञावम्। अस्मिन् संसारे मनुजः सर्वश्रेष्ठः जीवः वर्तते। जनाः संसारे निवसन्ति। सः मनुजः जन्मन आरभ्यः मरणपर्यन्तं अस्मिन् समाजे जीवनं यापयति। सः मनुजः समाजे कथं व्यवहरति, कथं तस्य स्वभावः, समाजात् कथं सः प्रभवतिः, एतादृशः बहुप्रकारस्य व्यवहारस्य ज्ञानस्य चाध्ययनं करोति मनोविज्ञानम्। मनोविज्ञानम् समाजस्य समस्यानामध्ययनं करोति। अतः विद्यालये उत्पन्ना समस्या तथा छात्राणां विकासस्तरः असमानः चेत् छात्राणां विकासः कथं सम्यक् भविष्यति तत् विषयकं ज्ञानं ददाति मनोविज्ञानम् अतः शिक्षकाणां कृते शिक्षामनोविज्ञानस्य आवश्यकता वर्तते।

**शिक्षामनोविज्ञानम्**

